1818 Tm.

100

120
5

120
५

Bhavaprakash

(A)

अथ

"। भावप्रकाशः।"

मिश्र भावविरचितः।

(उत्तरखण्डः)

(वैद्यशास्त्रम्)

120
5

अथ

"भावप्रकाशः।"

मिश्र भाव विरचितः।

(उत्तरखण्डः)

श्रीगणेशायनमः अथनानाप्रकारेणनाडीपरीक्षामाह पुंसोदक्षिणहस्तस्यस्त्रियोवामकरस्यतु
अङ्गुष्ठमूलगांनाडीपरीक्षेत्भिषग्वरः १ अङ्गुलीभिस्तुतिसृभिर्नाडीमवहितःस्पृशेत् तच्चेष्टयासु
खंदुःखंजानीयात्कुशलोभिषक् २ सद्यःस्नातस्यभुक्तस्यक्षुत्तृष्णातपशीलिनः व्यायामश्रांतदेह
स्यसम्यग्नाडीनबुध्यते ३ वाताधिकेभवेन्नाडीसंव्यक्तातर्जनीतले पित्तेव्यक्तामध्यमायांतृतीयां
गुलिकाकफे ४ तर्जनीमध्यमामध्येवातपित्ताधिकेस्फुटा अनामिकायांतर्जन्यांव्यक्तावातक
फेभवेत् ५ मध्यमानामिकामध्येस्फुटापित्तकफाधिके अंगुलीत्रितयेपिव्याप्तव्यक्तासान्निपा
तिकः ६ वातात्वक्रगतिर्नाडीपित्तादुत्प्लुत्यगामिनी कफान्मंदगतिर्ज्ञेयासन्निपातादतिद्रुता
७ वक्रमुत्प्लुत्यचलतिधमनीवातपित्ततः वहेद्वक्रंचमन्दंचवातश्लेष्माधिकत्वतः ८ उत्प्लुत्य
मंदंचलतिनाडीपित्तकफाधिके कामक्रोधाद्वेगवहाक्षीणाचिंताभयाप्लुता स्थित्वास्थित्वाचलतिया १
हंतिस्थानच्युतातथा अतिक्षीणाचशीताचप्राणान्हन्तिनसंशयः ९ ज्वरकोपेनधमनीसोष्णावेग १

वतीभवेत् मंदाग्नेः क्षीणधातोश्चसैवमन्दतरामता ११ चपलाक्षुधितस्यस्यात्तृप्तस्यवहतिस्थिरा सु
खिनोऽपिस्थिराज्ञेयातथाबलवतीमता १२ इतिनाडीपरीक्षा अथमूत्रपरीक्षा वातेनपाण्डुरंमूत्रं
रक्तंनीलंचपित्ततः रक्तमेवभवेद्रक्ताद्धवलंफेनिलंकफात् १३ अथशरीरस्पर्शोत्योष्णत्वाक्षिणार्थं
स्पर्शनंकार्य्यम् अथजिह्वापरीक्षामाह तत्रजिह्वालक्षणं शाकपत्रप्रभारूक्षास्फुटितारसनानिला
त् रक्तश्यामाभवेत्पित्ताल्लिप्तार्द्राधवलाकफात् १४ परिदग्धाखरस्पर्शाकृष्णादोषत्रयेऽधिके सैवदो
षद्वयाधिक्येदोषद्वितयलक्षणा १५ अथज्वराधिकारः यतःसमस्तरोगाणांज्वरोराजेतिविश्रुतः
अतोज्वराधिकारोऽत्रप्रथमंलिख्यतेमया १६ तत्रज्वरस्यप्रथमामुत्पत्तिमाहसुश्रुतः दक्षापमान
संक्रुद्धरुद्रनिःश्वाससंभवः ज्वरोऽष्टधापृथग्द्वंद्वसंघातागंतुजःस्मृतः १७ अस्यायमर्थः दक्षक
र्तृकोयोऽपमानस्तेनसंक्रुद्धोयोरुद्रस्तस्ययोनिःश्वासस्तस्मात्संभवःउत्पत्तिर्यस्यसज्वरः क्रुद्धरुद्रनिः
श्वाससंभूतत्वेनज्वरःस्वभावात्पैत्तिकइतिबुध्यते यतउक्तंचरकेण क्रोधात्पित्तंप्रकुप्यतीत्यादि

तेनसर्वज्वरेषुपित्तोपशमकारिणीचिकित्साकर्त्तव्या अतएववाग्भटः ऊष्मापित्तादृतेनास्तिज्वरोनास्त्यू
ष्मणाविना तस्मात्पित्तविरुद्धानित्यजेत्पित्ताधिकेऽधिकमिति १९ रुद्रसंभूतत्वेनदेवतात्मकत्वात्पूजा
दित्वंचोपदर्शितं अतएवविदेहः ज्वरस्संपूजनेनापिसहसैवोपशाम्यतीति महर्षिरप्यस्योक्तःसुश्रुते
न रुद्रकोपाग्निसंभूतःसर्वभूतप्रतापनः त्रिपादस्त्रिप्रहरणस्त्रिशिराःसुमहोदरः वैयाघ्रचर्मवसन
:कपिलोज्वलविग्रहः पिंगेक्षणोह्रस्वजंघोबीभत्सोबलवानयं २० पुरुषोलोकनाशार्थमसौज्वर
इतिस्मृतः तैस्तैर्नामभिरन्येषांसत्वानांपरिकीर्तितः उन्मादोनिधनैश्चैवप्रायोविशतिदेहिनां अते
देवमनुष्याभ्यांनान्योविषहतेहितं २२ तस्यज्वरस्यसंख्यारूपांसंप्राप्तिमाह ज्वरोऽष्टधेति अष्टत्वंवि
वृणोति एवमिति वातिकः १ पैत्तिकः २ श्लैष्मिकश्चेतित्रयः ३ द्वंद्वजाश्चत्रयः वातपैत्तिकः ४ वातश्ले
ष्मिकः ५ पित्तश्लेष्मिकश्चेतिद्विसंघातजः ७ सान्निपातिकः ८ एकद्युल्वणैर्षट्स्युर्हीनमध्याधिकैश्च
षट् समस्तैश्चैकोविकारास्तेसंनिपातास्त्रयोदश १३ इतिचरके त्रयोदशसन्निपाताउक्तास्तेयथा वा

तोल्वणः १ पित्तोल्वणः २ कफोल्वणः ३ वातपित्तोल्वणः ४ वातकफोल्वणः ५ पित्तकफोल्वणः ६ एवं षट्
अधिकवातो मध्यपित्तो हीनकफः १ अधिकवातो मध्यकफो हीनपित्तः २ अधिकपित्तो मध्यवातो हीन
कफः ३ अधिकपित्तो मध्यकफो हीनवातः ४ अधिककफो मध्यवातो हीनपित्तः ५ अधिककफो मध्य
पित्तो हीनवातश्चेति ६ षट्सुः समुल्वणः एकः १ एवं त्रयोदश १३ अत्र तु त्रिदोषजत्वेन सामान्यसान्नि
पातिकः एकः एवं गणितः आगंतुजा इति अत्रागन्तुजशब्देनाभिघातादयो हेतवः उच्यंते उक्तविद्या
धयः कार्यकारणयोरभेदोपचारात् आगंतुजा अभिघाताद्यनेककारणयोगादनेके भवंति तथाप्या
गन्तुजत्वेन साम्यादागन्तुजोप्येक एव गणितः नन्वागन्तुजेपि ज्वरे वातादिलक्षणदर्शनादागन्तुजस्य क
थं दोषजाद्भिन्नः उच्यते उत्तरकालदोषोत्पत्तेः तथा च चरके आगंतुर्हि व्यथापूर्वो जायते पश्चान्निजै
र्दोषैरनुबध्यत इति अथ ज्वरस्य विप्रकृष्टकारणकथनपूर्विकां संप्राप्तिमाह मिथ्याहारविहाराभ्यां
दोषा ह्यामाशयाश्रयाः बहिर्निरस्य कोष्ठाग्निं ज्वरदाः स्यू रसानुगाः २४ मिथ्याहारविहाराभ्यां अनुचि

ताहारचेष्टाभ्यांहेतुभूताभ्यांदोषाःवातपित्तकफाः आमाशयाश्रयाःआमाशयंगताःरसानुगाःरसदूषकाः
बहिर्निरस्यकोष्ठाग्निं कोष्ठगताग्नेरूष्माणं नतुसमस्तमग्निं तदादोषपाकासंभवःस्यात् बहिःप्रक्षिप्यज्व
रदाःस्युःज्वरकारिणोभवेयुरित्यर्थः अथज्वरस्यसामान्यंविशिष्टंचपूर्वरूपमाह श्रमोरतिर्विवर्णत्वंवै
रस्यंनयनाप्लवः इच्छाद्वेषौमुहुश्चापिशीतवातातपादिषु २५ जृंभांगमर्दोगुरुतारोमहर्षोऽरुचिस्तमः
अप्रहर्षश्चशीतंचभवत्युत्पत्स्यतिज्वरे २६ सामान्यतोविशेषात्तुजृंभात्यर्थंसमीरणात् पित्तान्नयनयोर्दाहः
कफान्नान्नाभिनंदनं २७ श्रमोव्यापारंविनैव अरतिःस्वस्थचित्तत्वंविवर्णत्वंम्लानगात्रता वैरस्यंमु
खस्याप्रकृतिरसता नयनाप्लवःनयनयोरश्रुपूर्णत्वं शीतवातातपादिषुमुहुरिच्छाद्वेषौ आदिशब्दा
ज्वलनजलेच यतश्चरके ज्वलनातपवाय्वंबुभक्तिद्वेषावनियताविति शयनासनादिष्वित्यन्ये
अंगमर्दोऽंगमोटनं गुरुत्वगात्रस्य रोमहर्षोरोमांचः अरुचिर्भोज्येतमः तमोमग्नस्येवाज्ञानं अप्रहर्षः
हर्षाभावः शीतंशीतलगात्रता चकारात्कालवृद्धितोपदेशोद्वेषादयोऽपिभवंति तृतीयश्लोकस्यसामान्य

तःइतिपूर्वश्लोकाभ्यांसंबंधनीयंतेनसामान्यतोज्वरेउत्पत्स्यति भविष्यतिश्रमादयःपूर्वमेवभवंतीत्यर्थः
उत्पत्स्यतीत्यात्मनेपदिनोऽपिस्त्रात्तुआर्षत्वात् विशेषात्तुउच्यते समीरणज्वरेउत्पत्स्यतिअत्यर्थमति
शयेनजृंभाचभवति पित्तज्वरेउत्पत्स्यतिअत्यर्थंनयनयोर्दाहोभवति कफज्वरेउत्पत्स्यतिअत्यर्थंभ
अन्नाभिनंदनं अन्नेकांक्षाभवति जृंभादयोपिश्रमादिपूर्वंभवंति यतःसामान्यधर्माक्रांतोविशि
ष्टधर्मोभवति द्वंद्वजंपूर्वरूपमाह रूपैरन्यतराभ्यांतुसंसृष्टैर्द्वंद्वजंविदुः अन्यतराभ्यां जृंभानेत्रदा।
हाभ्यां जृंभाभारुचिभ्यां नेत्रदाहाभारुचिभ्यांवासंसृष्टैःरूपैःश्रमादिभिः द्वंद्वजंद्विदोषजंपूर्वरूपंवि
दुःजानीयुः त्रिदोषजंपूर्वरूपमाह सर्वलिंगसमावापःसर्वदोषप्रकोपजे सर्वरूपेसर्वलिंगसमावा
पः अतिशयिताजृंभानेत्रदाहाभारुचिसहितानांश्रमादीनांसमावायोभवति अथज्वरस्यसमान्य
लक्षणमाह स्वेदावरोधःसंतापःसर्वांगग्रहणंतथा युगपद्यत्ररोगेतुसज्वरःपरिकीर्तितः स्वेदाव
रोधः प्रस्वेदानिर्गमनंतुपित्तज्वरेस्वेदनिर्गमादेतल्लक्षणंव्यभिचरति तन्न उत्सर्गापवादभावादितिज्ञे

मा·वै·
४

उटकार्त्तिककुराडादयः अन्येतु स्विद्यतेउत्स्विद्यतेअनेनेतिस्वेदोऽग्निस्तस्यावरोधोदोषैराच्छन्नता संतापः।
तापइतिवक्तव्ये संतापाभिधानंदेहेंद्रियमनसांसंतापबोधनार्थं यतउक्तंचरकेणज्वरविशेषणं देहे
न्द्रियमनस्तापीति तत्रदेहसंतापोदेहोष्णता इंद्रियसंतापःइंद्रियवैकृत्यं यतउक्तं इंद्रियाणांचवैकृ
त्यंयत्रसंतापलक्षणं वैचित्त्यमरतिर्ग्लानिर्मनःसंतापलक्षणमिति सर्वांगग्रहणं सर्वेषामंगानांवेदन
याग्रहणं सर्वाण्यंगानिस्तंभेनगृहीतानीवभवंति युगपदिति मिलितमेतल्लक्षणं प्रत्येकशोव्य।
भिचारात् यथास्वेदावरोधःकुष्ठस्यपूर्वरूपे तथासंतापोदाहव्याधौ तथासर्वांगग्रहणं सर्वरोगाख्ये
वातव्याधौ प्रस्वेदानिर्गमपदेकारणमाह रुणद्धिचाप्यपांधातून्यस्मात्तस्माज्ज्वरातुरः भवत्यत्युष्ण।
गात्रश्चस्विद्यतेनचसर्वशः यस्माज्ज्वरःअपांधातून्रुणद्धितस्माद्धेतोर्ज्वरातुरोऽत्युष्णगात्रोभवतिसर्व।
शःस्विद्यतेचन अथसामान्यतोज्वरस्यचिकित्सामाह असंज्ञायंयत्रदोषानविवेक्तुंनैवशक्नुयात् साधा
रणंक्रियांतत्रविदधीतचिकित्सकः सामान्यतोज्वरीपूर्वंनिवातेनिलयेवसेत् निवातमायुषोवृद्धिमारोग्यं। ४

दोषवर्द्धात्तिऋन्नपाकानि १

मा॰ प्र॰ सज्वरोज्वरमुक्तोवाविदाहीनिगुरूणिच असात्म्यान्यन्नपानानिविरुद्धाध्यसनानिच व्यायाममतिचेष्टांच्वा
५ व्यंगस्नानंचवर्जयेत् तेनज्वरःसमंयातिशांतश्चनपुनर्भवेत् ज्वरीलंघनंकुर्य्यादित्याहचरकोवामदस्य
आमाशयस्थोहत्वाग्निंसामोमार्गान्पिधापयत् विदधातिज्वरंदोषस्तस्माल्लंघनमाचरेत् अस्यायमर्थः
यतोहेतोरामाशयस्थोदोषोवातपित्तश्लेष्मरूपः स्वहेतुदुष्टः अग्निंहत्वाआच्छाद्य सामःअपक्काहाररसा
रसहितः मार्गंरसमार्गंपिधापयेत् अत्रार्षत्वाद्देहेतावधिकर्त्तरिणिचतेनपिदधदित्यर्थः ज्वरंकरोति त
स्माद्धेतोःज्वरीलंघनमाचरेदित्यर्थः त्रिविधंत्रिविधादोषेतत्समीक्ष्यप्रयोजयेत् दोषेऽल्पेलंघनंपथ्यं
मध्येलंघनपाचनं प्रभूतेशोधनंतद्धिमूलादुन्मूलयेन्मलान् चरकश्च तरुणंचज्वरंपूर्वंलंघनेनहृष्यंनये
लिंगाभावपूर्वं त् आमदोषमलिंगांक्तालंघयेत्यथाविधि अन्यच ज्वरादौलंघनंकुर्य्याज्ज्वरमध्येतुपाचनं ज्वरांतेरेच
नंदद्यात्कोष्णभुक्तेयथाबलं दोषशेषस्यपाकार्थमग्नेःसंधुक्षणायच लंघितंचापिदोषंचयवागूपानमा
चरेत् शालिषष्टिकमुद्गानांयूषंवासरसंतमाहरेत् पंचकोलेनसंसिद्धायवागूर्मध्यलंघने अतिलंघि ५

स्था १

तंचतंदृष्ट्वातस्यसंतर्पणंहितं द्राक्षादाडिमखर्जूरप्रियालैःसपरूषकैः तर्पणार्हस्यकर्तव्यंतर्पणंज्वर
शांतये अत्रलंघनशब्देनानशनमुच्यते अतएवाहसुश्रुतः आनद्धःस्तिमितैर्दोषैर्यावंतंकालमातुरः
तावत्वनशनंकुर्य्यात्ततःसंसर्गमाचरेत् आनद्धःस्तिमितैर्दोषैःनिश्चलैःदोषैःसंबद्धः संसर्गश्चौषध
धान्नादिप्रसंगं यत्तुचरकःप्राह चतुःप्रकारासंशुद्धिःपिपासामारुतातपौ पाचनान्युपवासश्चव्या
यामश्चेतिलंघनं चतुःप्रकारासंशुद्धिः वमनविरेचन निरूहनवस्ति शिरोविरेचनानि नत्वनुवा
सनंतस्यबृंहणत्वात् अत्रलंघनंकर्षणमित्यर्थः तथाचसुश्रुतः शरीरलाघवकरंयत्किंचित्कर्मवा
पुनः तल्लंघनमितिज्ञेयंबृंहणंतुपृथग्विधं बृंहणंतुपृथग्विधं लंघनात्कर्षणादन्यतशरीरपोषकर
मित्यर्थः ननुआनद्धःस्तिमितैर्दोषैरित्यादिपूर्वोक्तसुश्रुतवचनात्सामान्यतोज्वरिणांयथानशना
रूपंलंघनंक्रियतेतथाचतुःप्रकारसंशुद्धिःइत्यादिचरकवचनाद्वमनादिरूपंलंघनंसर्वैर्ज्वरिभिः
कथंनक्रियते तत्रोच्यते वमनादिकमवस्थाविशेषेषुक्रियतेनतुसर्वज्वरेषु तथाचसुश्रुतःसो

क्लेशेऽवलिनेदेयं वमनं श्लैष्मिकज्वरे पित्तप्राये विरेकस्तु कार्य्यः अशिथिलाशये प्रशिथिलाशयेऽत्र अप्रोपस
र्गादिपरीत्येन गूढाशय इत्यर्थः मरुजेऽनिलजे कार्य्यः सोदावर्त्ते निरूहणं कफाभिपन्ने शिरसि कार्य्यं मूर्द्ध
विरेचनं अपिच सर्वज्वरिभिः पिपासानिग्रहश्च नकार्य्यः यतआहहारीतः तृष्णागरीयसी घोरासद्यः
प्राणविनाशिनी तस्माद्देयं तृषार्त्ताय पानीयं प्राणधारणं अतोऽवस्थाविशेषएव पिपासासहनं ज्वरे
निर्मारुतसेवनं च नकार्य्यं सुश्रुतेन प्रवातसेवनस्य सर्वथा निषिद्धत्वात् अतो मारुतसेवनमप्यव
स्थाविशेषएव युक्तं आतपसेवनं चावस्थाविशेषेणैव संगृहीतं लंघनांबुयवागूभिर्यदादोषोनपच्यते
तदा तं मुखवैरस्यतृष्णारोचकनाशकैः ज्वरघ्नैः पाचनैर्हृद्यैः कषायैः समुपाचरेत् इत्यत्र लंघनपाच
नयोः स्फुट एवभेदः आयामोऽपि नकार्यस्तस्यातिनिषिद्धत्वात् अवस्थाविशेषे पुनः पार्श्वपरिवर्त्तना
दिरूपः सोपिकर्त्तव्यः तस्माच्चतुः प्रकारासंशुद्धिरित्यादि श्लोके लंघनपदं कर्षणपर्य्यायमिति निर्णी
तं अतस्तं नरूपस्य लंघनस्य फलमाह लंघनेनक्षयंनीते दोषे संधुक्षितेऽनले विज्वरत्वं लघुत्वं च क्षुचै ६

कुरुतेयतः व्यजनस्यानिलं तृष्णास्वेदमूर्च्छाश्रमापहः तालवृंतभवोवातस्त्रिदोषशमनोमतः वंशव्य
जनजः सोष्णरक्तपित्तप्रकोपनः चामरोवस्त्रसंभूतोमयूरोवेत्रजस्तथा एतद्दोषजितावाताः स्निग्धाहृद्या
सुपूजिताः नवज्वरीभवेन्नूनं लघुस्तम्भवसनावृतः यथर्त्तुपक्वं पानीयं पिबेत्किंचिन्निवारयन् विनापिभे
षजैर्व्याधिः पथ्यादेवनिवर्त्तते नतुपथ्यविहीनस्यभेषजानांशतैरपि ततोज्वरेवर्ज्जनीयान्याहसुश्रु
तः परिषेकान्प्रदेहांश्च स्नेहान्संशोधनानि च दिवास्वप्नं व्यवायं च व्यायामं शिशिरं जलं क्रोधप्रवात
भोज्यानि वर्जयेत्तरुणज्वरी परिषेकः स्नानादिः प्रदेहोऽनुलेपनाभ्यंगादिः स्नेहान् स्नेहपानान् निषि
द्धानिषेवेदोषमाह शोषंछर्दिंमदंमूर्च्छांभ्रमंतृष्णामरोचकं प्राप्नोत्युपद्रवानेतान्परिषेकादिसेवनात्
आदिशब्देनप्रदेहाद्योगृह्यन्ते हारीतेनप्रत्येकं दूषणमुक्तं आयम्यक्षुवरते सद्योव्यवायात्तं नमूर्च्छ
नं भ्रमतिश्च स्नेहपानान्मूर्च्छाछर्दिर्मदोऽरुचिः गुर्वन्नभोजनात्स्वप्नाद्विष्टंभोदोषकोपनं अग्निसादः ख
रत्वं च स्रोतसां चाप्रवर्त्तनं भ्रमतिरिति व्यवायादित्यत्रसंबध्यते स्वप्नात् दिवास्वापात् अन्यच्चवर्ज्जयेत्

मा॰प्र॰ ग्लानिः क्षुत्पिपासासहोदये क्षुत्पिपासयोः सह युगपदुदये अंतरात्मनि मनसि एतानि लक्षणानि मि-
७ लितान्येव सम्यक्कृतं लंघनं बोधयंति न तु प्रत्येकं हीनस्य लंघनस्य लक्षणमाह कफोत्क्लेशः सहृ-
ल्लासः ष्ठीवनं च मुहुर्मुहुः कण्ठास्यहृदयाशुद्धिस्तंद्रास्यादीनलंघने कफोत्क्लेशः कफस्य वमना-
योपस्थितिः हृल्लासः हृदयात्कंठदेशनिर्गमः अतिशयितस्य लंघनस्य लक्षणमाह पर्वभेदोंगम-
र्दश्च कासः शोषो मुखस्य च क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्बल्यं श्रोत्रनेत्रयोः मनसस्संभ्रमोऽभीक्ष्णम्
ऊर्ध्ववातस्तमो हृदि देहाग्निबलहानिश्च लंघनेतिकृते भवेत् दौर्बल्यं श्रोत्रनेत्रयोः स्वविषयग्रहणा-
सामर्थ्यं मनसः संभ्रमः भ्रांतिः ऊर्ध्ववातः उद्गारबाहुल्यं हृदि तमः अंधकारप्रविष्टस्येव ज्ञानं बलं र-
क्षन्लंघनं कारयेदित्याह बलाविरोधिना चैनं लंघनेनोपपादयेत् बलाधिष्ठानमारोग्यं यदर्थोऽयं क्रिया-
क्रमः अयमर्थः एवं ज्वरिणं बलाविरोधिना नात्यतिबलक्षयकारिणा लंघनेनोपपादयेत् उपचारये-
त् कुत इति चेत्तत्राह अयमर्थः यस्मै आरोग्याय अयं क्रियाक्रमः तत् आरोग्यं बलाधिष्ठानं बलाश्रयमि ७

त्यर्थः केषांचिदनशनस्य निषेधमाह सुश्रुतः तद्विमारुतबलात्क्षुन्मुखशोषश्रमान्वितैः न कार्य्यं गुर्विणी-
बालवृद्धदुर्बलभीरुभिः तृष्णयाध्वश्रमक्रोधकामशोकं चिरज्वरे तत्रानशनं लक्षणमारुतयुक्तेन ज्व-
रिणा न कार्य्यं मारुतोऽत्र निरामो बोधव्यः सामे तु मारुते लंघनं कार्य्यमेव यत हारीततंत्रांतरे अवश्य-
मेव कुर्वीत ज्वरी सामे समीरणे लंघनं ह्यामया कार्यं न तद्वद्यथा कफे तदुक्तं आमया कार्श्ये अत ए-
वोक्तं कफपित्तेन्द्वे धातून्सहते लंघनं बहु आमक्षयादूर्ध्वमपि वायुर्न सहते क्षणं आमस्य लक्षणमा-
ह आहारस्य रसः सारो यो न पक्वोऽग्निलाघवात् आमसंज्ञः स लभते बहुव्याधिसमाश्रयः तंत्रांतरे
आममन्नरसं केचित् केचित्तु मलसंचयं प्रथमं दोषदुष्टं वा केचिदामं प्रचक्षते अन्यच्च अविपक्वम-
संसक्तं दुर्गंधिं बहुपिच्छिलं सदनं सर्वगात्राणामाममित्यभिशब्दितः तेनामेन समायुक्ता दोषा दूष्याश्च ता-
दृशाः तदुद्भवाश्चामयाश्च सामा इति बुधैः स्मृतः अत्र सामवातस्य लक्षणमाह वायुः सामो विबंधाग्नि-
सादतंद्रांत्रकूजनैः वेदनाशोथनिस्तोदैः क्रमशोंगानि पीडयेत् विचरेद्युगपच्चापि गृह्णाति कुपि-

तोऽन्यत्रां स्नेहाद्यैर्वृद्धिमायाति मेघसूर्योदये निशि क्वचिद्वेत्युगपत् वायुरामश्चैककालं विचरेत् कुपितः।
सामो वायुः सर्वत्रामतिशयेन गच्छत्यंगानीत्यर्थः तस्यैव निरामलक्षणमाह निरामो विशदो रूक्षो निर्वि
बंधोऽल्पवेदनः विपरीतगुणैः शांतिं स्निग्धैर्यातिविशेषतः अथ पित्तस्य प्रसंगात् सामस्य लक्षणमाह
दुर्गंधं सामं भवेद्रक्तं दुर्गंधं हरितं गुरु अम्लिकाकण्ठहृद्दाहकरं स्यात्तथास्थिरं अम्लिका अविल।
चुकी इति लोके तस्य निरामस्य लक्षणमाह निरामं पीतमाताम्रमस्थूलं कटुकं शरं दुर्गंधि रुचिकृद्व।
न्हिबलवर्द्धनमीरितं अथ सामस्य कफस्य लक्षणमाह आविलस्तंतुलः स्त्यानः कण्ठदेशेऽवतिष्ठते
सामो बलासो दुर्गंधिः क्षुदुद्गारविघातकृत् स्त्यानः संहतः तस्य निरामस्य लक्षणमाह श्लेष्मा निरामो
निर्गंधो फेनवानच्छस्त्यानपि भवेत्स पिंडितः पांडुरश्च वैरस्यनाशकृत् अथ सामस्य व्याधेः लक्षण।
माह आलस्यं तंद्रा हृदयाविशुद्धिर्दोषप्रवृत्त्याविलमूत्रतार्तिः गुरूदरत्वारुचिसुतता निरामान्वितं व्या
धिमुदाहरंति आमं जयेल्लंघनकोलपेयालध्वन्नसर्पोदनतिक्तयूषैः विरूक्षणस्वेदनपाचनैश्च संशो।

धास्योपजायते लंघनेन अनशनेन दोषेऽप्रवृद्धे क्षयं नीते अत आह आहारं पचति शिखी दोषानाहारव
र्जितः पचतीति संक्षुधिते अनले आच्छादकदोषे क्षीणे अग्नौ प्रदीप्ते यथोक्तसंप्राप्तिसामग्रीविघटनेन वि
ज्वरत्वं शरीरस्य गौरवाभावेन लघुत्वं क्षुत् बुभुक्षा च जायत इत्यर्थः अन्यच्चाह सुश्रुतः अनवस्थितदो
षाग्नेर्लंघनं दोषपाचनं ज्वरघ्नं दीपनं कांक्षारुचिलाघवकारणं अनवस्थितदोषाग्नेः अनवस्थितः।
स्वस्थानाद्वितः ततो गतो दोषोऽग्निश्च यस्य तस्य च रिणः कांक्षा अन्नाभिलाषः रुचिः लंघनेन मुखशो
षादिनाशे मुखस्य यत्प्रकृतत्वं सैव रुचिः शोभा रुचिस्त्विद्दीप्तिशोभायामभिषंगाभिलाषयोरिति मेदि।
नीकारः सम्यक्कृतस्य लंघनस्य लक्षणमाह वातमूत्रपुरीषाणां विसर्गे गात्रलाघवे हृदयोद्गारक
ण्ठास्यशुद्धौ तन्द्राक्लमे गते स्वेदे जाते रुचौ चापि क्षुत्पिपासासहोदये कृतं लंघनमादेश्यं निर्व्यथे चांत
रात्मनि हृदयस्य शुद्धिरनवरोधः उद्गारशुद्धिः सधूमाम्लोद्गाराभावः कंठस्य शुद्धिः कफाद्यलि
प्तत्वं आस्यशुद्धिः मुखस्य प्रकृतरसत्वं तंद्राक्लमे तन्द्रा च क्लमश्च तस्मिन् तंद्रा निद्रावत् क्लमोऽत्र।

धनेस्त्वर्द्धमधस्तथैव तद्धिमास्तत्र तृष्णास्तुदित्याद्धिश्लोके तृष्णापि निरामैव विवक्षिता तेन निरामतृष्णान्वितेन लं
घनं न कार्य्यं सामे यां तु तृष्णायां लंघनकार्य्यमेव तथा मुखशोषभ्रमावपि निरामयावेव विवक्षितौ सामा
योस्तु तयोर्ल्लंघनकार्य्यमेव गुर्व्विणी बालवृद्धादिभिरपी निरामैरेव लंघनं न कार्य्यं सामैः पुनस्तैरपि लं
घनं कार्य्यमेव क्षयो धातुक्षयो राजयक्ष्मा वातजे ज्वरे लंघनं न कार्य्यं ज्वरी लंघनेऽपि जलं पिबेदित्याह
सुश्रुतः तृषितो मोहमायाति मोहात्प्राणान्विमुंचति अतः सर्वास्ववस्थासु न क्वचिद्वारि वर्ज्जयेत् हारीते
च तृष्णा गरीयसी घोरा सद्यः प्राणविनाशिनी तस्माद्देयं तृषार्त्ताय पानीयं प्राणधारणं आवस्यं पेयमपि
जलं ज्वरी किंचिद्वारयन्पिबेत् अतश्चाह सुश्रुतः एव जीवनं जीविनां जीवो जगत्सर्व्वं तु तन्मयं अतोऽत्यन्त
वयासुत्तो न क्वचिद्वारि वारयेत् जीवनं जलं किंचित्तु वारयेदेव न तथा ज्वरे नेत्रामये कोष्ठे मंदेऽग्नावुदरे
तथा अरोचके प्रतिस्याये प्रशोके श्वयथौ क्षये व्रणे च मधुमेहे च पानीयं मंदमाचरेत् प्रसेके मुखप्रसेके
मन्दं समाचरे तत्र अल्पं पिबेत् यतश्चाह अतियोगे न सलिलं तृष्यतोऽपि प्रयोजितं प्रयाति श्लेष्मपित्तत्वं च

रितस्यविशेषतः तप्तजलंज्वरीपिबेत् शीतलंनपिबेदित्याहसुश्रुतः नवज्वरेप्रतिश्यायेपार्श्वशूलेगलग्रहे स
द्यःशुद्धौतथाध्मानेव्याधौवातकफोद्भवे अरुचिग्रहणीगुल्मश्वासकाशेषुविद्रधौहिक्कायांस्नेहपानेचशीतां
वारिविवर्ज्जयेत् अल्पशएव सेव्यमानेनशीतेनज्वरस्तोयेनवर्द्धते अत्रशीतंजलमपक्वथितंनिषिद्धं त
थासतिक्वथितंग्राह्यमायातं तत्रक्वथितस्यविधिर्गुणाश्च क्वाथ्यमानंतुनिर्वेगंनिःफेनंनिर्मलंचयत् तत्तो
यंक्वथितंज्ञेयंदोषघ्नंपाचनंलघु निर्वेगंशान्तैः क्वथितस्यविषयानाहसुश्रुतः वातश्लेष्मज्वरार्त्तायहि
तंसुतप्यतेजलं दीपनंस्यात्कफच्छर्दिवातपित्तानुलोमनं तद्धिमार्द्दवकृद्दोषस्रोतसांशीतमन्यथावाग्भ
टश्च तप्तायांप्रातमुष्णांवुपिबेद्वातकफज्वरे तत्कफंविलयंनीत्वातृष्णामाशुनिवर्त्तयेत् उदीर्य्यचाग्निं
स्रोतांसिमृदुकृत्यविशोधयेत् वातपित्तकफस्वेदसकृन्मूत्राणिसारयेत् अथोष्णोदकस्यलक्षणगुणा
श्च क्वाथ्यमानंतुनिर्वेगंनिष्फेनंनिर्मलंतथा अर्द्धावशिष्टंयत्तोयंतदुष्णोदकमुच्यते ज्वरकाशकफश्वा
सवातपित्तामभेदसां नाशनंवस्तिसंशोधिपथ्यमुष्णोदकंतथा अथचतुर्भेदेनजलस्यपाकभेदः त्रिपा

भा॰प्र॰ १०

ज्ञेयंहंसोदकंनाम स्निग्धंदोषत्रयापहं अनभिष्यंदि निर्दोषमांतरिक्षजलोपमं बल्यंरसायनंमेध्यंशीतलंल
घुसुधासमं अन्यच्च शरद्यगस्त्योदयात्खिलंसलिलंहितम् तथासुश्रुतः कार्तिकेमार्गशीर्षेचपयोमात्रं
प्रशस्यते यच्चर्तुपक्वमपिजलंरोगविशेषेशीतलंपिबेदित्याहसुश्रुतः दाहातीसारपित्तास्रमूर्छामद्य
विषार्तिषु मूत्रकृच्छ्रेपांडुरोगेतृष्णाछर्दिभ्रमेषुच मद्यपानात्समुद्भूतेरोगेपित्तोत्थितेतथा सन्निपातसमुत्थे
चशृतंशीतंप्रशस्यते क्वथितस्यजलस्यशीतलीकरणविशेषगुणविशेषमाहसुश्रुतः शृतामुत्त्रिदो
षघ्नंयदजस्रवाष्पशीतलं अरूक्षमनभिष्यंदिकुमितरूहल्लासकृल्लघु धारापातेनविष्टंभोदुर्जरंपवना
नाहतं अंतर्वाष्पशीतलंपिहितमेवशीतलं दिवाशृतंपयोरात्रौगुरुतामधिगच्छति रात्रौशृतंदि
वापीतिगुरुत्वमधिगच्छति तच्चपर्युषितंवह्निगुणेनहत्रिदोषकृत् गुर्वम्लपाकंविष्टंभिसर्वरोगे
षुनिंदितं शृतंशीतंपुनस्तप्तमतोयंविषसमंभवेत् निर्यूहोपितथाशीतःपुनस्तप्तोविषोपमः नारि
केलोदकस्यलक्षणमन्यदाह अष्टमेनांशशेषेणचतुर्थेनार्धकेनवा अथवाक्वथितेनैवासि १०

द्धमुष्णोदकंवदेत् तस्यगुणाः श्लेष्मानिलाममेदोघ्नंदीपनंबस्तिशोधनं श्वासकासज्वरहरंपीतमु
ष्णोदकंनिशि अन्यच्च भिनत्तिश्लेष्मसंघातंमारुतंचापकर्षति अजीर्णंजरयत्याशुपीतमुष्णोदकंनि
शि तथाचोष्णोदकंचतप्तमेवपिबेदित्याह उष्णंतदग्निजननंलघ्वच्छंबस्तिशोधनं पार्श्वरुक्पीनसाध्मा
नहिक्कानिलकफापहं शस्तंतृट्श्वासशूलेषुसद्यःशुद्धौनवज्वरे विषयविशेषेत्वाममेवजलंशीत
लंपिबेदित्याहसुश्रुतः मूर्छापित्तोष्णदाहेषुविषेरक्तेमदात्यये भ्रमश्रमपरीतेषुतमकेवमथौत
था धूमोद्गारेविदग्धेऽन्नेशोषेषुमुखकंठयोः ऊर्ध्वगेरक्तपित्तेचशीतमंभःप्रशस्यते शीतमंभः
आममेवनतुक्वथितं तच्चशीतंदाहादिषुयदुक्तंतत्सज्वरेषु विज्वरेषुतुदाहादिष्वामंशीतंप्रश
स्यतेइतिभेदः आमादिजलानांजठराग्निनापाककालमाह आमंजलंपाकमुपैतियामंपक्वंपुनः
शीतलमर्धयामं पक्वंकदुष्णंचततोऽर्धकालंकालात्त्रयःपीतजलस्यपाके पित्तमद्यविषोत्थेषुते
ष्णकेःशृतशीतलं जलंहितमितिविशेषः तिक्तानिवकुलानितैस्योनिर्धार्य्यपोगमाहसुश्रुतःसु

भा.प्र. स्तापर्पटकोदीच्यछत्राम्भोशीरचंदनैः शृतंशीतंजलंदद्यात्तृड्दाहज्वरशांतये छत्रात्रधान्यकं प

११ तत्राहधन्वंतरिःनिघंटे कुस्तुंबुरुःस्वर्णकारःछत्राधान्यंवितुन्नकमित्यादि तद्गुणश्च धान्यकंदीप

नंरूक्षंपाचनंस्वादुपाकिच दोषत्रयतृषादाहश्वासकासज्वरप्रणुदित्यादि चक्रदत्तवंगसेनवृंदा

पृ१४ दयस्त्वत्रास्थानेनागरंपठंति तद्यथा मुस्तापर्पटकोशीरचंदनोदीच्यनागरैरिति नागरंकटुकम

पिनाग्निजनकं मधुरपाकित्वादितितेषामभिप्रायः नागरंनागरमुस्तकमितिकेचित् क्वचिदे

कदेशेनसमुदायोवाच्यतेयथाभीमोभीमसेनइति त्रिशतीतुनागरस्थानेपद्मकं एतस्यप्रक्रिया

चंदनैरित्यत्रसहार्थेतृतीयातेनमुस्तादिभिःषड्भिरामैरेवचूर्णितैः सहितंजलं शृतंजलमेवकेवलंपथ

र्युषितंपश्चाच्छीतलीकृतं तद्यथा तथाचवंगसेनः यदाप्सुशृतशीतासुषडंगादिप्रयोज्यते कर्षमा

त्रंततोद्रव्यंग्राह्यंप्रस्थार्धिकेंभसि अस्यायमर्थः यतोहेतोःअप्सुजलेषु शृतशीतासुकेवलास्वेव प

र्युषितासुशीतासुतासुशीतलीकृतासुषडंगादिद्रव्यंप्रयोज्यते आममेवसंक्षुद्यजलेस्थाप्यते ततः ११

पृ३

दशेषंशालिलंग्रीष्मेशरदिशस्यते अर्धशेषंतुशिशिरेतथावर्षावसंतयोः अन्येतु निदाघेत्वर्धपादोनंपा

दहीनंतुशारदं शिशिरेचवसंतेचहिमेचार्धावशेषितः अष्टमांशावशेषेणवारिवर्षासुशस्यते इतिकेचि

द्बुधाःप्राकृतैर्जुष्टागमदर्शनात् केचित्तु वसुष्वंगेषुबाणेषु५वेदेषु४त्रिषु३पक्षयोः२ एकभागावशेषस्या

दंबुवर्षादिषुक्रमात् अत्रदोषाणांयथोल्बणताहीनतावातथाव्यवस्थाकल्पनीया तत्पादहीनंपित्त

५५ घ्नमर्धहीनंतुवातनुत् त्रिपादहीनंश्लैष्मघ्नंसंग्राह्यग्निप्रदंलघु त्रिपादहीनस्यतंत्रांतरेरोग्यांबुसंज्ञातस्य

लक्षणंगुणाश्च पादशेषंतुयत्तोयमारोग्यांबुतदुच्यते आरोग्यांबुसदापथ्यंकासश्वासकफापहं सद्यो

ज्वरहरंग्राहिदीपनंपाचनंलघु अनाहपाण्डुशूलार्शोगुल्मशोथोदरापहं अथऋतुभेदस्यजलस्य

ग्रहणोपदेशभेदः हेमंतेशिशिरेचांबुशारसंवातडागजं वसंतग्रीष्मयोःकौप्यंवाप्यंवानैर्झरंहितं

नदेयंवारिनादेयंवसंतग्रीष्मयोःबुधैः विषवत्यत्रपुष्पादिकुहनिर्झरयोगतः औद्भिदंवांतरिक्षं

वाकौपंवाप्रावृषिस्मृतं शारदंशरदिनादेयंनीरमंबुदकंपरं दिवारविकरैरुष्णंशीतंशीतकरैर्निशि

अत्रश्रीपर्णीपरूषकयोर्फलियाहे मधूकस्यतुपुष्पं अन्येच हन्यात्सयष्टीमधुकंतथैवोत्पलपूर्वकं पानंशृतं
हिमंकिंवासोत्पलंशर्करायुतं हन्यात्पित्तज्वरमितिविशेषः उत्पलमत्रकमलं इत्यादि दिवास्वापंनकुर्वीत
यतोऽसौस्यात्कफावहं ग्रीष्मवर्ज्येषुकालेषुदिवास्वापोनिषिध्यते उचितोहिदिवास्वप्नोनित्यंयेषांशरीरि
णां वातादयःतुप्रकुप्यंतितेषामस्वपतांदिवा येषांदिवास्वप्नउचितस्तानाहव्यायामप्रदाध्ववाहनरता
नलकातानतीसारिणः श्वासवतस्तृषापरिगतान्हिक्कामरुत्पीडितान् क्षीणानक्षीणकफान्शिशून्म
दहतान्वृद्धान्रसाजीर्णिनोरात्रौजागरितान्निरन्नान्कामंदिवास्वापयेत् अथवातिकादिज्वराणां
पाकावधिमाह वातिकःसप्तरात्रेणदशरात्रेणतुपैत्तिकः श्लैष्मिकःद्वादशाहेनज्वरःपाकमुपैतिहि
रसस्यामत्वावधिमतिक्रम्यापिज्वरस्तिष्ठति अतआहसुश्रुतः बहुदोषस्यमंदाग्नेःसप्तरात्रात्परंज्व
रे लंघनांबुयवागूभिर्यदादोषोनपच्यते तदातंमुखवैरस्यतृष्णारोचकनाशनैः कषायैःपाचनैःहृद्यै
र्ज्वरघ्नैस्समुपाचरेत् ज्वरस्यतारुण्यमध्यस्थताजीर्णताविधिः आसप्तरात्रात्तारुण्यंज्वरमाहुर्मनीषिणः १२

द्वादशाहमतिःमाप्यमध्यंजीर्णंततःपरं आसप्तरात्रादिति अत्राङ्मर्यादायां रात्रिशब्दोदिवसस्योपलक्षकः
तेनसप्तमदिवसादर्वाग्ज्वरस्तरुणइत्यर्थः तथाचोक्तंतंत्रांतरे ज्वरोत्पत्तितेषडहेजीर्णइत्युच्यतेबुधैरिति
दशरात्रात्परंजीर्णमाहुरन्येमनीषिणः अतएवजातूकर्णः जीर्णस्त्रयोदशोदिवसेइति अथज्वरेभेषज
प्रयोगाख्यसमयः वातिकेसप्तरात्रेणदशरात्रेणतुपैत्तिके श्लैष्मिकेद्वादशाहेनज्वरेयुंजीतभेषजं सप्तरात्र
इत्यत्ररात्रिशब्दोदिवसस्योपलक्षकः अतएवोक्तं पाययेद्दातुरंसाममौषधंसप्तमेदिने सप्तमेनाथ
वाष्टम्यां निरामंतमुपाचरेत्इति शार्ङ्गधरेणाप्युक्तं गुडूचीपिप्पलीमूलंनागरैःपाचनंशृतं वातज्वरे
तथापेयंकालिङ्गःसप्तमेहनीति हारीतेनाप्युक्तं एतांक्रियांप्रयुंजीतषड्रात्रंसप्तमेहनि पिबेत्कषाय
संयोगात्पेयांज्वरविनाशिनी एतांक्रियांलंघनादिरूपां कषायसंयोगात्कषायेणसाधितांपेयामित्य
र्थः खरनादेनाप्युक्तं इतिषड्रात्रिकःप्रोक्तोनवज्वरहरोविधिः ततःपरंपाचनीयंशमनीयंज्वरे
हितं ततःपरंसप्तमेहनिइत्यर्थः वाग्भटश्च सप्ताहादौषधंकेचिदाहुरन्येदशाहतः लेह्यंनेनोज्झे

भा·प्र· तं केचिद्देयमामोत्वणेन तु सप्ताहात्सप्ताहमारभ्येत्यर्थः अत्र ल्यब्लोपे कर्म्मणि पंचमी अतएव सु-
१३ श्रुतः दशरात्रात्परं सर्वैर्दातव्यमिति निश्चितमिति अतएव दशरात्रेणक्षादशाहेनेति लंघनवतामति
तेनेत्यर्थः अतएव सुश्रुतः ज्वरितं षडहेऽतीते लघ्वन्नं प्रतिभोजितं पाचनं शमनीयं वा कषायं पाय-
येक्षितं अस्यायमर्थः ज्वरितं षडहे लंघनेनातीते सप्तमेऽहनि भोजितं लघ्वन्नं अष्टमे दिने कषायं पा-
ययेदित्यर्थः तथा च सुश्रुतः सप्तरात्रात्परं केचिन्मन्यंते देयमौषधमिति सप्तरात्रात्परमष्टमेऽहनीत्यर्थ
ः केचिच्चरकादयः चरकोतोपि सप्तरात्रेण पच्यंते सप्तधातुगतामलाः निरामस्तु ततः प्रोक्तो ज्वरप्रायो
ष्टमे दिने एवं सति कषायदाने सप्तमाष्टमयोर्दिवसयोर्विकल्पः तत्रापि वयोबलाग्निदोषदेशकालोचि-
तं कुर्य्यात् भेषजमन्नं च दोषपाकं दृष्ट्वा दद्यादित्याह सुश्रुतः पैत्तिके वा ज्वरे देयमल्पकालसमुत्थिते अ-
चिरज्वरितस्यापि भैषज्यं दोषपाकतः इति अस्यायमर्थः अल्पकालसमुत्थिते पैत्तिके ज्वरे दोषपाकं दृ-
ष्ट्वा भैषज्यं देयमित्यर्थः दोषपाकस्य लक्षणमाह सुश्रुतः मृदौ ज्वरे लघौ देहे प्रचलेषु मलेषु च पक्वं दो- १३

प्रक्षेप्यस्त्वात् कर्षमात्रद्रव्यं समुदितं षडंगादिप्रास्थिकेऽम्भसि पचेदर्द्धमात्रे क्वथितं शीतले जले देयं
ग्राहयेत् अतएव षडंगमभिधाय षडंगपानीयमिति वंगसेनादिभिरुक्तं अस्मिन्पक्षे चंदनं श्वेतं ग्राह्यं
मधुरक्तं तत्कषायपलेपयोरेव प्रयोक्तुमुक्तं अतआह कषायलेपयोः प्रायो युज्यते रक्तचंदनमिति
षडंगपानीयमिदं षडंगादेः पाने तु विधातव्ये प्रक्रियां भिन्नामाह वंगसेनः कर्षमात्रमिह द्रव्यं ग्राह-
येत् प्रास्थिकेऽम्भसि अर्द्धशृतं प्रयोक्तव्यं पाने पेयादिसंविधौ आदिशब्देन यूषयवागूविलेपीनां ग्र-
हणं ते पानप्रक्रियां शार्ङ्गधरोऽप्येतामेवाह चतुःसंकद्रव्यपलं प्रसाध्यं चतुःषष्टिपले जले अर्द्धशि-
ष्टं तु तद्देयं पाने पेयादिसंविधौ पानप्रयोगं च षडंगमुक्तवान् अस्मिन्पक्षे चंदनं रक्तं ग्राह्यं कषाय-
लेपयोः प्रायो युज्यते रक्तचंदनमिति वचनात् तथा रक्तचंदनस्य गुणाः मधुरक्तं हिमं स्वादु छर्दितृ-
ष्णास्रपित्तजित् तिक्तं नेत्रहितं वृष्यं ज्वरव्रणविषापहं षडंगादिः प्रयुज्यते इत्यादिशब्देन वक्ष्यमाणयो-
गाः उच्यंते ते यथा श्रीपर्णीचंदनोशीरपरूषकमधूकजं पानं पित्तज्वरं हन्यात् सखारिवाद्यं सशर्करं

षंविजानीयात् ज्वरेदेयंतदौषधमिति ज्वरेमृदौस्वल्पीभूते मलेषुवातपित्तकफमूत्रपुरीषेषुप्रबलेषुस्वमा
र्गसंचारिषु पक्वंनिरामं दोषप्रकृतिवैकृत्यादेकेषांपाकलक्षणं दोषाणांदुष्टवातपित्तकफानांप्र
कृतिः ज्वरस्यतदुपद्रवाणांचोत्पादनंतस्य वैकृत्यंवैपरीत्यं तस्माद्दोषपाकज्ञानंएकेषांग्रंथे ।
क्षुत्क्षामतालघुत्वंचगात्राणांज्वरमार्दवं दोषप्रकृतिरुत्साहो निरामज्वरलक्षणं दोषप्रकृतिःदोषा
णांस्वमार्गसंचारः ज्ञेयःपंचविधःकालोभैषज्यग्रहणेनृणां तत्रा भुक्तेप्रभातंस्यात्कषायेषुविशे
षतः मुख्यभैषजसंबंधोनिषिद्धस्तरुणेज्वरे तोयपेयादिसंस्कारैर्निर्दोषःतत्रभेषजं मुख्यभेष
जंकाथःतस्यसंबंधपानं अतआह नकषायंप्रयुंजीतनराणांतरुणेज्वरे कषायेनाकुलीभूतादो
षाजेतुंसुदुस्तराः आकुलीभूताःप्रदुष्टाःस्वमार्गंपरित्यज्यइतस्ततोगताः तत्रकषायशब्देनका
थोगृह्यते अतःस्यकाथस्यपर्य्यायाः शृतंकाथंकषायश्चनिर्यूहःसनिगद्यते इति तोयपेयादि
संस्कारैर्निर्दोषस्तत्रभेषजमिति तत्रतरुणेज्वरेभेषजंमुख्यंभेषजंकाथस्तत्पंतोयपेयादिसंस्कारैर्नि

भा॰प्र॰ दीर्घं अतआह नतुकल्पममुद्दिश्यपकषायः प्रतिषिध्यते इति कल्पनंतोयपेयायवाग्वादिकं नतु
१४ स्वरसश्चतथैकल्कः क्वाथश्चहिमफाण्टकौ ज्ञेयाः कषायाः पंचैतेलघवः स्युर्यथोत्तरमितिवचनात्स्व
रसादयोपिकथंननिषिध्यंते तत्र यः कषायः कषायः स्यात्सवर्ज्यस्तरुणज्वरे इति यः कषायः कषा
यः स्यात्चतुर्थभागावशेषकरणे नाष्टमभागावशेषकरणेवाकषायवर्णः कषायरसश्चस्यात् सः
कः क्वाथः सः तरुणज्वरेनिषिद्धः क्वाथवाचकस्यकषायस्यलक्षणमाह पादशिष्टःकषायः स्याद्वः
षोडशगुणांभसा क्वथितोऽतः षडंगादिर्ननिषिद्धोनवज्वरे अयमर्थः यः क्वाथश्चस्यात्षोडशगुणेनां
भसाक्वथितः पक्कः अथपादशिष्टः चतुर्थभागावशेषः सकषायः स्यात् अतः षडंगादिस्तरुणज्वरेन।
निषिद्धः अपाकादर्द्धपाकत्वोक्तलक्षणभावेकषायत्वाभावात् तरुणज्वरेकषायस्यदोषमाह दो
षास्त्वाकषायेणस्तंभितास्तरुणज्वरे स्तभ्यंतेनविपच्यंतेकुर्वंतिविषमज्वरे कषायेणस्तंभितायस्त्व।
येनिवारिताः यतआहकषायरसगुणान् कषायः स्तंभनः शीतोरूक्षः पित्तकफापहः इत्यादिस्त १४

चेदामं रसं च यत् यदपक्वान्पचेद्दोषांस्तत्क्रियापाचनमुच्यते न शोधयति यद्दोषान्समान्नोदीरयत्यपि समी
करोति संक्रुद्धांस्तत्संशमनमुच्यते त– पाचनमुच्यते नोर्ध्वंऽधोमार्गाभ्यां पातयति नोदीरयति नवर्द्धय
ति: तयोः संप्रदानं कालं चाह पाययेदातुरं सामं पाचनं सप्तमे दिने शमनेनाथ वा दृष्ट्वा निरामं तमुपाच
रेत् अन्यच्च कुर्याच्चैवाल्पदोषं च समनीयैरुपाचरेत् ननु लालाप्रसेको हृल्लासो हृदयाशुद्ध्यरोच
कः तंद्रालस्यो विपाकास्यवैरस्यं गुरुगात्रता क्षुन्नाशो बहुमूत्रत्वं स्तब्धताबलवान्ज्वरः आमज्व
रस्य लिंगानि न दद्यात्तत्र भेषजं भेषजं ह्यामदोषस्य भूयो जनयति ज्वरं भूयो जनयति ज्वरं भूयः वाहु
ल्येन अन्यच्च पाययेद्दोषहरणं मोहादामज्वरे तु यः ससुप्तं कृष्णसर्पं तु कराग्रेण परामृशेत् इति व
चनादामज्वरे भेषजनिषेधात्कथं सामज्वरे पाचनं देयं उच्यते निरुपद्रवे सामज्वरे पाचनं देयं सो
पद्रवे तु सामे भेषजं निषिद्धं तथा च वाग्भटः सप्ताहात्परतोऽपि सामे स्यात्पाचनं ज्वरे निरामे शमनं स्त
ब्धे सामे नौषधमाचरेत् अथ निरुपद्रवे स्तब्धे सोपद्रवे अथ सामान्यज्वरे पाचनं कषायमाह सुश्रुतः १५

नागरं देवकाष्ठं च ध्यामकं बृहतीद्वयं दद्यात्पाचनकं पूर्वं ज्वरितेभ्यो ज्वरापहं ध्यामकं रोहिषं तद्दलाक्ते उशीरं
दद्यात् बृहतीद्वयं बृहत्फला सूक्ष्मफला बृहती क्षुद्रा बृहती चेति कंटकारीद्वयं च दद्यात् कंटकारीद्वयं शुं
ठी ध्यामकं सुरदारु चेति शार्ङ्गधरेणोक्तत्वात् नागरादिक्वाथः सर्वज्वरेषु अथ सामान्यतः संशमनी
यान्याह सुश्रुतः अथ संशमनीयानि कषायाणि निबोध मे सर्वज्वरेषु देयानि यानि वैद्येन जानता
वृश्चीवबिल्ववर्षाभूपयः सोदकमेव च पचेत्क्षीरावशेषं तत्तत्पेयं सर्वज्वरापहं वृश्चीवः श्वेतपुन
र्नवा वर्षाभू रक्तपुनर्नवा तथा च मदनपालः पुनर्नवा श्वेतमूलो वृश्चीवो दीर्घपत्रकः पुनर्नवा
परा रक्ता वर्षाभू रक्तपुष्पकः पाकप्रकारमाह क्षीरमष्टगुणं द्रव्यात्क्षीरान्नीरं चतुर्गुणं क्षीरावशे
षं पातव्यं क्षीरपाकेष्वयं विधिः द्रव्यात्पलपरिमिताद् अन्यच्च उदकाद्द्विगुणं क्षीरं शिशिरापासार
मेव च तत्क्षीरशेषं क्वथितं पेयं सर्वज्वरापहं गुडूचीधान्यकारिष्टपद्मकं रक्तचंदनं एषां क्वाथः
सुप्रसिद्धः सर्वज्वरहरः स्मृतः दीपनो दाहहृल्लासतृष्णाच्छर्द्यरुचिं हरेत् गुडूच्यादिक्वाथ इति संशो

धनंतरुणज्वरिणोनिषिद्धंतदाहसुश्रुतः छर्दिमूर्छामदंमोहंश्रमंतृष्णांविषमज्वरान् संशोधनस्यपानेनप्रा
प्नोतितरुणज्वरी संशोधनस्यलक्षणमाह स्थानाद्बहिर्नयेदूर्ध्वमधोवादोषसंचयं संशोधनंतदेवस्या
देवदालीफलंयथा निषिद्धमपिसंशोधनमवस्थाविशेषेदेयं यत आह रोगेशोधनसाध्येवुयंविद्या
द्दोषदुर्वलं तंसमीक्ष्यनिषकुर्य्याद्दोषप्रत्यावर्तनंमृदुशोधनसाध्यानरोगानाह सद्योज्वरेविषेजीर्णेमंदेग्ना
वरुचौतथा स्तन्यरोगेचहृद्रोगेकाशेस्वासेचवामयेत् जीर्णज्वरगरच्छर्दिगुल्मप्लीहोदरेषुच शूले॰
शोथेमूत्रवघातेकृमिरोगेविरेचयेत् दोषदुर्वलं दोषैरुपचितैर्दुर्वलंनतूपवासादिकृतं अतएवस
मीक्ष्येति अन्यच्च वलेदोषेमृदौकोष्टेनपेक्षेतवलंनृणां अव्यापदुर्वलस्यापिशोधनंहितदाभवेत्
कुतोवलंनोपेक्षणीयमित्याशंकायामाह तदातस्यामवस्थायांशोधनं दुर्वलस्यापि दोषदुर्वलस्या
पिअव्यापत्तर्भवेत् छर्द्यादिव्याधिकृन्नभवतीत्यर्थः वलवतःपुरुषस्यस्वस्थानस्थितस्यशोधना
विधानेदोषमाहसुश्रुतः पक्वोऽप्यनिर्हृतोदोषोदेहेतिष्ठन्महात्ययं विषमंवाज्वरंकुर्य्याद्वलव्यापद १६

न्यंतेआध्मानंकुर्वंतिनविपच्यंतेसुखेननविपच्यंते दुःखंदत्वाविलंवेनविपच्यंतेइतियावत् अन्यच्च न
च्यवंतेनपच्यंतेकषायैःस्तंभितामलाः तिर्य्यग्विमार्गगास्तेचघोरंकुर्युर्नवज्वरे अनुपस्थितदोषाणां
वमनंतरुणज्वरे हृद्रोगंस्वासमानाहंमोहंचकुरुतेभृशं अयमर्थः कफादिदोषोपस्थितोस्वयमे
वचेद्भवतिवमनंनतद्दोषाय अनुपस्थितदोषाणांतुतरुणज्वरेवमनंयत्नकृतंहृद्रोगादीन्करोती
त्यर्थः एतेनवचनेनतरुणज्वरेयत्नकृतंवमनंनिषिद्धं अवस्थाविशेषेतदपिकर्तव्यमित्याह सद्यो
भुक्तस्यवाजातेज्वरेसंतर्प्पणोत्थिते वमनंवमनार्हस्यशस्तमित्याहवाग्भटः वमनंवेतिविकल्पो॰
लंघनापेक्षया वमनार्हस्येत्यनेनगर्भिण्य तिकृशातिवृद्धादिनिरासः वाग्भटोत्रवृद्धवाग्भटः वमि
तंलंघयेत्प्राज्ञोलंघितंनतुवामयेत् वमनंश्लेष्मवाहुल्यात्कृत्याल्लंघनकर्षितं नकार्य्यंगुर्विणीवालवृ
द्धदुर्वलभीरुभिः अनशनमितिशेषः अनेनवचनेनगुर्विण्यादीनांअनशननिषेधात् ज्वरेसामे॰
पाचनं निरामेशमनं पथ्यान्नमंडादिकंचदद्यात् पाचनसमनयोर्लक्षणमाह यत्पचत्याममाहारंप

कर्प्पूरोमुस्तंत्रायमानाचवालकं निंवंपुष्करमूलंचमधुयष्टीचवत्सकः यवानीन्द्रयवोभार्गीशिग्रुवीजंसुराष्ट्र
जी वचात्वक्पद्मकोशीरंचंदनातिविषावलाशालिपर्णीपृश्निपर्णीविडंगंतगरंतथा चित्रकंदेवकाष्ठंचचव्यं
पत्रंपटोलकं जीवकर्षभकौचैवलवंगंवंशलोचनापुण्डरीकंचकाकोलीपत्रकंजातिपत्रकं तालीसपत्रमे
तानिसमभागानिचूर्णयेत् अर्द्धंसर्वचूर्णस्यकिरातंप्रक्षिपेत्सुधीः एतत्सुदर्शनंनामचूर्णंदोषत्रयापहं
ज्वरांश्चनिखिलान्हन्यान्नात्रकार्य्याविचारणा पृथग्द्वन्द्वागन्तुजांश्चधातुस्थान्विषमांस्तथा सन्निपातोद्भवां
श्चापिमानसानपिनाशयेत् शीतादीनपिदाहादीन्मोहंतंद्रांभ्रमंतृषां कासंश्वासंचपांडुंचहृद्रोगंकामला
मपित्रिकपृष्ठकटीजानुपार्श्वशूलंचनाशयेत् शीतांबुनापिवेदेतत्सर्वज्वरनिवृत्तये सुदर्शनंयथाचक्रं
दानवानांविनाशनं तद्वज्ज्वराणांसर्वेषांचूर्णमेतत्प्रणाशनं पुष्करमूलालाभेकुष्ठमपिदद्यात् भार्ग्यभा
वेकंटकारीमूलं सौराष्ट्र्यभावेस्फटिकांदद्यात् तगरालाभेकुष्ठंदद्यात् जीवकर्षभयोरलाभेविदारी
कंदस्यभागद्वयंदद्यात् पुंडरीकंश्वेतकमलं काकोल्यलाभेऽश्वगंधामूलंदद्यात् तालीसपत्रकाला १७

भेस्वर्णतालीप्रदीयते इति अथवाकंटकारीजयदेया इतिसुदर्शनंचूर्णम् शटीनिंवाकृयंदारुशुंठी
पुष्करमूलकं एलागुडूचीकटुकापर्प्पटश्चयवासकः भार्गीकिराततिक्तंचदशमूलीतथैवच क्वाथमे
तत्पिवेत्सूक्ष्मसिंधुचूर्णयुतन्नरः ज्वरान्सर्वान्निहंतिनात्रकार्य्याविचारणा अमृतंममेतिहारी धातकीत्रि
रताद्द्दारकानांपृथग्भवेत् पलद्वयंकणाशुंठीगुडूचीगोक्षुरोदरी सहदेवीविडंगंचप्रत्येकंपलसंमि
तं मधुनावटिकांकृत्वाखादेज्ज्वरमपोहति कासंश्वासमलस्तंभंवह्निमांद्यंनियच्छति लाक्षादशाह्वाह्वश्च
स्णाघद्दास्सचंदनंलोहितचंदनंच त्वक्पत्रकंवारिमुरासमुस्ताप्रत्येकमेतानिपलोन्मितानि किराततिं
क्तत्रिवृतसतिक्तामृताकणापर्प्पटकंटकार्य्यः विडंगविश्वामलकान्निचैववासारसावीरणसिंदुवाराः ए
तानिदेयानिपृथक्पलार्द्धमानानिसर्वाणिचभैषजानि कल्कानमीषांविदधीतगव्यदुग्धेनवैसार्द्धतुला
मितेन तैलंतिलानांखुतुलाप्रमाणंतेनैवकल्केनशनैःपचेच्च हन्याज्ज्वरांस्तैलमिदंसमस्तान्कुर्य्याद्वलं
वीर्य्यमतीवपुष्टिं विमर्द्दनाद्दाशुपरिश्रमंभ्रमंशामंनयेत्संजनयेत्द्युतिंतनोः तथाप्यथामस्थिसमुद्भवा

मपिप्रहृत्यनिद्रांसमुपार्जयेत्सुखं अरुणामंजिष्ठा वारिवालं रसारास्ना लाक्षादितैलम् लाक्षारससमंतैलंतैला
म्मस्तुचतुर्गुणं अश्वगंधानिशादारुकौंतीकुष्ठद्वचंदनैः समूर्वारोहिणीरास्नाशताक्कामधुकैःसमैः सिद्धंलाक्षादि
कंनामतैलमभ्यंजनादिना सर्वज्वरक्षयोन्मादश्वासापस्मारवातनुत् यक्षरक्षःसमूतघ्नंगर्भिणीनांचशस्यते म
स्तुदधिजलम् कौंतीरेणुका चंदनमत्रश्वेतमेवनतुरक्तं रोहिणीकटुकी लाक्षादितैलं लाक्षाहरिद्रामंजिष्ठा
फेनिलंमधुकंवला लामज्जकंचंदनंचचंपकंनीलमुत्पलं प्रत्येकमेषांपलमुष्टीःपक्कातोयेचतुर्गुणे चतुर्भा
गावशेषेतुगर्भेचैतत्समावपेत् रेणुकापद्मकंचैववाजिगंधातथैवच श्वेतसंचोरकंकुष्ठंदेवदारुनखत्वचं श
तपुष्पापुंडरीकंमांसीमधुकमेवच एभिरर्द्धमितैःकल्कैःकषायेणैवपेषितैः मस्तुशुक्तारनालानामाढकाढ
कमावपेत् क्षीराढकसमायुक्तंतैलंप्रस्थंविपाचयेत् अभ्यंगात्तैलमेतद्धिशीघ्रंदाहमपोहति तथावातोर्ध्वं
चापिपित्तश्लेष्मलवंज्वरं सप्रलापंसतर्षंचतालुशोषभ्रमान्वितं ग्रहोपसृष्टयेबालारक्षःसंदूषितश्चये तेषां
कष्टंप्रशमयेत्तैलंलाक्षादिकंमहत् फेनिलं वदरं लामज्जकमुशीरवल्लीतज्जवितृणविशेषः लामज्जकंपद्मा १८

मेवच पक्कोलंघनतिक्ताम्बुपानपेयादिभिर्मत अनिर्हृतःअधोमार्गेणानुत्सृष्टः महात्ययंविषमज्वरंचा
तुर्थकं तस्यैवमहात्ययत्वादितिगदाधरः गंभीरमितिकार्त्तिकः महात्ययंमहाकष्टंवा बलव्यापदंच
क्षयं संशोधनमाह आरग्वधग्रंथिकमुस्ततिक्ताहरीतकीभिःक्वथितःकषायः सामेसशूलेक
फवातपित्तज्वरेहितोरेचनपाचनश्च आरग्वधधनवहेरा अन्यच्च पथ्यारग्वधतिक्तात्रिवृद्धामल
कैःसृतंतोयं पाचनसारकमुक्तंमुनिभिर्जीर्णज्वरेसामे आरोग्यपंचकक्वथं अनंतावालकंमुस्तंना
गरंकटुरोहिणीं पिबासुखांबुनाकल्कंपाययेदक्षसंमितं कल्कःस्वल्पेनकालेनहन्यात्सर्वज्वरा
नयं विदध्यात्कोष्टसंशुद्धिंदीपयेच्चहुताशनं अनंतासारिवा सारिवादिकल्कः शोधनंसंशमनंचये
षांनिषिद्धंतानाह पीतांबुर्लंघनक्षीणोऽजीर्णभुक्तंपिपासितः नपिबेद्दोषघ्नंजंतुःसंशोधनमथेत
रत् पीतांबुःपीततिक्तकांबुः भुक्तःभुक्तवानित्यर्थः अत्राध्यवसितादित्वात्कर्त्तरिक्तप्रत्ययः इतर
त् संसामनं त्रिफलारजनीयुग्मंकंटकारीयुगंसटी त्रिकटुग्रंथिकंमूर्वागुडूचीधन्वयासकः कटु

मुद्रफेनं हिंगुलं गंधं परिमर्द्दयामं नवज्वरे वल्लयुगं त्रिपुरत्र मार्द्रनिसायं ज्वरधूमकेतुः प्रक्रिया पारा
शुध गंधक हिंगूर समुद्रफेन समभाग सर्वेयाममेकं आर्द्रकरसेन संमर्द्य रक्तिकाषट्कमितमार्द्रकरसे
न दिनत्रयं नवज्वरी भक्षयेत् दिनत्रयान्नवज्वरो नश्येत ज्वरधूमकेतुः रसेंद्रचिंतामणौ शुद्धः सूतो विषो
गंधः प्रत्येकं शाणसंमितः धूर्तबीजं त्रिशाणं स्यात्सर्वेभ्यो द्विगुणं भवेत् हेमाह्वा कारयेदेषां चूर्णं सूक्ष्मं
प्रयत्नतः जंबीरजीरकैर्देयं चूर्णं गुंजाद्वयोन्मितं आर्द्रकस्य रसेनापि ज्वरं हंति त्रिदोषजं एकाहिकं
द्व्याहिकं च त्र्याहिकं च चतुर्थकं विषमं च ज्वरं हन्यान्नवं जीर्णं च सर्वथा महाज्वरांकुशो नाम्ना रसोऽयं
सर्वसंमतः प्रक्रिया पारा गंधक विष प्रत्येकं टंक १ धतूरबीज टंक ३ चोक टंक १२ सर्वेषां चूर्णं
मतिसूक्ष्मं कर्त्तव्यं महाज्वरांकुशः सर्वज्वरेषु शार्ङ्गधरे एको भागो रसस्यार्द्धो द्वौ लेयं पिप्पली शिवा
आकारकरभो गंधः कटुतैलेन शोधितः फलानि चेंद्रवारुण्याश्चतुर्भागमितान्यमी एकत्र मर्द्दयेच्चूर्णं
मिंद्रवारुणिकारसैः माषोन्मितां वटीं कृत्वा दद्यात्सद्यो ज्वरे बुधः छिन्नारसानुपाने [illegible] नवज्वरघ्नी १८

वटिका मता आकारकरभः अकरकरहा इति लोके चतुर्भागमिता अमी शेलेयादयः षट् समुदिता
भागचतुष्टयमिताः ज्वरघ्नीवटिका शार्ङ्गधरे रसं गंधं च दरदं जैपालं क्रमवर्द्धितं दंतीरसेन संपिष्य
वटी गुंजामिता कृता प्रभाते सितयार्द्रमरिचताम्रीतवारिणा एकेन दिवसेनेषा नवज्वरहरी भवेत्
ज्वरघ्नी वटी रसरत्नप्रदीपे रसो गंधो विषं शुंठी पिप्पली मरिचानि च पथ्याबिभीतके धात्री दंतीबीजं
च शोधितं चूर्णमेषां समांशानां द्रोणपुष्पीरसैः पुटेत् वटीं माषनिभां कुर्यात् भक्षयेन्नूतनेज्वरे नव
ज्वरहरी वटी इति नवज्वरे रसाः अथ सामान्यज्वरे रसाः शुद्धं सूतं विषं गंधं धूर्त्तबीजं त्रिभिः समं चू
र्णं द्विगुणं व्योषं चूर्णं गुंजाद्वयोन्मितं आर्द्रकस्य रसैः किं वा जंबीरस्य रसैर्युतं महाज्वरांकुशो नाम्ना
सर्वज्वरविनाशनः एकाहिकं द्व्याहिकं च त्र्याहिकं च चतुर्थकं विषमं च त्रिदोषं वा ज्वरं हंति न संश
यः प्रक्रिया शुद्धपारा विष गंधक प्रत्येकं टंक धतूरबीज टंक ३ सोंठ ४ पीपरि टंक ४ मरिच टंक ४ स
र्वेषामतिसूक्ष्मचूर्णं कर्त्तव्यं महाज्वरांकुशः सर्वज्वरेषु सर्वरसग्रंथेषु सूतं गंधं विषं चैव टंकणं च

मा·प्र· मनःशिला एतानि टंकमात्राणि मरिचं त्वष्टटंककं कटुत्रयं टंकषट्कं षल्वे क्षिप्त्वा विचूर्णयेत् रसः श्वा
२० सकुठारोयं श्वाससर्वज्वरापहः श्वासकुठारो रसः श्वासे सर्वज्वरे रसरत्नाकरे दारुमूखं शिखिग्रीवां
रसकं च पृथक् पृथक् टंकत्रयानुमानेन गृहीत्वा कनकद्रवैः मर्दयेत्त्रिदिनं कार्य्या वटी चणकमात्र
या मरिचैरेकविंशत्या सत्तमिस्तुलसीदलैः खादेद्वटीद्वयं पथ्यं दुग्धभक्तं सशर्करं तरुणं विषमं जीर्णं
हन्यात्सर्वज्वरं ध्रुवं दारुमूषा दारुमूसि शिखिग्रीवा तूति पारसकं षपरिआ प्रत्येकं टंक २ धत्तू
रपत्ररसेन मर्दयेत् सर्वज्वरे ज्वरांकुशः नागरं कर्षमात्रं स्यात् कर्षमात्रं च टंकणं मरिचं सार्द्धकर्षं
स्यात्तावद्दग्धवराटकं विषं कर्षचतुर्थांशं सर्वमेकत्र चूर्णयेत् रसोऽकृताशानीनाम्ना रसाद्यो गुंजा
मितो ज्वरे ऊतासनो रसो ज्वरे शुद्धं जैपालं टंकं च कट्टीटंकद्वयोन्मितं गैरिकं टंकमेकं च कुकन्या
नीरेण मर्दयेत् कलायसदृशी कार्य्या वटिका तां च भक्षयेत् शीतलेन जलेनैषा वटी जीर्णज्वरापः(
हा इति जीर्णज्वरघ्नी वटी क्षिप्ता गतालेन हतं तं च ताम्रं रसश्च गंधश्च समानमायुः विषं समं च द्विगुणं च ता २०

नस्या कुशीरं दीयते तद्वा चंपकमित्यस्य स्थाने कुत्रापि गैरिकमिति पाठः नीलोत्पलस्यालाभे तु कुमुदं(
यमिष्यसमाषयेत् प्रक्षिपेदित्यर्थः चोरकं ग्रंथिपर्णस्य नेदो ग्रंटिकरइति नेपालदेशे भवति तदलाभे(
ग्रंथिपर्णादेयं पुंडरीकं श्वेतकमलं शुक्लं संधानभेदः दधिमधुकांजिकं स्वकांचि मगाः स्युर्द्विगुणा
यथोत्तरमेतेत्रीणि दिवानिच धान्यसमूहे स्थापितमेतदिति हि शुक्लं आरनालमपि संधानभेदः महा
लाक्षादितैलं अथ नवज्वरे रसाः सूतगंधकं टंकणः सोषणश्चसर्वैस्तुल्या शार्करामत्स्यपित्तैः भूयो
भूयो मर्दयेत्त्रिरात्रं वल्लो देयः शृंगवेरद्रवेण तापे शीतं वीजनेस्तक्रभक्तं दंताकायं पथ्यमेतस्य
दिष्टं अन्हैवोग्रं हंति सद्योज्वरं तु पित्ताधिक्ये मूर्छितोयं च दद्यात् अस्य प्रक्रिया शरा शुद्ध भाग १
गंधक १ सुहागा १ मरिच १ शार्कराभा ४ रोहू मत्स्यका पित्त भा· ३ प्रतिदिन सर्वे दिनत्रयं मर्दयेत्
रसमिमं रक्तिकात्रयमितमार्द्रकरसेन दद्यात् ओदनं तक्रं हंताकफलं भोक्तुं दद्यात् व्यजना(
द्यैः शीतलमुपचारं कुर्य्यात् उदकमंजरीरसो नवज्वरेषु सर्वेषु रसरत्नप्रदीपे दद्यात्समं सूतस्

मृंत्रिशतरात्रे २१ एदिवाकरांशो विमर्द्यरिष्टस्वरसेनचूर्णं गुंजैकमद्य सितयासमेतं ज्वरांकुशोऽयं इविषुं
दरात्मोज्वरान्निहंत्यष्टविधान्समस्तान् प्रक्रिया पारा गंधक विष प्रत्येकं टंक १ द्विगुण तालहतंता
म्रं टंक २ रोहूमत्स्यकोपित्तासव एकत्र षद्धकरैज वचूर्णहाइ कै मिलि जाई त वनीवकेपत्रकोरसते
हिमासावना २१ घामेमादेचमात्रा रत्ती एक १ अनोपान सपेदजा कराररतीर ज्वरेरविमुन्द एरख्योरसः
शुद्धंसूतं तथा गंधं खल्वेतावद्विमर्दयेत् सूतंनद्दत्रपतेयावत्किंचुकज्जलवज्रवेत् एषाकज्जलिका
स्यातांहणीवीर्यवर्द्धिनी नानानुपानयोगेनसर्वव्याधिविनाशिनी कज्जलिकाविधानं तद्गुण
श्चरसरत्नप्रदीपे जयापत्ररसेनाथवर्द्धमानरसेनच भृंगराजरसेनापि काकमाच्यारसेनच रसंसं
शोध्ययत्नेनतत्समंशोधयेद्बलि भृंगराजरसैः पिष्ट्वाशोषयेदर्करश्मिभिः सप्तधावात्रिधावापिप
श्चाच्चूर्णंतुकारयेत् चूर्णयित्वासमंतेनरसेनसहमर्दयेत् नष्टसूतंयदाचूर्णंभवेत्कज्जलसंनिभं
निर्धूमेवदरांगारेद्रवीकुर्य्यात्प्रयत्नतः तत्रतंमहिषीविष्टास्थापितेकदलीदले निःक्षिप्यतदुप

ऐरंडपत्रं दत्वा प्रपीडयेत् शीतलां तां ततः पत्रात्समुद्धृत्य विचूर्णयेत् एवं सिद्धा भवेद्व्याधिघातिनी र
सपर्पटी ज्वरादिव्याधिनिर्मुक्तं विश्वं दृष्ट्वा पुरा हरः चकार कृपया युक्तः सुधावद्रसपर्पटीं रक्तिका
संमितां तावद्भृष्टजीरकसंयुतां गुंजार्द्धभृष्टहिंग्वाक्तां भक्षयेद्रसपर्पटीं रोगानुरूपभैषज्यैरर्पितां भक्ष
येद्बुधः पिबेत्तदनुपानीयं शीतलं चुलुकत्रयं प्रत्यहं वर्द्धयेत्तस्या एकैकां रक्तिकां भिषक् नाधिकां
दशगुंजातो भक्षयेत्तां कदाचन एकादश्यादिनारंभात्तास्तथैवापकर्षयेत् एवमेतां समश्नीयान्नरो वि
शतिवासरान् शिवं गुरुं तथा विप्रान्पूजयित्वा प्रणम्य च श्रद्धया भक्षयेदेतां क्षीरमांसरसाशनः ज्व
रांश्च ग्रहणीं चापि तथातीसारमेव च कामलां पांडुरोगं च शूलं प्लीहजलोदरं एवमादीनामयान्हत्वा दृ
ढः पुष्टश्च वीर्यवान् जीवेद्वर्षशतं साग्रं वलीपलितवर्जितः रसपर्पटी अथ ज्वरिणोन्नदानसम
यः तत्र चरकः क्षुत्संभवति पक्वेषु रसदोषमलेषु च काले वा यदि वाकाले सोऽन्नकाल उदाहृतः
अन्यच्च आमे पाकं गते नृणां यदा भोजनलालसा भवेत्काले ह्यकाले वा सोऽन्नकाल उदाहृतः वृन्द

निःसंशयं हंत्यचिरात्स रोगान् ज्वराभिभूतः वातज्वराभिभूतः विपक्वदोषैः पक्ववातः कृतलंघनादिः आ
दिग्रहणात् कृतपक्वजलपाननिर्वातगृहवासगुरूष्णवसनधारणादिः भेषजमित्यन्नस्याप्युपलक्षणं
अतएव चरकः ज्वरितं षडहेऽतीते लघ्वन्नप्रतिभोजितं पाचनं शमनीयं वा कषायं पाययेज्ज्वरितमिति
ज्वरितं वातज्वरिणं षडहेऽतीते इत्युपलक्षणं पित्तज्वरिणं दशाहेऽतीते श्लेष्मज्वरिणं द्वादशाहेऽतीते।
लघ्वन्नं भोजितं ज्वरिणं पाचनं शमनीयं कषायं पाययेत् पुनः स एव सर्वज्वरेषु ज्वरितं दिनांते भोजयेत्
लघु दिनांते अन्नग्रहणेऽत्र मध्यवाची तेन त्रिधा विभक्तस्य दिवसस्य मध्यभागे पित्तप्राधान्यसमये उक्तं
च वाग्भटेन वयोऽहोरात्रिभुक्तानां तेऽतमध्यादिगाः क्रमात् इति ते वातपित्तश्लेष्माणः पित्तकालेऽपि म
ध्याह्नादर्वाक् यतआह याममध्ये न भोक्तव्यं यामयुग्मं न लंघयेत् याममध्ये रसोत्पत्तिर्यामयुग्मा
द्बलक्षय इति एतत्त्वस्यपरमितिचेन्न यतआह श्लेष्मक्षये प्रवृद्धोष्मा बलवाननलस्तदा वेगा
पायेऽन्यथा तद्धि ज्वरवेगाभिवर्द्धनं तदापि तत्प्राधान्यसमये अन्यथा उक्तसमयादन्यदा वेगापाये २२

जठराग्निवेगनाशे ततभोजनं ज्वरवेगाभिवर्द्धनं भवतीत्यर्थः अथ विषमज्वरिणेऽन्नं दातुं कालविशे
षमाह चरकः सर्वज्वरेषु सप्ताहं मात्रावल्लघु भोजयेत् वेगापायेऽन्यथा तद्धि ज्वरवेगाभिवर्द्धनं सर्वज्व
रेषु सर्वविषमज्वरेषु वेगापाये ज्वरवेगापाये भोजयेत् अन्यथा ज्वरवेगापायं विना तद्भोजनं ज्वरवे
गाभिवर्द्धनं भवतीत्यर्थः अथान्नग्रहणाय स्थानमाह आहारनिर्हारविहारयोगाः सदैव सद्भिर्विज
ने विधेया इति अत्यबलस्य ज्वरितस्य भोजनार्थोपवेशनप्रकारमाह सुश्रुतः ज्वरे प्रमेहे भवति स्व
ल्पेऽपि विविक्तेः शिशिसं भोजयेत्तस्मान्मूत्रोच्चारौ च कारयेत् निषण्णं यथा स्थानस्थितमेव न तु
स्थानांतरं नीतं अन्नग्रहणसमये प्रथमं ज्वरितेन कवलः कर्त्तव्य इत्याह यथादोषोचितैर्द्रव्यैः क
र्त्तव्यः कवलग्रहः अरोचकास्यवैरस्यमलपूतिप्रसेकहृत् भृष्टजीरकचूर्णेन सिंधुजन्मयुतेन च
जिह्वां दंतान् मुखस्यांतर्घृष्ट्वा कवलमाचरेत् मुखे मलं विगंधित्वं विरसत्वं च नश्यति मनः प्रसन्नं भ
वति भोजने तिरुचिर्भवेत् ज्वरितो हितमश्नीयाद्यद्यप्यस्यारुचिर्भवेत् अन्नकाले ह्यभुंजानः क्षीय

मा·प्र·
२३

तेम्रियतेपिच अयमर्थः यद्यप्यस्यज्वरितस्यहितेभक्ष्येअरुचिर्भवेत् तथापिज्वरितोहितमेवाश्नी
यात्इतिनियमः यतआहसुश्रुतः गुर्वभिष्यंद्यकालेचज्वरीनाद्यात्कथंचन ननुतस्यहितंदुःखमा
युषेवासुखायच अन्नद्वेष्टिमितैर्दोषैर्यावंतंकालमातुरः तावत्कालंसलब्ध्वान्नमश्नीयात्सुविरिक्त
वत् आनद्धःस्तिमितैर्दोषैः अपक्वैर्दोषैर्व्याप्तः ननुहितेवस्तुनिकथमरुचिःस्यादित्याह सांतत्या
निरंतरत्वात्क्षमावाच्चपथ्यंद्वेष्यत्वमागतमिति सांतत्यात् एकस्यैवभक्ष्यस्यसर्वदोपयोगात्क्षा
क्षमावाच्चभक्ष्यांतरादपिविरक्तत्वात् अतः पथ्यमप्रियंस्यात्तथापितदेवपथ्यंकल्पनाविधिभिस्तैस्तैःप्रि
यत्वंगमयेत्पुनरिति अथचज्वरितोन्नकालेअश्नीयादेवेतिद्वितीयोनियमः कुतइतिचेत्म्रियतेहेतोः
अभुंजानःक्षीयतेपक्वधातुर्भवतिततः। म्रियतेपिचज्वरितायहितान्यन्नादीन्याह रक्तशाल्यादयः।
शस्ताःपुराणाःषष्टिकैःसह यवान्नौदनलाजार्थ्येज्वरितानांज्वरापहाः तत्ररक्तशालिगुणाः रक्त
शालिर्वरस्तेषांबल्योवर्ण्यस्त्रिदोषजित् चक्षुष्योमूत्रलःस्वर्यःशुक्रलःतृड्ज्वरापहः विषव्रण २३

कालमाह ज्वरस्यपाकावस्थान्नदानकालः ज्वरस्यपाककालश्च वातिकःसप्तरात्रेणदशरात्रेणपै
त्तिकः कफजोद्वादशाहेनज्वरःपाकमुपैतिहि ज्वरस्यपाकउपशमः ज्वरपाकेनैवरसपाकोदो
षपाकोपिकथितः यतोदोषपाकंविनाज्वरपाकोनभवति रसपाकंविनादोषपाकश्चनभवति
ननुयथापैत्तिकोज्वरोदशाहोरात्रेणपाकंयाति एकादशेदिनेन्नंदीयते तथाकफजोज्वरोद्वाद
शाहोरात्रेणपाकंयाति त्रयोदशेदिवसेन्नंदीयते यथावातिकोपिज्वरःसप्ताहोरात्रेणपाकं
याति अष्टमेदिवसेअन्नंकथंनदीयते कथंसप्तमेदिवसेन्नंदीयतेइति उच्यते कफपित्ते
द्रवेधात्सहेतेलंघनंबहु आमत्वात्रूक्षमपिवायुर्नसहतेक्षणं इतिवचनात्सप्तमरसपाकोयाति
आहारलाभंविनावायुःक्षणमपिसोढुंनशक्नोतिसच आशुकारित्वात्क्षणाद्दाहपकादीन्वि
करान्संजनयति अतोवातिकेज्वरपाकदिनानामंतिमेसप्तमएवदिनेन्नंदीयते तथाचध
न्वंतरिः ज्वरंनिर्हृत्यषडहेप्यतीते विपक्वदोषःकृतलंघनादिः योन्नेष्वजंरवादतिवैद्यकल्पे।

कासश्वासकफानिलान् हंतिहिक्काश्मरीशुक्रदृशानाहान्सपीनसान् स्वेदसंग्राहकोमेदोज्वरकृमिहरःसरः
अथमकुष्ठगुणाः मकुष्ठोवातलोग्राहीकफपित्तहरोलघुः वांतिजितमधुरःपाकेकृमिकृज्वरनाशनः पटो
लपत्रंवार्त्ताकंकुलत्थंकारवेल्लकं कर्कोटकंपर्प्पटकंगोजिह्वांबालमूलकं पत्रंगुडूच्याःशाकार्थेज्वरि
तानांप्रदापयेत् तत्रपटोलफलगुणाः पटोलंपाचनंहृद्यंवृष्यंलघ्वग्निदीपनं स्निग्धोष्णंहंतिकासास्रज्व
रदोषत्रयकृमीन् पटोलपत्रगुणाः पटोलपत्रंपित्तघ्नंदीपनंपाचनंलघु स्निग्धंवृष्यंतथोष्णंचज्वरका
सकृमिप्रणुत् वार्त्ताकगुणाः वृंताकंस्वादुतीक्ष्णोष्णंकटुपाकमपित्तलं ज्वरवातबलासघ्नंदीपनंशुक्र
लंलघु तद्बालंकफपित्तघ्नंवृद्धंपित्तकरंगुरु वृंताकंपित्तलंकिंचिदंगारपरिपाचितं कफमेदोनिलामघ्न
मत्यर्थंलघुदीपनं करेलाकरेलीगुणाः कारवेल्लंहिमंभेदिलघुतिक्तमवातलं ज्वरपित्तकफास्रघ्नंपांडु
मेहकृमीन्हरेत् तद्गुणाकारवेल्लीस्याद्विशेषाद्दीपनीलघुः खेक्सागुणाः कर्कोटकफलंकुष्ठहृल्लासारु
चिनाशनं श्वासकासज्वरहरंदीपनंपाचनंलघु दवनपापरागुणाः पर्प्पटोहंतिपित्तास्रज्वरतृष्णाकफ २४

भ्रमान् संग्राहीशीतलस्तिक्तोदाहनुद्वातलोलघुः गोजिह्वागुणाः गोजिह्वाकुष्ठमेहास्रकृच्छ्रज्वरहरीलघुः
मूलकगुणाः मूलकंबालकंरुच्यंस्वर्य्यंलिंपाचनंलघु दोषत्रयज्वरश्वासनासाकंठाक्षिरोगनुत् महत्त
देवरूक्षोष्णंगुरुदोषत्रयप्रदं स्नेहसिद्धंतदेवस्याद्दोषत्रयविनाशनं अथगुडूचीपत्रगुणाः गुडूची
पत्रमाग्नेयंसर्वज्वरहरंलघु कषायंकटुतिक्तंचस्वादुपाकंरसायनं बल्यमुष्णंचसंग्राहीहन्याद्दोषत्र
यंतृषां दाहप्रमेहवातास्रकामलांकुष्ठपांडुताम् इतिगुडूचीपत्रशाकगुणाः लावान्कपिंजलानेणा
न्हरिणान्पृषतान्शशान् कुरंगान्कालपुच्छांश्चतथैवमृगमातृकान् मांसार्थेमांससात्म्यानांज्वरिता
नांप्रदापयेत् सारसक्रौंचशिखिनस्तथातित्तिरिकुक्कुटान् गुरूष्णत्वान्नशंसंतिकेचिदेवंव्यवस्थिताः
तित्तिरिस्तुकृष्णतित्तिरिः गौरतित्तिरिःकपिंजलपदेनपूर्वंगृहीतत्वात् ज्वरितानांप्रकोपंतुयदायातिस
मीरणः तदैतेपिहिताःस्युस्तेमात्राकालोपपादिताः कपिंजलइतिख्यातोलोकेषुगौरतित्तिरिः एणःकृ
ष्णमृगोमतः हरिणस्ताम्रवर्णःस्यात्पृषतश्चित्रबिंदुःस्यात् चीतलइतिलोके कुरंगस्ताम्रवर्णःस्याद्धरि

एणाकृतिकोमहान् कालपुच्छोमृगविशेषः स्वल्पःपृषतस्तेयः शशानोमृगमातृकः अथलावागुणाः लावा
विष्किरवर्गेस्युस्तेचतुर्धाबुधैर्मताः पांशुलोगौरकोन्यश्चपौंड्रकोदर्भरस्तथा लावावह्निकराःस्निग्धाज्वरघ्नाश्चहि
ताहिमाः पांशुलश्लेष्मलस्तेषांवीर्योष्णोऽनिलनाशनः गौरोलघुतरोरूक्षोवह्निकारीत्रिदोषजित् पौंड्रकःपि
त्तकृत्किंचिल्लघुर्वातकफापहः दर्भरोरक्तपित्तघ्नोहृद्यामयहरोहिमः अथतित्तिरिस्वरूपगुणाः तित्तिरिर्वर्णदो
ग्राहीहिक्कादोषत्रयापहः श्वासकासज्वरहरस्तस्माच्छ्रेष्ठोऽधिकोगुणैः कृष्णमृगगुणाः एणोऽनिलकफध्वंसी
किंचित्पित्तकरोलघुः उष्णोग्राहीरसेस्वादुर्वल्योज्वरहरःस्मृतः हरिणगुणाः हरिणःशीतलोबद्धविण्मू
त्रोदीपनोलघुः रसेपाकेचमधुरःसुगंधिःसन्निपातहा अथचीतरीगुणाः पृषतस्तुभवेत्स्वादुर्ग्राहकःशीत
लोलघुः दीपनोरोचनःश्वासज्वरदोषत्रयास्रजित् शशगुणाः शशःशीतोलघुर्ग्राहीरूक्षःस्वादुःसदाहि
तः वह्निकृत्कफपित्तघ्नोवातसाधारणःस्मृतः ज्वरातीसारशोषास्रश्वासनाशकरश्शशः कुरंगगुणाः
हरिणस्यगुणैस्तुल्यःकुरंगःकथितोबुधैः कालपुच्छगुणाः गुणैरेणसमःकालपुच्छोमुनिभिरीरितः अथ २५

श्वासकासदाहनुद्वह्निपुष्टिदः तस्मादल्पांतरगुणाःशालयोमहदादयः रक्तशालिर्योमगधदेशेदाउदखा
नी इतिप्रसिद्धः अथषष्टिकानांगुणाः षष्टिकामधुराःशीतालघवोबद्धवर्चसः वातपित्तप्रशमनाःशा
लीनांसदृशागुणैः तत्रशावीगुणाः षष्टिकाप्रवरातेषांलघ्वीस्निग्धात्रिदोषजित् स्वाद्वीमृद्वीग्राहिणी
चवलदाज्वरहारिणी रक्तशालिगुणैस्तुल्याततःस्वल्पगुणाःपरे मुद्गान्मसूरांश्चणकान्कुलत्था
न्समकुष्ठकान् यूषार्थेयूषसात्म्यानांज्वरितानांप्रदापयेत् तत्रमुद्गगुणाः मुद्गोरूक्षोलघुर्ग्राहीकफ
पित्तहरोहिमः स्वादुरल्पानिलोनेत्र्योज्वरहृद्घ्नस्तथा कृष्णमुद्गोमहामुद्गोगौरोहरितपीतको श्वे
तोरक्तश्चनिर्दिष्टालघवःपूर्वपूर्वतः सुश्रुतेनपुनःप्रोक्तःप्रधानोहरितोगुणैः हरितःप्रवरस्तेषांक
थितश्चरकादिभिः अथमसूरगुणाः मसूरोमधुरःपाकेसंग्राहीशीतलोलघुः कफपित्तास्रजिद्रूक्षोवा
तलोज्वरनाशनः अथचणकाः चणकःशीतलोरूक्षःपित्तरक्तकफापहः लघुःकषायोविष्टंभीवात
लोज्वरनाशनः अथकुलत्थगुणाः कुलत्थःकटुकःपाकेकषायःपित्तरक्तकृत् लघुर्विदाहीवीर्योष्णः

मृगमातृकगुणाः गुणैःशशेनसदृशोगदितोमृगमातृकः निंबूकंदाडिमंधात्रीफलमम्लंप्रकांक्षते प्रदद्याद।
म्लसात्म्यायकांजिकंवायुरातनं प्रसंगान्निंबुकस्यगुणाः निंबुकंकृमिसमूहनाशनंतीक्ष्णमम्लमुदरग्रहा
पहं वातपित्तकफशूलिनेहितंकष्टरुच्यरोचनंपरं त्रिदोषवह्निक्षयवातरोगनिपीडितानांविषविक्लवा।
नां मलग्रहेवद्धगुदेप्रदेयंविशूचिकायांमुनयोवदंति अथान्नसाधनप्रक्रियामाह तत्रमंडस्यलक्षणं
विधिर्गुणाश्च तंडुलानांसुसिक्तानांचतुर्दशगुणेजले रसःसिक्थैर्विरहितोमंडइत्यभिधीयते शुंठीसैंधव
संयुक्तोदीपनःपाचनश्चसः अन्नस्यसम्यक्सिद्धात्रज्ञेयामंडस्यसिक्तता पेयायूषयवागूनांविलेपीभक्त
योरपि मंडोग्राहीलघुःशीतोदीपनोधातुसाम्यकृत् ज्वरघ्नस्तर्प्पणोबल्यःपित्तश्लेष्मश्रमापहः अथपे
यायाविधिर्गुणाश्च चतुर्दशगुणेनीरेसिक्थाशाल्यादिभिःकृता द्रवाधिकास्वल्पसिक्थापेयाप्रोक्ताभिषा।
ग्वरैः सातिलघ्वीग्राहिणीचधातुपुष्टिविधायिनी तृड्ज्वरानिलदोर्बल्यकुक्षिरोगविनाशिनी स्वेदाग्नि।
जननीज्ञेयावातवर्चोनुलोमनी शुंठीसैंधवसंयुक्तादीपनीपाचनीचसा आमशूलहरीसत्यास्याविबंध

विनाग्निनी अथप्रमथ्यायाविधिर्गुणाश्च प्रमथ्याप्रोच्यतेद्रव्यपलात्कल्कीकृताच्छृतात तोयेऽष्टगुणितेतस्याः
पानमाहुःपलद्वयं द्रव्यंपाच्यद्रव्यंतस्याःपलद्वयशेषायाः गुणैःप्रमथ्यापेयावत्ततोलघ्वीविशेषतः अथयू
षस्यविधिर्गुणाश्च अष्टादशगुणेनीरेशिंबीधान्यशृतोरसः विरलाच्छोघनःकिंचित्पेयातोयूषउच्यते उक्तः
सएवनिर्यूहोस्तविरूच्चविशेषतः यूषस्यप्रकारांतरमाह कल्कद्रव्यंपलंशुंठीपिप्पलीचार्द्धकार्षिकी
वारिप्रस्थेनविपचेत्तद्द्रवोयूषउच्यते अथमर्थः यूषार्थंपलमितंतत्कल्कीकृतं शुंठीपिप्पलीचस
मुदितार्द्धकर्षमिताकल्कीकृता अनयमपिप्रस्थमितेनवारिणापचेत तद्द्रवोयूषः यूषोवल्योलघुः
पाकेस्वल्पःकराम्यःकफापहः अथमुद्गयूषविधिः वृंदटीकायांतत्रांतरे मुद्गानांक्षिपलंतोयेष्टगु
मष्टभागकोल्कितेपादस्थंमर्द्दितंपूतंदाडिमस्यपलेनतत युक्तंसैंधवविस्वार्कधान्यकैः।पादकार्षिकैः
कणाजीरकयोश्चूर्णैश्चाणेकेनावचूर्णितं संस्कृतोमुद्गयूषोऽयंपित्तश्लेष्महरोमतः अथमुद्गयूषगुणाः
मुद्गानांयुक्तमोयूषोदीपनःशीतलोलघुः वर्ण्योर्द्धजत्रुरुग्दाहकफपित्तज्वरास्त्रजित अथमुद्गामलकयू २६

षगुणाः मुद्गामलकयूषस्तुभेदीपित्तानिलापहः तृड्दाहघ्नामनःशीतोमूर्छाश्रममदापहः अथमसूर
यूषगुणाः मसूरयूषःसंग्राहीबृंहीस्वादुःप्रमेहनुत अथयवाग्वादिविधिर्गुणाश्च यवागूःषड्गुणेतो
येसंसिद्धाघनसिक्थिका पृथक्द्रवैस्तुविरलैःसंयुक्ताज्वरिणेहिता यवागूर्दीपनीलघ्वीतर्पणीब
स्तिशोधिनी श्रमघ्नानिहरीपथ्याज्वरस्यैवातिसारके अथविलेप्याविधिर्गुणाश्च चतुर्गुणेतुसं
सिद्धाविलेपीघनसिक्थिका पृथक्द्रवेणरहिताख्याताशिथिलभक्तिका संसिक्ताअतीवसि
क्ता विलेपीमिलहम्यीइतिलोके विलेपीदीपनीबल्याहृद्यासंग्राहिणीलघुः व्रणाक्षिरोगिणां
पथ्यातर्प्पणीतृड्ज्वरापहा अथभक्तस्यविधिर्गुणाश्च जलेचतुर्दशगुणेतंडुलानांचतुःपलं वि
पचेत्स्रावयेन्मण्डंतद्भक्तंमधुरंलघु चक्रदत्तस्तु अन्नंपंचगुणेतोयेयवागूःषड्गुणेपचेदिति
अत्रान्नंभक्तं तथाच भिस्सास्त्रीभक्तमंधोन्नमोदनोस्त्रीसदीदिविरित्यमरः भक्तंवन्हिकरंपथ्यंत
र्प्पणंमूत्रलंलघु सुधौतंप्रस्रुतंचोष्णंविशदंगुणवत्तरम् अधौतमस्रुतंशीतंगुर्वरुच्यंकफप्रदं

अत्युष्णंवलहृत्कंशीतंशुष्कंचदुर्जरं अतिक्लिन्नंग्लानिकरंदुर्जरंतंडुलान्वितं अतिक्लिन्नंसजलंयत्पर्युषि
तं भृष्टतंडुलजंस्वच्छंसुगंधिकफहृल्लघु वांतास्यापितमंदाग्निविरिक्तानांप्रशस्यते अथरसौदनविधिः वृंद
टीकायांतंत्रांतरे मांसलंसक्थिजंमांसंतथानस्थिचतैस्त्रिरैः चतुःपलोन्मितंसूक्ष्मंकल्पितंक्षालितंजले
पिप्पलीपिप्पलीमूलंशुंठीजीरकधान्यकैः द्विशाणैःसंयुतैस्तोयेकाथ्यमर्द्धाढकोन्मिते पादस्थितेज
लेतत्रदाडिमात्कुटितान्नयेत तंरसंमर्दितंसम्यकहिंगुसैंधवजीरकैः संयुक्तंधूपितंपथ्यंशुक्लानांशु
द्धिकांक्षिणाम अथरसौदनगुणाः रसौदनोगुरुर्हृष्योवल्योवातज्वरापहः केवलजलसाध्यान्मंडा
दीनभिधायौषधसाध्यानांप्रक्रियामाह साध्यंचतुष्पलंद्रव्यंचतुःषष्टिपलेंबुनि तत्काथेनार्द्धसि
द्धेनमंडपेयादिसाधयेत रक्तवैद्याःपलंद्रव्यंग्राहयंत्यावकेंभसि भेषजस्यातिवाहुल्यात्कदाचि
दरुचिर्भवेत यैरन्नैरौषधैर्यैश्चकृतामंडादयोवुधैः विचार्यतद्गुणानेतांस्तद्गुणानेवनिर्द्दिशेत
अथौषधसिद्धायाःपेयायागुणाः अन्नकालेहितापेयायथास्वंपाचनैःकृता दीपनीपाचनी

लघ्वीज्वरान्ननिज्वरापहा यथास्वंपाचनैःकृता यथादोषंपाचनैःकृता यथा पंचमूल्याःकषायं
तुपाचनंवातिकेज्वरे सद्योऽयंपैत्तिकेमुस्ताकटुकेंद्रयवैःकृतं पिप्पल्यादिकषायंतुपाचनंकफ
जेज्वरे लघुनापंचमूलेनपिप्पल्यासहधान्यया महत्यापंचमूल्याथव्याघ्रीकुःस्पर्शगोक्षुरैः
सिद्धानिनिमिषगन्नानिप्रयुंजीतयथाक्रमं वातपित्तेश्लेष्मपित्तेकफवातेत्रिदोषजे अयमर्थः वा
तपित्तेलघुनापंचमूलेनसिद्धान्यन्नानिनिमिषकप्रयुंजीत शालिपर्णीपृष्टिपर्णीकंटकारीद्वयंतथा
गोक्षुरःपंचमःप्रोक्तः पंचमूलमिदंलघु श्लेष्मपित्तेपिप्पल्यासहधान्यया कफवातेमहत्यापंच
मूल्या श्रीफलःसर्वतोभद्रापाटलागणिकारिका श्योनाकःपंचमःप्रोक्तःपंचमूलमिदंमहत
त्रिदोषजेव्याघ्रीकुःस्पर्शगोक्षुरैः पेयांवारक्तशालीनांवस्तिपार्श्वशिरोरुजिश्वदंष्ट्राकंटकारीभ्यां
सिद्धांज्वरहरींपिवेत विवद्धवर्चाःसयवांपिप्पल्यामलकैःशृतां सर्पिष्मतींपिवेत्पेयांज्वरीदोषा
नुलोमनीं कासीश्वासीचहिक्कीचपंचमूलीशृतांपिवेत यवोऽस्वान्नं अत्रपंचमूलीवृहतीलघ्वी.

चहिता तयासहतांपेयांपिबेदित्यर्थः पेयाभेषजसंयोगाल्लघुत्वाच्चाग्निदीपिकावातमूत्रपुरीषाणां
दोषाणांचानुलोमिका स्वेदनायचसोष्णत्वाद्द्रवत्वात्तृट्छ्रमायच आहारभावात्प्राणायसरत्वाल्ला
घवायच ज्वरघ्नीहेतुसात्म्यत्वात्तस्मात्तांपूर्वमाचरेत् हेतुसात्म्यत्वात् हेतवोवातपित्तकफास्ते
षांसात्म्यत्वात् यवकोलकुलत्थानांमुद्गमूलकत्र्यूषणयोः एकैकंमुष्टिमादायपचेदष्टगुणेज
ले पंचमुष्टिकइत्येषवातपित्तकफापहः शूलिप्रशस्यतेगुल्मेकासेश्वासेक्षयेज्वरे पंचमुष्टि
कयूषः रुद्धमूत्रपुरीषस्यगुदेवर्तिंनिधापयेत् पिप्पलीपिप्पलीमूलयवानीचव्यसाधितां पा
ययेतयवागूंवामारुताद्यनुलोमनीं पेयायायवाग्वाश्चक्वचिदपवादमाह मद्यात्ययेमद्यनित्ये
ग्रीष्मेपित्तकफोत्थिते ऊर्ध्वगेरक्तपित्तेचयवागूर्नहिताज्वरे दाहछर्द्यर्दितंक्षामंनिरन्नंतृष्णया
न्वितं शर्करामधुसंयुक्तंपाययेल्लाजतर्प्पणं लाजतर्प्पणंलाजसक्तुरूपंतर्प्पणं तथाच दाहछ
र्द्दितंक्षामंनिरन्नंतृष्णयान्वितं घर्मार्त्तंमद्यपंचापितोयालोडितसक्तुकं शर्करामधुसंयुक्तंपायये २८

लाजतर्प्पणम् ज्वरापहैःफलरसैर्युक्तमन्नंहितंक्वचित् संतर्प्पणस्वरूपंचाहधन्वंतरिः द्राक्षादाम
खर्जूरमृदितांबुसशार्करं लाजाचूर्णसमध्वाज्यंसंतर्प्पणमुदाहृतं लाजचूर्णद्राक्षादिजलशार्कराम
ध्वाज्यसहितंतर्प्पणमुक्तमित्यर्थः लाजसक्तुगुणाश्चगुणाग्रंथे लाजानांसक्तवःक्षौद्रसितायुक्ताविशे
षतः छर्द्यतीसारतृड्दाहविषमूर्छाज्वरापहाः चरकश्च तत्रतर्प्पणमेवादौप्रदेयंलाजसक्तुभिः
ज्वरापहैःफलरसैर्युक्तंसमधुशार्करं ज्वरघ्नानिफलान्याहचरकएव द्राक्षादाडिमखर्जूरप्रिया
लैःसपरूषकैः तर्प्पणार्हस्यदातव्यंतर्प्पणंज्वरशांतये प्रियालमत्रपक्वंफलंनतन्मज्जातिगुरुत्वा
त् तर्प्पणार्हस्यदाहछर्दितृषार्त्तस्यलंघितस्यक्षीणस्येत्यर्थः श्रमोपवासानिलजेहितोनित्यंरसौदनः
रसोऽत्रमांसरसःतेनसिक्तश्चौदनोरसौदनः अन्नेनव्यंजनमित्यनेनसमासः मुद्गयूषौदनश्चैवहि
तःकफसमुत्थिते सएवसितयायुक्तःशीतःपित्तज्वरेहितः सएवमुद्गयूषौदनएव रूक्षोल्पदो
षोयःक्षीणकफोजीर्णज्वरान्वितः विबंधामश्चदोषश्चस्रुहृतःपित्तानिलज्वरी पिपासार्त्तःसदाहश्चपय

भा·प्र· ससमुरवीर्भवेत् अन्यच्च अजाकुंधगुडूच्योयेतं पातव्यं ज्वरघ्नं तये जीर्णज्वरे कफे(णेक्षी)क्षीरं स्यादमृतोपमं
२९ तदेवतुपयःपीतंतरुणेहंतिमानवं तरुणेज्वरे अन्यच्च जीर्णज्वरे कफे क्षीणे क्षीरं स्यादमृतोपमं तदे
वतरुणे पीतं विषवद्धंति मानवं अथज्वरिणो नियमानाह नक्षिरद्यान्नपूर्वाह्णे नाभिष्यंदि कदाचन
नतीक्ष्णं नागुरुप्रायं भुंजीत तरुणज्वरी नजातु तर्प्पयेत्प्राज्ञः सहसा ज्वरकर्षितं तेनसंशमितोप्यस्य
पुनरेव भवेज्ज्वरः अथज्वरविमुक्तेः पूर्वरूपमाह दाहः स्वेदो भ्रमस्तृष्णा कंपविड्भेदसंज्ञताः कू
जनं चातिवेगं ध्यमाकृतिर्ज्वरमोक्षणे विड्भितमलप्रवृत्तिः अथसंपदादित्वाज्ञावेक्विप् कूजनं कु
यनं अतिवेगं ध्यंगात्रस्य ज्वरमुक्तो नविष्पंत्यामेतल्लक्षणं भवति ननु दोषक्षयं विनान व्याधिनि
वृत्तिः क्षीणश्च दोषः कथमेवं विधं रूपं करिष्यति उच्यते कश्चित्क्षीणोपि विनाशकाले स्वब्रा
क्तिं दर्शयति यथा निर्वाणावस्थायां दीपो विशेषात्प्रज्वलति वाग्भटोप्याह धातून्प्रक्षोभयन्दो
षो मोक्षकाले विलीयते ततो नरः श्वसन् कूजन् वमन् स्विद्यन्नचेष्टत इति नचेष्टते अचेष्टश्वस्या २९

त त्रिदोषजेज्वरेह्येतदंतर्वेगेचधातुगे लक्षणंमोक्षकालेस्यादन्यस्मिन्स्वेददर्शनं एतद्व्याहादि
कंलक्षणंमोक्षकालेएतेष्वेवज्वरेषुस्यात् केषुत्रिदोषजेअंतर्वेगेधातुगेज्वरेअन्यस्मिन्स्वेदमा
त्रदर्शनंभवति अथज्वरमुक्तस्यलक्षणमाह देहोलघुर्व्यपगतक्लममोहतापःपाकोमुखेक
रणसौष्ठवमव्यथत्वं स्वेदःक्षवःप्रकृतियोगिमनोन्नलिप्साकंडूश्चमूर्ध्निविगतज्वरलक्षणानि
सुश्रुतोप्याह स्वेदोलघुत्वंशिरसःकंडूःपाकोमुखस्यच क्षवथुश्चान्नलिप्साचज्वरमुक्तस्यल
क्षणं अथज्वरमुक्तस्यनियमाः व्यायामंचव्यवायंचस्नानंचंक्रमणानिच ज्वरमुक्तोनसेवे
त यावन्नोवलवान्भवेत् अन्यच्च व्यायामंचव्यवायंचप्रवातंशिशिरंजलं ज्वरमुक्तोनसेवेत
यावन्नोवलवान्भवेत् अपिज्वरविमुक्तस्यस्नानंकुर्यात्पुनर्ज्वरं तस्माज्ज्वरविमुक्तोपिस्ना
नंविषमिवत्यजेत् यावन्नवलवर्णाग्निर्वपुषःप्रकृतिर्भवेत् तावज्ज्वरेणमुक्तो
पिवर्ज्जनीयानिवर्ज्जयेत् अथवातज्वराधिकारमाह तत्रवातज्वरस्यविप्रकृष्टसंनिकृष्टकारण

कथनपूर्विकांसंप्राप्तिमाह वातलाहारचेष्टाभ्यांवायुरामाशयाश्रयः बहिर्निरस्यकोष्ठाग्निंज्वरकृ
त्स्याद्रसानुगः अथतस्यपूर्वरूपमाह जृंभात्यर्थंसमीरणादिति समीरणज्वरे
उत्पत्स्यति अत्यर्थंजृंभास्यात् जृंभाचश्रमादिपूर्विकाभवति वातज्वरस्यलक्षणमाह वेपथुर्वि
षमोवेगःकंठोष्ठमुखशोषणं निद्रानाशःक्षवस्तंभोगात्राणांरौक्ष्यमेवच शिरोहृद्गात्ररुग्वक्त्र
वैरस्यंगाढविट्कता शूलाध्मानेजृंभणंचभवंत्यनिलजेज्वरे एतानिलक्षणानिप्रायोभावित्वेन
सुश्रुतेननिर्दिष्टानिच कारादन्यान्यपिचरकनिदानेउक्तानिबोद्धव्यानितान्येवश्लोकेनप्रद
र्श्यंते भवंतिविविधावातवेदनाःपादसुप्तता पिंडकोद्वेष्टनंकर्णास्वनोवक्त्रकषायता जंघास्र
दोरुस्तंभोविश्लेषःसंधिजानुनोः शुष्ककासोवमिर्लोमदंतहर्षःश्रमभ्रमो अरुणांमूत्रने
त्रादितद्रूपलोपोलकामिता विषमोवेगःशरीरोलतादिरूपोज्वरवेगोविषमोभवतीत्यर्थः
क्षवस्तंभःछिकायाःअभावः तथाचवाग्भटः हर्षोरोमांगदंतेषुवेपथुःक्षवथोर्ग्रहःभ्रमिरको २०

पिच्छवयूत्कारविनिग्रह इति शिरोहृद्गात्ररुक्गात्रपदे प्रयुक्तेऽशिरोहृच्छर्दप्रयोगस्तत्रतत्रविशेषे
णवेदनावोधनार्थः अथवातज्वरेचिकित्सा आमाशयस्थोहत्वाग्निंसामोमार्गान्पिधापयन् विदधा
तिज्वरंदोषस्तस्माल्लंघनमाचरेदिति क्वचनात्सामान्यतोज्वरिमात्रस्ययावदारोग्यदर्शनंलंघनाभिधा
ने वातज्वरिणोलंघनविधानेविशेषमाह चरकः ज्वरितंषडहेतीतेलध्वन्नंप्रतिभोजितं पाच
नंशमनीयंवाकषायंपाययेद्भिषक् सुश्रुतोप्याह वातिकेसप्तरात्रेणदशरात्रेणपैत्तिके श्लै
ष्मिकेद्वादशाहेनज्वरेयुंजीतभेषजमिति नन्वन्नंवैप्राणिनांप्राणाइतिश्रुतिः तदन्नंविनाप्राणे
भिः कथंस्यात्तव्यमित्याह दोषाणामेवसाशक्तिर्लंघनेयासहिष्णुता नहिदोषक्षयेकश्चित्सो
ढुंशक्नोतिलंघनंमिति भेषजमाह श्रीफलःसर्वतोभद्राकामहृतीचशोणकः तर्कारीगो
क्षुरः क्षुद्राबृहतीकलशीस्थिरा रास्नाकणाकणामूलंकुष्टंत्रुंवीकिरातकः मुस्तामृता
बलावालंद्राक्षायासः शताह्विका एषांक्वाथोनिहंत्येवप्रभंजनकृतंज्वरं सोपद्रवंचयोगोयंस

र्वयोगवरःस्मृतः श्रीफलोविल्वः सर्वतोभद्रागंभारी कामरूतीचपाटला श्योणकः सोनापाठीऽ
तिलोके तर्कारीगणिकारिकाकलसीपृष्टिपर्णि स्थिराशालिपर्णी वालंसुगंधवाला यासोयवासः
दशमूलादिकाथः सुश्रुतस्तु पंचमूलीकषायंतुपाचनंवातिकेज्वरे पंचमूलीचात्रबृहत्पंचमूली
अतएवत्रिशती श्रीपर्णितर्करीश्रीफलटिंटुकपाटलामूलैः पाचनमुचितंमारुतज्वरितज्वरहा
रिवारिणिकथितैः वातज्वरहारिवारिणिकथितैः बृहत्पंचमूलीकाथः किरातादामृतोदीच्यबृह
तीद्वयगोक्षुरैः त्रिपर्णिकलशीविश्वैःकाथोवातज्वरापहः उदीच्यंवालकं त्रिपर्णिशालिपर्णिक।
लशी पृष्टिपर्णी किरातादिःकाथः गुडूचीपिप्पलीमूलनागरैःपाचनंश्रृतं वातज्वरेतथापेयंका।
लिंगंसप्तमेहनि कालिंगंसर्तोंद्रयवंस्मृतं त्रिशती विश्वामृताग्रंथिकसिद्धतोयंमरुज्वरःस्यातपि
वतःकृतोऽयं काथोऽयकुस्तुंबरुदेवदारुक्षुद्रौषधैःपाचनमत्रचारु औषधंशुंठीकाथः पाचन
मितिवेदाःप्रमाणमितिवत् पंचमूलीवलारास्नाकुलत्थैःसहपौष्करैः काथोहन्याच्छिरःकंपप

वैगेद्रं मरुज्ज्वरं पंचमूली विल्वादिः बृहत्पंचमूल्यादिः क्वाथः कणा रसोनामृतवल्ली विश्वा निदिग्धि
कासिंहकभूमिनिंबैः समुस्तकैः सचरितः कषायो हिताग्निनो हंति गदानिमांस्तु ज्वरं मरुद्दृष्टिसमुद्भ
वं तथा बलासजं चानलमंदतां च कंठावरोधं हृदयावरोधं स्वेदं च रोमांच हिमत्वमोहान् करैणादिः।
क्वाथः शुद्धं शांकरस्य शुक्रमतुलितं मारारिनारीरजस्तावत्तावदुमापतिस्फुटगलालंकारवस्तु।
स्मृतं तावत्येव मनःशिला च विमलाता वत्सथारंकणं त्र्युटी व्याद्रमिता कणा च मरिचं दिकपाल।
संख्यास्तकं विषादिवस्तु निशिलोपरि शिष्टाक्षिचूर्णयेद्वासर सिद्धो धयेच्च ततस्तु रवल्वेरसगंधकौ च तृ
र्णचितज्ञामस्युगं विमर्द्य कल्पतरुनामधेयो यथार्थनामा रसः श्रेष्ठः समीरणश्लेष्मगदान्हरते
माषास्य गुंजैका आर्द्रकेण समं भेषजं हितो हंति वातकफसंभवं ज्वरं श्वासकासमुखसेकवह्नि
ततावन्हिमांद्यविसूचीश्च नाशयेत् नस्येनाश्वेव हरति शिरोर्त्तिकफवातजां मेहं महांतमपि च प्रला
पं तत्वपुग्रहं कल्पतरुरसः सामान्यज्वरचिकित्सोक्तो महाज्वरांकुशः प्रदेयोत्र विषमहोषध।

मागधिकोषणा सुमणिस्क्र कमार्द्रकमर्दितं क्रमविवर्द्धितमुद्दलतिज्वरं त्रिपुरभैरव एषरसोवरः शुम
लिः मारितंताम्रंतस्यभागाः पंच रक्तकंहिंगुलं तस्यभागाःषट् मात्रास्यरक्तिकार्द्ध त्रिपुरभैरवरसो
ज्वरे वातश्लेष्मज्वरेस्वेदंजंघापार्श्वशिरःशूलिनि पीनसश्वासबाधिर्य्येकारयेत्तद्विधानवित् स्रोतसां
मार्द्दवंकृत्वानीत्वापावकमाश्रयं हत्वावातकफस्तंभंस्वेदोज्वरमपोहति सर्षपस्नस्थपटस्थित।
कांजिकसंसिक्तवालुकास्वेदः शमयतिवातकफामयमस्तकशूलांगभंगादीन् वालुकास्वेदः कं
पेशिरोहृदयगात्रव्यथायांजंभायांपादसुप्ततायां पिंडिकोद्वेष्टनेकस्त्रसादेहनुस्तंभेलोमहर्षेच मातु
लुंगफलकेसरोधृतःसिंधुजन्ममरिचान्वितोमुखे हंतिवातकफरोगमास्यगंशोषमाशुजडतामरु
रोचकं इतिकवलः कफशोषमुखशोषे अन्यच्च शर्कराद्राडिमाभ्यांचद्राक्षादाडिमयोस्तथा
कल्कंविधारयेदास्येशोषवैरस्यनाशनं द्राक्षामलकयोःकल्कंसघृतंवदनेक्षिपेत् तेनशुष्कमु
खस्यांतःकुर्वीतप्रतिसारणं जिह्वातालुगलांतस्थःसंशोषस्तेनशाम्यति सुरसंजायतेवक्त्रं रु। ३२

चिर्न्नवतिभोजने निद्रानाशस्य निदानमाह नावनं लंघनं चिंता व्यायामः शोकभीक्रुधः एभिरेव न
वेन्निद्रानाशः श्लेष्मातिसंक्षयात् चिकित्सामाह भृष्टं तु विजयाचूर्णं मधुना निशि भक्षयेत् निद्रानाशे
तिसारे च ग्रहण्यां पावकक्षये गुडं पिप्पलिमूलस्य चूर्णेनालोडितं लिहन् चिरादपि च संनष्टां निद्रां
प्राप्नोति मानवः वायसजंघामूलं मूलं वा शिरसि काकमाच्याश्च विधृतं निद्राजनकं स्नुकमूलं वा
शृतं सगुडं पीतमिति विशेषः मूलं तु काकमाच्या बद्धं सूत्रेण मस्तके नियतं विदधाति नष्टनिद्रे
ण मासश्चैव सिद्धमिदं शीलयेन्मंदनिद्रस्तु क्षीरमद्यरसान्दधि अभ्यंगोद्वर्त्तनस्नानं मूर्द्धकर्णाक्षि
तर्प्पणं रसं मांसरसं कांताबाहुलताश्लेषो निर्वृतिः कृतकृत्यता मनोनुकूला विषयाः कामं नि
द्रासुखप्रदाः रसेक्ष्वाके च सूपे च सर्प्पिर्यूषपयस्सु च निद्रां संजनयत्याशु पलांडुरूपयोजितः र
से मांसरसे ऐक्षवं पोतकी माषाः सुरा मांसरसः पयः गोधूमतिलमत्स्याश्च निद्रां कुर्वंति देहिनां
निद्रानाशे दारुहैमवती कुष्ठश्राताका हिंगुसैंधवैः लिंपेत्कोष्ठे रम्लपिष्टैः शूलाध्मानयुतोदरं.

मा·प्र·
२२

हैमवतीश्वेतवचा दारुषट्कलेपः शूलाध्मानयोः कटुतैलं कणा हिंगुवचालशुनसाधितं उष्णं विनि
हितं हंति कर्णयोर्निःस्वनव्यथां तैलं कर्णध्वने कणासुगंधिवचयाधवान्याश्च समन्विता तांबूल
सहिता हंति शुष्ककासं मुखे धृता शुष्ककासे अथाम्लमाह अम्लोपवासानिलजे हितो नित्यं र
सोदनः मुद्गामलकयूषस्तु वह्निविक्षायदीपते रसो विहितमांसरसः पेपामास्कशालीनां वस्ति
पार्श्वशिरोरुजि श्वदंष्ट्राकंटकारीभ्यां सिद्धां ज्वरहरीं पिबेत कासी श्वासी च हिक्की च पंचमूलीश्र
तां पिबेत पेयामिति त्रिदोषः इति वातज्वराधिकारः अथ पित्तज्वराधिकारः तत्र पित्तज्वरस्य
विप्रकृष्टसंनिकृष्टकारणकथनपूर्विकां संप्राप्तिमाह पित्तलाहारचेष्टाभ्यां पित्तमामाशयाश्र
यं वह्निर्निरस्य कोष्ठाग्निं ज्वरकृत्स्यात्प्रसानुगं पित्तस्य पंगुत्वात्तेन कोष्ठाग्नेरूष्मा वह्निर्नेतुं न शक्य
ते यतआह पित्तं पंगु कफः पंगुः पंगवो मलधातवः वायुना यत्र नीयंते तत्र गच्छंति मेघवत
ततो त्र पित्तं वातसहायं बोधव्यं यतआह द्वयमेकरसं नास्ति न रोगो प्येकदोषजः एकस्तु कु २२

पित्तोदोषस्तत्रानपिकोपयेत् अथतस्यपूर्वरूपमाह पित्तान्नयनयोर्दाहइति पित्तज्वरेउ
त्पत्स्यतिनेत्रदाहःस्यात् सचदाहःश्रमादिपूर्वकोभवति पित्तज्वरस्यलक्षणमाह वेगस्ती
क्ष्णोतिसारश्चनिद्राल्पत्वंतथावमिः कण्ठौष्ठमुखनासानांपाकःस्वेदश्चजायते प्रलापो
वक्त्रकटुतामूर्छादाहोमदस्तृषा पीतविण्मूत्रनेत्रत्वंपैत्तिकेभ्रमएवच अतिसारःपित्त
स्यसरत्वात्स्वभावप्रवृत्तिर्नत्वतीसारएवतस्यज्वरोपद्रवत्वाद्वमिः यदापित्तंकफस्थानं
यातितदावोद्धव्या प्रलापोनर्थकंवचः मूर्छात्स्वपादेरज्ञानं मदःप्रागुक्तोधत्तूरलक्षण
दिवोन्मत्तता भ्रमश्चक्रारूढस्येवज्ञानं चकारात्कण्ठकोष्ठादयोवोद्धव्याः अथपित्तज्वरचिकि
त्सा आमाशयस्थोहत्वाग्निंसामोमार्गान्पिधापयन् विदधातिज्वरंदोषस्तस्माल्लंघनमाच(
रेत् इतिवचनात्सामान्यतोज्वरितमात्रस्ययावद्रोगपरिदर्शनंलंघनाभिधाने पित्तज्वरिणोलं
घनविधानेविशेषमाहसुश्रुतः पैत्तिकेदशरात्रेणज्वरेयुंजीतभेषजमितिवचनाद्दशरात्रेण(

लंघनवतामतीतेनेत्यर्थः किंतत्भेषजंतदाह तिक्तामुस्तायवैःपाठाकट्फलाभ्यांसहोदकं
पक्वंसशर्करंपीतंपाचनंपित्तकेज्वरे तिक्तादिक्वाथः पर्पटोवासकस्तिक्ताकैरातोधन्वया
सकः प्रियंगुश्चकृतःक्वाथएषांशर्करयायुतः पिपासादाहपित्तास्रयुक्तंपित्तज्वरंजयेत् पर्प
टादिक्वाथः द्राक्षाहरीतकीमुस्ताकटुकाकृतमालकः पर्पटश्चकृतःक्वाथएषांपित्तज्वरापहः
मुखशोषप्रलापांश्चदाहमूर्छाभ्रमप्रणुत् पिपासारक्तपित्तानांशमनोभेदनोमतः द्राक्षादिक्वा
थः पटोलयवधान्याकंमधुकंमधुसंयुतं हंतिपित्तज्वरंदाहंतृष्णांचातिप्रमाथिनी पटोलादिक्वा
थः गुडूच्यामलकीयुक्तः केवलोवापिपर्पटः पित्तज्वरंहरेत्तूर्णंदाहशोषभ्रमान्वितं गुडूच्यादि
क्वाथः एकःपर्पटकःश्रेष्टःपित्तज्वरविनाशकः किंपुनर्यदियुज्येतचंदनोशीरवालकैः
ह्रीबेरचंदनोशीरघनपर्पटसाधितं दद्यात्सुशीतलंवारितृट्छर्दिज्वरदाहनुत् ह्रीबेरादिक्वा
थः भूनिंबातिविषालोध्रमुस्तकेंद्रयवामृता वालकंधान्यकंबिल्वंकषायोमाक्षिकान्वितः

विड्भेदश्वासकासांश्च रक्तपित्तज्वरं हरेत् भूनिंबादिः क्वाथः द्राक्षाचंदनपद्मानि मुस्तातिक्ता
मृतापि च धात्रीवालमुशीरश्च लोध्रंइन्द्रयवपर्प्पटाः पद्मकंप्रियंगुश्च यवासोवासकस्तथा मधु
कंकुलकंचापिकिरातोधान्यकंतथा एषांक्वाथोनिहंत्येवज्वरंपित्तसमुत्थितं तृष्णांदाहंप्र
लापंचरक्तपित्तंभ्रमंक्लमं मूर्च्छांछर्दिंतथाशूलंमुखशोषमरोचकं कासंश्वासंचहृल्लासंनाशा
येन्नात्रसंशयः महाद्राक्षादिः क्वाथ ससितोनिशिपर्युषितःप्रातर्धान्याकतंडुलक्वाथःपीतः
शमयत्यचिराद्दृंतद्दाहंज्वरंपैत्तं धान्याकक्वाथः अमृताया हिमःप्रातःससितःपैत्तिकंज्वरं वा
सायास्वतथाकासरक्तपित्तज्वरान्जयेत् पलाशस्यवदर्यावानिंबस्यमडपल्लवैः अम्लपिष्टैः
प्रलेपोऽयंहन्याद्दाहयुतंज्वरं अत्रान्मसुतस्यगंभीरताम्रकांस्यादिपात्रेनिहितेचनाभौ शीतांबुधा
रावकुल्लापतंतीनिहंतिदाहंत्वरितंज्वरंच पर्यातैलघृतक्षौद्रैर्लिहिन्दाहज्वरापहं कासासक
पित्तवीसर्प्पश्वासान्हंतिवमीनपि तैलघृतक्षौद्रैरित्यत्रनसमुच्चयस्तेनकेवलेनक्षौद्रेणापिलि

भा·प्र· ह्यात् कांजिकार्द्रपटेनावगुंठनं दाहनाशनं अथगोतक्रसंस्विन्नशीतलीकृतवाससा धात्र्यामल
२५ ककल्केनकवलोत्रहितोमहः पक्वदाडिमवीजैर्वाधान्यकल्केनवक्वचित् धान्यात्रधान्यकं इतिक
चलः अथान्नमाह दाहवम्यर्द्दितंत्वामंनिरन्नंतृष्णयान्वितं शर्करामधुसंयुक्तंपाययेल्लाजतर्प्प
णं लाजतर्प्पणंलाजसक्तुरूपंतर्प्पणं संतर्प्पणस्वरूपमुक्तं सामान्यज्वरचिकित्सायां मुद्गयूषो
दनोदेयः सितयापैत्तिकेज्वरे हर्म्येशुभ्राभ्रसंकाशेशशांककरशीतले मरुतोरकसंसिक्ते।
स्वप्यात्पित्तज्वरीनरः हारावलीचंदनशीतलानांसुगंधिपुष्पांवरभूषितानां नितंबिनीनांसुप
योधराणामालिंगनान्याशुहरंतिदाहं वाप्यःकमलहासिरायोजलपत्रगृहाःशुभाः नार्य्यश्चंद
नदिग्धांगोदाहदैन्यहरामताः इतिपित्तज्वराधिकारः कफज्वराधिकारोयतत्रकफज्वरस्य
विप्रकृष्टसंनिकृष्टकारणकथनपूर्विकांसंप्राप्तिमाह श्लेष्मलाहारचेष्टाभ्यांकफस्त्वामाशया
श्रयः वहिर्निरस्यकोष्ठाग्निंज्वरकृत्स्याद्रसानुगः कफस्यकोष्ठाग्नितेजसोवहिर्नयनेपंगुत्वाद् २५

ष्टांकायांजातायांपित्तस्यैवसिद्धान्तोबोधव्यः अथतस्यपूर्वरूपं कफात्वन्नानभिनंदनमिति कफज्वरेतत्य
द्यपति अन्नानभिलाषःस्यात्स्वश्रमादिपूर्वकोभवति अथकफज्वरस्यलक्षणमाह स्तैमित्यंस्तिमितोवे
गआलस्यंमधुरास्यता शुक्लमूत्रपुरीषत्वंस्तंभस्तृप्तिरथापिच गौरवंशीतमुत्क्लेदोरोमहर्षोतिनिद्रता
प्रतिश्यायोऽरुचिःकासः कफजेक्ष्णोश्चशुक्लता स्तैमित्यंअंगानामार्द्रपटावगुंठितत्वमिवस्तिमितो
वेगःज्वरस्यमंदोवेगः आलस्यंसमर्थस्यापिकर्मण्यनुत्साहःस्तंभःअंगानम्रता तृप्तिःअन्नाभिलाषे
सत्यपिभोजनासामर्थ्यं गौरवंगात्राणां शीतंल्याति उत्क्लेदःवमनोपस्थितिरिव अतिनिद्रतानिद्रा
धिक्यं प्रतिश्यायोनासारोगविशेषः अरुचिर्भोजनानिच्छा चकारात्पिडिकाःश्वेताःमुखप्रसेक
श्छर्दिस्तंद्राहृदयोपलेपश्चलान्निलाषोवन्हिमांद्यमिति प्रश्लोकःपिडकाःश्वेताश्छर्दिस्तंद्रेहलकामता कफे
नलिप्तंहृदयंभवेदग्नेश्चमंदता अथचिकित्सा आमाशयस्थोहत्वाग्निंसामोमार्गान्पिधापयन् वि
दधातिज्वरंदोषस्तस्माल्लंघनमाचरेदितिवचनात्सामान्यतोज्वरमात्रस्ययावदारोग्यदर्शनंलंघनानि

धाने श्लेष्मज्वरिणो लंघनविधाने विशेषमाह सुश्रुतः श्लेष्मिको द्वादशाहेन ज्वरे युंजीत भेषजमिति द्वादशाहेन
लंघनवता भवतीति तेने त्यर्थः किं तद्भेषजं तदाह पिप्पल्यादिकषायं तु कफजे परिपाचनं पिप्पल्यादिगणमाह
पिप्पली पिप्पलीमूलं मरिचं गजपिप्पली नागरं चित्रकं चव्यं रेणुकैलाजमोदिका सर्षपो हिंगुभार्गी च पा
ठेंद्रयवजीरकाः महानिंबश्च मूर्वा च विषा तिक्ता विडंगकं पिप्पल्यादिगणो ह्येष कफमारुतनाशनः
गुल्मशूलज्वरहरो दीपनश्चामपाचनः पिप्पल्यादिः क्षौद्रोपकुल्यासंयोगः श्वासकासज्वरापहः
प्लीहानं हंति हिक्कां च लानामपि शस्यते पिप्पलीं त्रिफलां वापि समभागां ज्वरी लिहन् मधुना सर्पिषा
चापि कासश्वासी सुखी भवेत् कट्फलं पौष्करं शृंगी कृष्णा तु मधुना सह श्वासकासज्वरं शीघ्रं लेहोऽयं कफ
नाशनः कट्फलं पौष्करं शृंगी यवानी कारवी तथा कटुत्रयं च सर्वाणि समभागानि चूर्णयेत् आर्द्र
कस्वरसे लिह्यान्मधुना वा कफज्वरी कासश्वासारुचिच्छर्दिश्लेष्मानिलनिवृत्तये अष्टांगावलेहः सिं
दुवारदलक्वाथं कणाढ्यं कफजे ज्वरे जंघयोश्च बले क्षीणे कर्णे वापि हितो पिबेत् यवानी पिप्पली वा २६

सातथाखास्वसवल्कलं एषांक्वाथोपिवेल्काशेश्वासेचकफजेज्वरे वासाद्युडामृताक्वाथः द्वौजेएज्वर
कासहृत् वासादिः मरिचंपिप्पलीमूलंनगारंकारवीकणा चित्रकंकट्फलंकुष्ठंसुसुगंधिवचाशि
वा कंटकारीजटाशृंगीयवानीपिचुमंदकः एषांक्वाथोहरत्येवज्वरंसोपद्रवंकफात् मरिचादिःवा
तज्वराधिकारोक्तः कल्पतरुरसोपि कफज्वरेदातव्यस्तस्यकफव्याधिहरत्वात् सिंधुत्रिकटु
राजीभिरार्द्रकेणाकफेहितः कवलइतिशेषः अथान्नमाहः मुद्गयूषोदनोदेयोज्वरेकफसमुत्थे
ते इतिकफज्वराधिकारः अथवातपित्तज्वराधिकारः तत्रद्वंद्वजस्यज्वरस्यविप्रकृष्टसंनिकृष्ट
कारणकथनपूर्विकांसंप्राप्तिमाह तत्रवातपित्तज्वरस्य वातपित्तकरैर्वातपित्तेआमाशयाश्रये
वहिर्निरस्यकोष्ठाग्निंरसगेज्वरकारिणौ स्यातामितिशेषः तस्यपूर्वरूपमाह प्राग्रूपेवातपित्तस्य
भवतोवातपित्तैके ज्वरइतिशेषः अथवातपित्तज्वरस्यलक्षणमाह तृष्णामूर्छाभ्रमोदाहोनिद्रा
नाशःशिरोरुजा कंठास्यशोषोवमथूरोमहर्षोरतिर्भ्रमः पर्वभेदश्चजृंभाचवातपित्तज्वराकृतिः

भा॰प्र॰ पर्वभेदः पर्वणि भिद्यंत इवेति संधिषु व्यथा। अथ चिकित्सा। वातपित्तज्वरे देयमौषधं पंचमेहनि किरा
५७ ततिक्तममृतां द्राक्षामामलकीं सटीं। निःक्वाथ्य सगुडं क्वाथं वातपित्तज्वरे पिबेत्। किरातादिः। गुडूचीपर्प
टोमुस्तं किरातो विश्वभेषजं वातपित्तज्वरे देयं पंचभद्रमिदं शुभं। पंचभद्रक्वाथः। त्रिफलाशाल्मलीरास्ना।
राजवृक्षाटरूषकैः शृतमंबु हरत्याशु वातपित्तभवं ज्वरं। त्रिफलादिः। मधुकं सारिवा द्राक्षा मधूकं।
चंदनोत्पलं काश्मरीफलकं लोध्रं त्रिफला पद्मकेशरं। परूषकं मृणालं च क्षिपेत् संचूर्ण्य वारिणि
निशोषितं सिताक्षौद्रलाजयुक्तं तु तत्पिबेत्। वातपित्तज्वरं दाहं तृष्णां मूर्च्छामरोचिविभ्रमान्। शमयेद्रक्त
पित्तं च जीमूतमिव मारुतः। अत्र मधुकादिमृणालांतं समुदितं पलपरिमितं संचूर्ण्य क्षिपेत् वारि
णि षट्पलपरिमिते। मधुकादिर्हिमो दाहे। अथ पथ्यमाह। मुद्गामलकयूषस्तु वातपित्तज्वरे हितः।
महादाहे प्रदातव्यो यूषः श्रवणकसंभवः। दाडिमामलकसंभवो यूषः कफकृदिति वातपैत्तिके। कफपि
त्तहरा मुद्गाः कारवेल्लादयस्तथा। प्रायेण न च ते देया वातपित्तोत्तरे ज्वरे। दत्वास्तु ज्वरविष्टंभशूलौ। ५७

दावर्त्तकारिणः इतिवातपित्तज्वराधिकारः अथवातकफज्वराधिकारः तत्रतस्यविप्रकृष्टसं॰
निकृष्टकारणकथनपूर्विकांसंप्राप्तिमाह वातश्लेष्मकरैर्वातकफावामाशयाश्रयौ वह्निर्निर॰
स्यकोष्ठाग्निरसगौज्वरकारिणौ पूर्वरूपमाह प्राग्रूपेवातकफयोःस्यातांवातकफज्वरे रूपमाह
स्तैमित्यंपर्वणांभेदोनिद्रागौरवमेवच शिरोग्रहःप्रतिश्यायःकासःस्वेदाप्रवर्त्तनं संतापोमध्यवेग
श्चवातश्लेष्मज्वराकृतिः स्वेदाप्रवर्त्तनं स्वेदस्यअसमंतात्भावेनप्रवृत्तिः तथाहहारीतः शिरोग्र
हःस्वेदभवश्चकासोज्वरस्यलिंगंकफवातजस्येति स्वेदभवःस्वेदोत्पत्तिः ननुस्वेदःपित्तस्यका॰
र्म अतएवपित्तज्वरे कंठौष्ठमुखनासानांपाकःस्वेदश्चजायते इतिउक्तंतस्मात्कथंवातकफज्व
रेस्वेदस्यातिप्रवृत्तिः उच्यते विकृतिविषमसमवायारब्धत्वान्नदोषइतिकार्त्तिकः प्रकृतिसम
समवायस्यविकृतिविषमसमवायस्यचायमर्थः प्रकृत्याहेतुभूतयासमःकारणानुरूपःसम
वायःकार्यकारणभावःसंबंधः प्रकृतिसमसमवायः कारणानुरूपंकार्यमितियावत् यथा.

भा॰प्र॰ प्रकृतेर्यथास्थितैः शुक्लैस्तंतुभिः समवायिकारणैरारब्धः पटः शुक्लः एवभवति यथाचप्रकृतेना
३८ केवलेनवातेनपित्तेनकफेनवाजनितोज्वरोवाताद्युचितैर्धर्मैर्विपर्ययः वेगाधिक्यस्तैमित्यादिर्नियु
क्तोभवति विकृतिविषमसमवायस्तुविकृत्याहेतुभूतयाविषमःकारणाननुरूपःसमवायः
यथा संजोगादिकृताभ्यांहरिद्राचूर्णाभ्यांहेतुभूताभ्यांविषमः कारणाननुरूपःलोहितोवर्णो
जायते तथायोगेनविकृताभ्यांवातश्लेष्मभ्यांहेतुभूताभ्यांविषमाकारणाननुरूपास्वेदस्यातिप्र
वृत्तिरितिसिद्धांतः अथवातकफज्वरस्यचिकित्सा वातश्लेष्मज्वरेदेयमौषधंनवमेहनि पिप्प
लीपिप्पलीमूलचव्यचित्रकनागरैः दीपनीयःस्मृतोवर्गोवातश्लेष्मज्वरापहः कोलमात्रोपयो
गित्वात्पंचकोलमिदंस्मृतम् तीक्ष्णोष्णंपाचनंश्रेष्ठंदीपनंकफवातनुत् गुल्मप्लीहोदरानाहशूल
घ्नंपित्तकोपनं पंचकोलं किरातब्दामृतवल्लीसिंहिकाकणाकणामूलरसोनसिंदुकैः कृतःक
षायोविनिहंतिसत्वरंज्वरंसमीरात्सकफात्समुत्थितं किरातादिःक्वाथः पिप्पल्यादिगणक्वाथं ३८

पिबेद्वातकफज्वरी नातःपरतरंकिंचिदस्मिन्भेषजमुत्तमम् अस्मिन्वातकफज्वरे पिप्पल्यादि
क्वाथः पिप्पलीपिप्पलीमूलचव्यचित्रकनागरं वचासातिविषाजाजीपाठावत्सकरेणुका कि
राततिक्तकोमूर्वासर्षपमरिचानिंब कटुफलंपुष्करंभार्ङ्गी विडंगंकर्कटाख्यं अर्कमूलंबृहत्से
हीश्रेयसीसदुरालभा दीप्यकंचाजमोदाचसुकनासासहिंगुका एतानिसमभागानिगणोद्वाविं
शकोमतः एषांक्वाथोनिपीतःस्याद्वातश्लेष्मज्वरापहः हंतिवातंतथाशीतंप्रस्वेदमतिवेपथुं प्र
लापंचातिनिद्रांचरोमहर्षमरुचीस्तथा महावातेपतंत्रेचशून्यत्वेसर्वगात्रजे पिप्पल्यादिर्महान्क्वा
थोज्वरेसर्वत्रपूजितः अत्रश्रेयसीरास्नावातकफज्वरहरत्वात् बृहत्पिप्पल्यादिक्वाथः दशमू
लीरसःपीतःकणाम्भःकफवातजे ज्वरेविपाकेनिद्रायांपार्श्वरुक्श्वासकासके दशमूलीक्वा
थः पिप्पलीमिश्रःशृतंतोयंश्रमनिर्ण्ददीपनं वातश्लेष्मज्वरंहंतिसेवितंप्लीहनाशनं पिप्पली
क्वाथः सूतकंटंकणंभृष्टंगंधंशुद्धंसमंसमं द्विगुणंसूतकाद्देयंजैपालंतुषवर्जितं सैंधवंमरिचं

चिंचात्वक्क्षारः शर्कराऽपिच प्रत्येकमस्ततुल्यंस्याज्जंबीरैर्मर्दयेद्दिनं सूर्यशेखरनामायंरसोगुंजाद्व।
योन्मितः । भक्षितस्तप्ततोयेनवातश्लेष्मज्वरापहः सूर्यशेखररसः स्वेदोऽजमेभृष्टकुलत्थचूर्णेनिपा
तनंशस्तमितिब्रुवंति जीर्णशाकमोर्ल्लवणस्यभाजनंसंचूर्णितंस्वेदहरंसुधूलनात् मरिचंपिप्पलीशुं
ठीपथ्यालोध्रमथपौष्करं भूनिंबःकटुकाकुष्टंकच्चूरीलिंगिकासटी एतानिसमभागानिसूक्ष्मचूर्ण।
निकारयेत् एतदुद्धूलनंश्रेष्ठंस्रोतोवत्स्वेदनिर्गमे लिंगिकापंचगुरिश्राप्रतिलोके अत्रसटीगं
धपलाशी मरिचाद्युद्धूलनं भूनिंबकारवीतिक्ताकचाकटुफलकंरजः एषामुद्धूलनंश्रेष्ठंसततं।
स्वेदसंप्लवे भूनिंबाद्युद्धूलनं पूर्वोक्तोवालुकास्वेदोप्यत्रसमुचितः यत्प्रोक्तं पीनसःश्वासवाधि
र्यजंघापार्श्वास्थिशूलिनि वातश्लेष्मज्वरेस्वेदंकारयेत्तद्विधानवित् मातुलुंगफलकेशरोद्धृतः।
सिंधुजन्ममरिचान्वितोमुखे हंतिवातकफरोगमास्यगंशोषमाशुजडतामरोचकं इतिकवलः
अथान्नमाह महत्यापिचमल्पातंसम्यक्सिद्धंचिकित्सकः सप्तमेदिवसेदद्याज्ज्वरेवातवलास ३९

ज्ञे इतिवातकफज्वराधिकारः अथपित्तकफज्वराधिकारः तत्रतस्यविप्रकृष्टसंनिकृष्टकारण
कथनपूर्विकांसंप्राप्तिमाह पित्तश्लेष्मकरैःपित्तकफावामाशयाश्रयौ वह्निर्निरस्यकोष्ठाग्निंरस
गोज्वरकारिणौ पूर्वरूपमाह प्राग्रूपेपित्तकफयोःस्यात्तंपित्तकफज्वरे अथतस्यलक्षणमाह
लिप्ततिक्तास्यतातंद्रामोहःकासोरुचिस्तृषा मुहुर्दाहोमुहुःशीतंपित्तश्लेष्मज्वराकृतिः आस्य
तिक्तत्वंपित्तेनलिप्तत्वंकफेन तंद्राअर्द्धोन्मीलितनेत्रत्वं मोहोमूर्च्छा अथपित्तकफज्वराचि
कित्सा पित्तश्लेष्मज्वरेदेयमौषधंदशमेऽहनि गुडूचीनिंबधान्याकचंदनंकटुरोहिणी गुडूच्या
दिरयंक्वाथःपाचनोदीपनस्मृतः तृष्णादाहारुचिच्छर्दिपित्तश्लेष्मज्वरापहः गुडूच्यादिः अमृ
ताकटुकारिष्टःपटोलंघनचंदने नागरेंद्रयवंचैतदमृताष्टकमीरितं क्वथितंसकणाचूर्णंपित्त
श्लेष्मज्वरापहं हृल्लासारोचकच्छर्दितृष्णादाहनिवारणं अमृताष्टकं क्षुद्राधान्यकशुंठीभिर्गुडूची
मुस्तपद्मकैः रक्तचंदनभूनिंबपटोलवृषपौष्करैः कटुकेंद्रयवारिष्टभार्गीपर्प्पटकैःसमैः क्वा

भा॰प्र॰ थंप्रातर्निषेवेतसर्वशीतज्वरापहः इतिबृहत्क्षुद्रादिः क्षुद्राशुंठीगुडूचीनांकषायःपौष्करस्यच कफ
४० वाताधिकेयेयोज्वरेवापित्रिदोषजे कासश्वासज्वरहरःपार्श्वशूलनिवारणः इतिक्षुद्रादिः कंटकार्य्य
मृताभार्गीविश्वेंद्रयववासकं भूनिंबचंदनंमुस्तंपटोलंकटुरोहिणी विपाच्यपाययेत्क्वाथंपित्तश्ले
ष्मज्वरापहं दाहतृष्णारुचिछर्दिकासशूलनिवारणं कंटकार्य्यादिः नागरोशीरबिल्वाब्दधान्यमो
चरसांबुभिः कृतःक्वाथोभवेद्ग्राहीपित्तश्लेष्मज्वरापहः नागरादिः सशर्करामक्षमात्रांकटुकांचो
ष्णवारिणा पीत्वाज्वरंजयेज्जंतुःपित्तश्लेष्मसमुद्भवं अत्रकटुकायाद्वादशमाषाःशर्करायाश्चत्वारो
माषाएवंकर्ष इतिचक्रदत्तः वैद्यव्यवहारेतुकटुकाशर्करयोःसमभागयोरेककर्षः कटुकीकल्कः
सपत्रपुष्पवासायारसःक्षौद्रसितायुतः पित्तश्लेष्मज्वरंहंतिसास्रपित्तंसकामलं अत्रवासायार
सोर्द्धपलपरिमितोदेयः मधुसितयोःप्रत्येकंटंकःप्रक्षेप्तव्यः अथान्यमाह कषायःपरिपीतस्तु
शृंगवेरपटोलयोः पित्तश्लेष्मज्वरवमीदाहकंडुहरोभवेत अन्यच्च पटोलधान्यपोर्यूषःपित्तश्ले॰ ४०

षज्वरापहः इति पित्तकफज्वराधिकारः अथ सन्निपातज्वराधिकारमाह तत्र सन्निपातज्वरस्य विप्र
कृष्टसन्निकृष्टकारणकथनपूर्विकां संप्राप्तिमाह त्रिदोषजनकैर्वातपित्तश्लेष्मामगेहगाः वह्निर्नि
रस्य कोष्ठाग्निरसगा ज्वरकारिणः पूर्वरूपमाह प्राग्रूपाणि त्रिदोषाणां स्युस्त्रिदोषज्वरे नृणां संनि
पातज्वरस्य सामान्यानि लक्षणान्याह क्षणे दाहः क्षणे शीतमस्थिसंधिशिरोरुजा सस्रावे कलुषे।
रक्ते निर्भुग्ने चापि लोचने सस्वनौ सरुजौ कर्णौ कंठः शूकैरिवावृतः तंद्रा मोहः प्रलापश्च कासः श्वासो
ऽरुचिर्भ्रमः परिदग्धा खरस्पर्शा जिह्वा स्रस्तांगता परा ष्ठीवनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च
शिरसो लोठनं तृष्णा निद्रानाशो हृदि व्यथा स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः कृशत्वं नातिगा
त्राणां सततं कंठकूजनं कोठानां श्यावरक्तानां मंडलानां च दर्शनं मूकत्वं स्रोतसां पाको गुरुत्व
मुदरस्य च चिरात्पाकश्च दोषाणां सन्निपातज्वराकृतिः लोचने सस्रावे सास्रुणी कलुषे अस्वच्छे
निर्भुग्ने निर्गते कुटिले वा कण्ठः शूकैरिव धान्याग्रैरिवावृतः जिह्वा परिदग्धा परिदग्धेव जायते अ

एवापरिदग्धास्कुलाहृष्यते स्रस्तंगता शिथिलगात्रता पराअतिशयिता ष्ठीवनमित्यादि कफसंयुक्त
स्यरक्तस्यपित्तस्यचष्ठीवनं शिरसोलोठनमितस्ततश्चालनं कूजत्वंनातिमात्राणांअतिशयितंका।
ग्रंपनव्याधिप्रभावात् सततंनिरंतरंकोठः वरटीदष्टसंस्थानः कोठइत्यभिधीयते अपावः कपिशोव
र्णः मूकत्वमवचनत्वं अल्पवचनत्वंवा स्रोतसांकर्णनासादीनां ननुवातादयःपरस्परविरुद्धगु
णास्तेषांसंभूयैकत्रकार्यारंभकत्वंनोपपद्यतेपरस्परोपघातात् दहनसलिलयोरिवतत्कथंवातपि
त्तकफामिलित्वाविकारोत्पादकाः अत्रसमाधानमुक्तंदृढवलेन विरुद्धैरपिनत्वेतेगुणैर्घ्नंतिपरस्प
रं दोषाःसहजसात्म्यत्वाद्विषंघोरमहीनिव गदाधरस्तुहेत्वंतरमुक्तवान् दैवाद्दोषस्वभावाद्वादो।
षाणांसान्निपातिके विरुद्धैश्च गुणैःकैश्चिन्नोपघातःपरस्परंइति ननुभिन्नचयप्रकोपकालानांवा
तपित्तकफानांयुगपदुत्थानाभावात्कथंसंभूयसन्निपातज्वरारंभकत्वमुपपद्यते उच्यते त्रिदोषज
नकनिदानवलेनयुगपदेषांप्रकोपादिविसिद्धांतः अथसामान्यसन्निपातज्वरस्यत्रयोदशविशेषा ४१

नाह एकोल्वणास्त्रयस्तेस्युर्द्व्युल्वणाश्चतथेतिषट् त्र्युल्वणश्चभवेदेकोविज्ञेयःसतुसप्तमः प्रवृद्धमध्य-
हीनैस्तुवातपित्तकफैश्चषट् सन्निपातज्वरस्यैवंस्युर्विशेषास्त्रयोदश तत्रप्रवृद्धवातोमध्यपित्तोहीन
कफः १ मध्यवातःप्रवृद्धपित्तोहीनकफः २ हीनवातःप्रवृद्धपित्तोमध्यकफः ३ प्रवृद्धवातोहीन-
पित्तोमध्यकफः ४ मध्यवातोहीनपित्तःप्रवृद्धकफः ५ हीनवातोमध्यपित्तःप्रवृद्धकफश्चेतिषट् ६
तेषांनामानिक्रमादाह विस्फारकश्चाशुकारीकंपनोबभ्रुसंज्ञकः शीघ्रकारीतथाभल्लुः सप्तमः
कूटपालकः संमोहकःपाकलश्चयाम्यःक्रकचइत्यपि ततःकर्कटकःप्रोक्तस्ततोवैदारिकाभि-
धः तंत्रांतरेविस्फारकस्थानेविस्फुरकेतिपाठः बभ्रुस्थानेविभुरितिपाठः विघ्रेतिकुत्रचापाठः भ
ल्लुरित्यत्रफल्गुवापाठः याम्यइत्यत्रसंग्रामइतिवापाठः कर्कटस्थानेकर्कोटकइतिवापाठः
तत्रवातोल्वणस्यलक्षणमाह श्वासःकासोभ्रमोमूर्छाप्रलापोमोहवेपथू पार्श्वस्यवेदनाजृंभाक
षायत्वंमुखस्यच वातोल्वणस्यलिंगानिसन्निपातस्यलक्षयेत् एषविस्फारकोनाम्नासन्निपातःसु-

भा॰प्र॰ दारुणः पित्तोल्बणमाह अतीसारोभ्रमोमूर्च्छामुखपाकस्तथैवच गात्रेचविंदवोरक्तादाहोतीवप्रजा
४२ यते पित्तोल्बणस्यलिंगानिसन्निपातस्यलक्षयेत् भिषग्भिःसन्निपातोऽयमाशुकारीप्रकीर्त्तितः कफो
ल्बणस्यलक्षणमाह जडतागद्गदावाणीरात्रौनिद्राभवत्यपि प्रस्तब्धेनयनेचैवमुखमाधुर्य्यमेवच क
फोल्बणस्यलिंगानिसन्निपातस्यलक्षयेत् मुनिभिःसन्निपातोऽयमुक्तःकंपनसंज्ञकः तत्रवातपि
त्तोल्बणस्यलक्षणमाह वातपित्ताधिकोयस्यसंन्निपातःप्रकुप्यति तस्यज्वरोमदस्तृष्णामुखशोषप्र
मीलके आध्मानारुचितंद्राश्वकासःश्वासोभ्रमःश्रमः मुनिभिर्वभ्रुनामायंसंनिपातश्चदाहृतः २ वा
तश्लेष्मोल्बणस्यलक्षणमाह वातश्लेष्माधिकोयस्यसन्निपातःप्रकुप्यति तस्यशीतज्वरोमूर्च्छाक्षुत्तृष्णापा
र्श्वनिग्रहः शूलमस्विद्यमानस्यहिक्काश्वासश्चजायते असाध्यःसन्निपातोयंशीघ्रकारीतिकथ्यते न
हिजीवत्यहोरात्रमनेनाविष्टविग्रहः अथपित्तश्लेष्मोल्बणस्यलक्षणमाह पित्तश्लेष्माधिकोयस्यसं
न्निपातःप्रकुप्यति अंतर्दाहोवहिःशीतंतस्यतृष्णाप्रवर्द्धते तुद्यतेदक्षिणंपार्श्वमुरःशीर्षमलग्रहःथी ४२

वतिश्लेष्मपित्तंचरक्तंचात्करात्यश्चन्दयते विच्छेदश्वासहिक्काश्चवर्द्धतेसप्रमीलकाः ऋषिभिर्नन्दुनामायं
सन्निपातमुदाहृतः अथवातपित्तकफोल्वणस्यलक्षणमाह सर्वदोषोल्वणोयस्यसन्निपातःप्रकुप्य
ति अपाणामपिदोषाणांतस्यरूपाणिलक्षयेत् व्याधिर्न्योदारुणश्चैववज्रशस्त्राग्निसन्निभः केवलो
च्छासपरमःस्तब्धांगःस्तब्धलोचनः त्रिरात्रात्परमेतस्यजंतोर्हरतिजीवितं तदवस्थंवृतंदृष्ट्वामृत्योर्व्या
हरतेजनः धर्षितोराक्षसैर्नूनमवेलायांचरंतिये अन्यथाब्रुवतेकेचिद्यक्षिणाब्रह्मराक्षसैः पिशाचै
र्गुह्यकैश्चैवतथान्यैर्मस्तकेहतः कुलदेवार्चनाद्धीनोधर्षितःकुलदेवतैः नक्षत्रपीडामपरेगरकर्म्मे
तिचापरे सन्निपातमिमंप्राहुर्भिषजः कूटपालकं अथप्रवृद्धमध्यहीनवातादिजनितसन्निपातज्व
राणांलक्षणान्याह प्रवृद्धमध्यहीनैस्तुवातपित्तकफैस्त्रयः तेनरोगास्तएवोक्तायथादोषबला
श्रयाः प्रलापायाससंमोहकंपमूर्छारतिभ्रमाः एकपक्षाभिघातश्चत्वाप्येतद्विदोषतः एषस
म्मोहकोनाम्नासन्निपातःसुदारुणः तेनरोगास्तएवोक्ताः उक्ताएवतेरोगाव्यथावेपथुनिद्रानाशा

भा·प्र· विष्टंभादयो वातजाः दाहतृष्णोष्णतास्वेदादयः पित्तजाः गौरवाग्निमांद्योत्क नासिकामुखप्रसेकादयः
५२ कफजाः तत्रापि प्रलापादयः पक्षाघातश्च विशेषाद्भवंति ननु वातः प्रवृद्धस्सन् ज्वरं करिष्यति पित्तं तु म
ध्यं सममिति यावत् तत्कथं ज्वरं करिष्यति यतश्चाह धातवस्तन्मलादोषा नाशयंत्यसमाः तनुं सा
माः सुखाय विज्ञेया बलायोपचयाय चेति उच्यते अत्र पित्तं मध्यमपि अप्रकृतमेव यतोऽप्रकृतयो
र्वातश्लेष्मणोरपेक्षया मध्यं तेन मध्यं मध्यप्रकुपितमित्यर्थः ननु कफः क्षीणः स कथं ज्वरं करिष्यति
हीनशक्तिकत्वात् उच्यते दोषाः क्षीणा अपि व्याधीन् कुर्वंत्येव यतश्चाह वातक्षयेऽल्पचेष्टत्वं मंदवा
क्त्वं विसंज्ञता पित्तक्षयेऽधिकः श्लेष्मा वह्निर्मंदः प्रभाक्षयः शिथिलास्संधयो मूर्छा रौक्ष्यं दाहः क
फक्षये स्यात् शंका सिद्धांतश्चापरस्त्वापि मध्यप्रवृद्धहीनैस्तु वातपित्तकफैस्त्रयः तेन रोगास्त एवोक्ता
यथा दोषबलाश्रयाः मोहप्रलापमूर्छास्युर्मन्यास्तंभः शिरोग्रहः कासश्वासो भ्रमस्तंद्रा संज्ञानाशो हृ
दिग्रहः स्वेप्योरक्तं विसृजति तंद्रास्यात्स्तब्धनेत्रता तत्राप्येते विशेषात्स्युर्मृत्युर्वाक् त्रिवासरात् निष ५२

न्निसन्निपातोयंकथितःपाकलाभिधः हीनप्रवृद्धमध्येस्तुवातपित्तकफैश्चयः तेनरोगास्तएवोक्तायथा
दोषवलाश्रयाः हृदयंदह्यतेत्यर्थंयकृत्प्लीहांत्रफुफ्फुसाः पच्यंतेत्यर्थमूर्ध्वाधःपूयशोणितनिर्गमः शीर्ण
दन्ताश्चमृत्युश्चतत्राप्येतद्विशेषः त्रिषुभिस्सन्निपातोऽयंयाम्यनामाप्रकीर्त्तितः प्रवृद्धमध्यहीनैस्तुवात
पित्तकफैश्चयः तेनरोगास्तएवोक्तायथादोषवलाश्रयाः प्रलापायाससंमोहकंपमूर्छारतिभ्रमाः
मन्यास्तंभेनमृत्युश्चतत्राप्येतद्विशेषतः उक्तःक्रकचनामायंसन्निपातोभिषग्वरैः मध्यहीनप्रवृद्धै
स्तुवातपित्तकफैश्चयः तेनरोगास्तएवोक्तायथादोषवलाश्रयाः अंतर्दाहोविशेषोत्रनचवक्तुंसश
क्यते स्कंमालक्ककेनेवलक्ष्यतेमुरडलं यत्नेनाकर्षितःश्लेष्माहृदयान्नप्रसिच्यते इषुणेवाहतंया
र्श्वंव्युद्यतेखद्यतेहृदि प्रमीलकश्वासहिक्कावर्द्धतेनुदिनंदिनं जिह्वादग्धाखरस्पर्शागलःशूकै
रिवावृतः विसर्गंनाभिजानातिकूजेच्चापिकपोतवत् अतीवश्लेष्मणापूर्णःशुष्कवक्त्रोष्ठतालु
कः तंद्रानिद्रातिपेतार्त्तोहतवाणिर्हतद्युतिः नचातिलभतेसातिंविपरीतानिचेच्छति आयम्यतेच

मा.प्र. वक्त्रशोषरक्तष्ठीवतिचाल्पशः एषकर्कटकोनामासन्निपातःसुदारुणः हीनमध्यप्रवृद्धेस्तुवातपित्तक
४४ फेष्वथः तेनरोगास्तएवोक्तायथादोषवलाश्रयाः अल्पशूलंकरीतोदोमध्योदाहोरुजाभ्रमः भृशं
क्लमःशिरोवक्त्रमन्याहृदयवायुजः प्रमीलकश्वासहिक्काकासजाड्यविसंज्ञताः प्रथमोत्पन्नमेत
तुसाध्यंतिकदाचन एतस्मिन्सन्निपातेतुकर्णमूलेसुदारुणा पिडकाजायतेजंतोर्ययाकृच्छ्रेण
जीवति सवैदारिकसंज्ञोयंसन्निपातःसुदारुणः त्रिरात्रात्परमेतस्यव्यर्थमौषधकल्पनं अथ
तंत्रांतरे वातोल्वणानांसन्निपातज्वरविशेषाणांत्रयोदशानांशीतांगादीनित्रयोदशनामांतरा
णिलक्षणांतराणिचाह शीतांगस्तिमिलोह्वक्त्रगएतेतंद्रीप्रलापीततोरक्तष्ठीवयिताचतत्रगणे
तःसंभुग्ननेत्रस्तथा साभिन्यासकजिह्वकश्चकथितःप्राक्संधिगोथांतकोरुग्दाहःसहचित्तविभ्र
मःहृद्ग्रहोकर्णककण्ठग्रहो तंद्रीतंद्रिकः प्रलापीप्रलापकः रक्तष्ठीवीरक्तष्ठीवयिता भुग्ननेत्रः अ
भिन्यासः कर्णग्रहःकर्णकः कण्ठग्रहःकंठकुब्जकः अथतेषांप्रत्येकंलक्षणानि हिमशी ४४

शिरश्शरीरः सन्निपातज्वरीयः श्वसनकसनहिक्कामोहकंपप्रलापैः क्लमवक्त्रकफतांतद्द्रहवस्थ्यंगपी।
डास्वरविकृतिनिरार्त्तः शीतगात्रः सशूकः १ तंद्रातिवृततस्तृषातिसरणंश्वासोऽधिकः कासरुक्संत
मातितनुर्गलेस्वपथुनासार्द्धचकण्ठःकफः सुश्रूषामारसनाल्कसः श्रवणपोर्मद्ध्यश्चदाहस्तथायत्र
स्यात्सहितंद्विकोनिगदितोदोषत्रयोत्थोज्वरः २ यत्रज्वरेनिखिलदोषनितांतरोषजातेप्रलापवक्तृ
तासहसोत्थितिश्च कंपव्यथापतनदाहविसंज्ञताःस्युःनाम्नाप्रलापकइतिप्रथितःपृथिव्यां ३
निष्ठीवोरुधिरस्यपक्वसदृशः कुलंतनौमंडलंलोहित्यंनयनेतृषाप्रचिवमिश्वासातिसारभ्रमाः आ
ध्मानंचविसंज्ञताचपतनंहिक्कांगपीडान्नशंरक्तष्ठीविनिसन्निपातजनितेलिंगंज्वरेजायते ४ भग्नां
नयनवक्रताश्वसनकासतंद्राभ्रमाःप्रलापमदवेपथुश्रवणहानिमोहास्तथा अतोनिखिलदो
षजेभवतियत्रलिंगंज्वरेपुरातनचिकित्सकैःसहभुग्ननेत्रोमतः ५ दोषास्तीव्रतराभवंतिब
लिनःसर्वेपियत्रज्वरेमोहोतीवविचेष्टताविकलताश्वासोभृशंमूकता दाहश्चिकणमाननं

चदहनोमंदोवलस्यक्षयःसोभिन्यासइतिप्रकीर्त्तितइहप्राज्ञैर्नैघण्टिःपुरा ६ त्रिदोषजनितेज्वरेभवेते
यत्रजिह्वाभृशंहताकठिनकंटकैस्तदनुमूकतामृता श्रुतिहतिर्वलहतिश्वसनकाससंततयःपु
रातनभिषग्वरास्तमिहजिह्वकंचक्षते ७ यथातिशयिताभवेत्स्वयथुसंयुताःसंधयःप्रनष्टकफता
मुखेविगतनिद्रताकासरुक समस्तमितिकीर्त्तितंभवतियत्रलक्ष्मज्वरेत्रिदोषजनितेवुधैःसहि
गद्यतेसंधिगः ८ यस्मिन्क्षणमेतदन्तिशीतकलेदोषैरुदीतेज्वरेजस्रंमूर्द्धविधूननंसकसनंसर्वांगपी
डाधिका हिक्काश्वासश्चदाहमोहसहितादेहेतिसंततताचैकल्पंचतृषाचवांसिमुनिभिःसंकीर्त्तितः
सोंतकः ९ दाहोधिकोभवतियत्रतृषाचतीव्राश्वासप्रलापविरुचिभ्रममोहपीडाः मन्याहनुग्रथ
नकण्ठरुजाश्रमश्चरुग्दाहसंज्ञउदितस्त्रिभवोज्वरोऽयं १० गायतिनृत्यतिहसतिप्रलपतिविकृतं
निरीक्षतेमुह्यते दाहव्यथाभयार्त्तोदोषत्रयचित्तविभ्रमज्वरवान ११ निःशेषदोषजनितज्वरतो
षजन्मास्यात्कर्णमूलविषयेश्वयथुर्व्यथाच कंठग्रहोवधिरताश्वसनप्रलापप्रस्वेदमोहदहना। ४५

निचकर्णकाख्ये १२ कंठःशूकशतावरुद्धवदतिश्वासःप्रलापोरुचिर्द्दाहोदेहरुजातृषापिचहनु।
स्तंभःशिरोर्त्तिस्तथामोहोवेपथुर्नासहेतिसकलंलिंगंत्रिदोषज्वरेयत्रस्यात्सहिकंठकुब्जउक्तः।
प्राज्ञैश्चिकित्स्योबुधैः १३ संधिगस्तेषुसाध्यःस्यात्तंद्रिकश्चित्तविभ्रमः कर्णकोभिकाकः कंठकुब्जः
पंचापिकष्टकाः रुग्दाहस्त्वतिकष्टेनसंसाध्यस्तेषुभाषितः रक्तष्ठीवीभुग्ननेत्रःशीतगात्रःप्रला।
पकः अभिन्यासोंतकश्चैतेषडसाध्याःप्रकीर्तिताः अथतंत्रांतरे वातोल्बणादीनांसन्निपातज्व
रविशेषाणांत्रयोदशानांकुंभीपाकादीनांकुंभीपाकादीनित्रयोदशनामांतराणिलक्षणांतराणि
चाह कुंभीपाकःप्रोर्णुनावःप्रलापीह्यंतर्दाहोदंडपातोंतकश्च एणीदाहश्चाथहारिद्रसंज्ञोभेदा
एतेसन्निपातज्वरस्य अजघोषभूतहासौयंत्रापीडश्चसंन्यासः संशोषीचविशेषास्तस्यैवोक्तास्त्र
योदशच अथैषांलक्षणानि घोणाविवरात्स्रवद्रक्तंशोणासितलोहितंसार्द्रं विलुठन्मस्तक
मनितःकुंभीपाकेनपीडितंविद्यात् १ उत्क्षिप्यपयःस्वमंगंक्षिपत्यधस्तान्नितांतमुच्छ्वसिति तां।

श्रोर्णेनावजुष्टं विचित्रकष्टं विजानीयात् २ स्वेदश्रमाङ्गमर्दाः कंपोद्वपुर्मथा करोवगात्रं चकुर्वतीदंष्ट्र
लापिजुष्टस्यजायतेलिंगं ३ अंतर्दाहः शैत्यमथबहिश्चयस्यापिसंततःश्वासः अंगमिवदग्धकल्पं सो
तर्दाहार्द्दितः कथितः ४ नक्तं दिनं न निद्रामुपैति गृह्णाति मूढधीर्नजसः उत्थायदण्डपाते भ्रमातुरः
सर्वतोभ्रमति ५ नभसो गृह्णाति श्वाकाश्यात्किंचिन्महीतुं करौप्रसारयतीत्यर्थः संपूर्यते शरीरं ।
ग्रंथिभिरभितस्तथोदरं मरुता श्वासातुरस्य सततं विचेतनस्यां तकत्रस्य ६ परिधावती वगात्रे रु
कपात्रे भुजगपतंगहरिणगणः वेपथुमतः सदाहस्येणी दाहज्वरार्त्तस्य ७ रुकयात्रे पीडाभाजने
गात्रस्य विशेषणमेतत् यस्यातिपीतमंगं नयने सुतरां मलं ततोप्यधिकं दाहोतिशीततावहिरस्य
सद्दारिद्रकोज्ञेयः ८ छगलकशरीरगंधः स्कंधोरुजवान्निरुद्धगलरंध्रः अजघोषसन्निपाताद्दाता
म्रात्तः पुमान्भवति ९ शब्दादीनधिगच्छति नस्वान्विषयानपदिंद्रियग्रामः हसति प्रलपति पुरुषः
सज्ञेयोभूतहासार्त्तः १० येन मुहुर्ज्वरवेगाद्यंत्रेणेवावपीड्यते गात्रं रक्तं पीतं च वमेद्यंत्रापीडः सवि

ज्ञेयः ११ अतिसरति वमति रूजति गात्राण्यपन्नितच्छिरं नरः क्षिपति संन्याससन्निपाते प्रलपति भुग्ना
क्षिमण्डलो भवति १२ मेचकवपुरतिमेचकलोचनयुगलोऽवलोमलोत समगति संज्ञोपिपिणिसितय
ट्टिकामंडलयुक्तो ज्वरे भवति १३ नारायणएवन्निषग्भेषजमेतेषु जान्हवीतोयं नैरुज्यहेतुरेको नि
त्यं मृत्युंजयो ध्येयः अथासाध्यसन्निपातज्वरस्य लक्षणमाह सन्निपातज्वरस्यांते कर्णमूले सुदारु
णः शोथः संजायते तेन कश्चिदेव प्रमुच्यते सुदारुणः मारकत्वात यतस्तेन शोथेन कश्चिदेव प्रमु
च्यते कोपिजीववृंत्पजत इत्यर्थः सन्निपातज्वरान्कष्टानसाध्यान परे जगुः दोषे विरुद्धे नष्टेग्नौ स
र्वसंपूर्णलक्षणः सन्निपातज्वरोऽसाध्यः कष्टसाध्यस्ततोन्यथा दोषे पित्तकफे विरुद्धे अपक्के सर्व
संपूर्णलक्षणः सर्वाणि दाहशीतादीनि संपूर्णानि अन्यूनानि प्रोक्तानीति यावत लक्षणानि य
स्यसः ततोऽन्यथा दोषे पक्के अग्नौ दीप्ते स्वल्पलक्षणकः कष्टसाध्य इत्यर्थः अथ सामान्यतः स
न्निपातज्वरस्य चिकित्सा सन्निपातार्णवे मग्नं योभ्युद्धरति मानवं कस्तेन न कृतो धर्मः कांच प्र

ज्ञांनसोऽर्हति मृत्युनासहयोद्धव्यंसन्निपातचिकित्सता यश्चतत्रनवेजेतासजेतायमसंकुले श्लेष्मनिग्र
हमेवादौकुर्य्याद्व्याधौत्रिदोषजे निरस्तेश्लेष्मणिह्युत्रस्रोतसस्यद्वारितेषुच लाघवंजायतेसद्यस्तस्माच्चैवोप
शाम्यति भेडोप्याह सन्निपातज्वरेपूर्वंकुर्य्यादामकफापहं पश्चात्श्लेष्मणिसंक्षीणेशमयेत्पित्तमारु
ताविति ननुतंत्रांतरे प्रथमंपित्तस्यप्रतिक्रियाप्रोक्ता यथा शमयेत्पित्तमेवादौज्वरेषुसमवायिषु
दुर्न्निवारतरंतद्धिज्वरार्त्तेषुविशेषतइति अन्यत्रापि समवायेहिदोषाणांपूर्वंपित्तमुपाचरेत् ज्वरेचैवा
तिसारेचसर्वत्रान्यत्रमारुतमिति तथान्यत्रप्रथमंवायोःप्रतिक्रियाप्रोक्ता यथा वातस्यानुजयेत्पि
त्तंपित्तस्यानुजयेत्कफंइति तत्रव्यवस्थामाहतंत्रांतरे ज्वरेत्रिदोषजेसामेशमयेत्प्रथमंकफं जीर्णत्या
मेजयेत्पित्तंनिरामेत्वनिलंजयेदिति प्रथममितिस्यान्नत्रयेपिसंबाध्यते अन्येत्वितिसमादधते त्रया
णांवर्जयेत्पूर्वंतस्यःस्यात्फलवत्तरइति तथाच संसर्गेयोगरीयान्स्यादुपक्रम्यस्सवैभवेत् शेषदो
षाविरोधेनसंनिपातेतथैवचेति संसर्गेदोषद्वयसंसर्गेगरीयान्बलवत्तरः अंशांशंयत्रदोषाणांवे

वेकुंनैवशक्नुयात् क्रियांसाधारणींतत्रविदधीतचिकित्सकः लंघनंवालुकास्वेदोनस्यंनिष्ठीवनंतथा
अवलेहांजनंचैवप्राक्प्रयोज्यंत्रिदोषजे ज्वरइतिशेषः ननुक्रियायास्तुगुणालाभेक्रियामन्यांप्रयोज
येत् पूर्वस्यांशांतवेगायांनक्रियासंकरोहितइतिवचनात् क्रियासंकरस्यनिषिद्धत्वात्कथमत्रन
स्यष्ठीवनावलेहांजनानियुगपद्विधायंतइत्याशंकायामाह क्रियाभिस्तुल्यरूपाभिः क्रियासांकर्य्य
मिष्यते भिन्नरूपतयैतास्तुनहिकुर्वंतिदूषणं तत्रलंघनस्यविधिमाह त्रिरात्रंपंचरात्रंवादशरात्रम
थापिवा लंघनंसन्निपातेषुकुर्य्याद्वारोग्यदर्शनात् लंघनेत्रिरात्रादिविकल्पउल्वणवाताद्यपेक्ष
या दोषाणांशीघ्रमध्यमंदशक्तिकत्वात् व्याधिस्वभावाच्च आरोग्यदर्शनादिति यावदारोगतादर्
शनंस्यात्तावद्वालंघनंकुर्य्यादितेनत्रिरात्राद्यवधेरनियतत्वंसूचितं अतएवसुश्रुतःप्राह सप्तमे
दिवसेप्राप्तेदशमेद्वादशेपिवा पुनर्घोरतरोभूत्वाप्रशमंयातिहंतिवा घोरतरइतिघोरःस्वभावादे
वतदाघोरतरोभूत्वेति हननप्रशमनयोःकारणमाह पित्तकफानिलवृध्यादशादिवसद्वादशाह

उदरस्याविष्टंभः गौरवं जा आलस्यं ४

भा॰प्र॰ सप्ताहात् हंति विमुंचत्यथवा त्रिदोषजो धातुमलपाकात् त्रिदोषजो ज्वर इति शेषः धातुमलपाकात्
४८ धातुपाकात् हंति मलपाकाद्विमुंचतीत्यर्थः धातुमलपाके प्राक्तनकर्मैव हेतुः तत्र यदि जीवनसं।
वर्द्धनकं कर्मास्ति तदा मलपाकोऽन्यथा धातुपाकः स च रसादिशुक्रांतधातूनां पाको बोधव्यः तत्र धा
तुपाकस्य लक्षणमाह निद्रानाशो हृदि स्तंभो विष्टंभो गौरवारुची अरतिर्बलहानिश्च धातूनां पाक
लक्षणं अन्यच्च सवाधमानो हृदि नाभिदेशे गात्रेषु वा पाकरुजायुतेषु पीडां ज्वरार्तोंगुलिनिष्पी
ड्नेत्स धातुपाकी कथितो भिषग्भिः अथ अपरश्च नाभेरूर्ध्वं हृद्दोषस्तात्पीड्यते चेद्यथा भवेत् धा
तोः पाकं विजानीयादन्यथा तु मलस्य च मलपाकलक्षणमाह दोषप्रकृतिवैकृत्यं लघुता ज्वर।
देहयोः इंद्रियाणां च वैमल्यं मलानां पाकलक्षणं दोषप्रकृतिवैकृत्यं दोषा वातादयस्तेषां प्रकृते
र्वेपथुदाहगौरवादिकरणं तस्या वैकृत्यं वैपरीत्यं वैमल्यं मलराहित्यं मलानां दोषाणां। अन्यच्च
स्पष्टत्वेंद्रियपंचकस्य पटुता वन्हेश्च यत्र क्रमाच्छ्लादिप्रशमो ज्वरस्य मृदुता तं दोषपाकं वदेत् हन्ना ४८

स्वस्वविषये सामार्थ्यं १

म्योरतिवेदनातिसरणंतीव्रोज्वरस्तृषामदः श्वासाधिक्यमरोचकोरतिरितिस्यात्पक्वातुपाकाकृतिः आ
मस्याधिक्येनसप्तमदिवसाद्यवध्यतिक्रमे परमावधिमाहहारीतः सप्तमीद्विगुणायावन्नवम्येकाद
शीतथा एषात्रिदोषमर्य्यादामोक्षायचवधायच नवम्येकादशीचागमनदिवसंविहायवोध्या
तेनागमनदिवसंनीत्वादशमीद्वादशीच अत्ररात्रिरित्यध्याह्रीयते सन्निपातज्वरीपूर्वंसम्यकलं
घनमाचरेत् शृतंशीतंपिबेत्तोयंसमयेभेषजंभवेत् सन्निपातेनतष्णंतंपार्श्वरुक्तालुशोषिणं यः
यापयेज्जलंशीतंसमृत्युर्न्नरविग्रहः शीतमत्रकथितं शृतशीतंतुविहितमेव इतिलंघनं अथवालुका
स्वेदः वातश्लेष्मकृतेस्वेदान्कारयेद्दूहनिर्मितान् स्निग्धस्वेदोनिषिद्धोत्रविनाकेवल वातजान् अ
त्रवालुकास्वेदःकर्त्तव्यस्तुगुणंपूर्वोक्तं खर्प्परस्थपटस्थितकांजिकसंसिक्तवालुकास्वेदः शमय
तिवातकफामयमस्तकस्त्रूलांगभंगादीन् स्रोतसांमार्द्दवंकृत्वानीत्वापावकमाशयं हत्वावातक
फस्तंभंस्वेदोज्वरमपोहति इतिवालुकास्वेदः अथनस्यं सैंधवंश्वेतमरिचंसर्षपाःकुष्टमेवच वस्त

मधुवासार मरिच

भा·प्र· मूत्रेणसंपिष्टंनस्यंतंद्रानिवारणं श्वेतमरिचंशिग्रुवीजं सैंधवादिनस्य मधूकसारसिंधूत्थवचोषण

४९ कणास्समाः श्लक्ष्णंपिष्ट्वांभसानस्यंदद्यात्संज्ञाप्रबोधनं मधूकसारादिनस्यं मातुलुंगार्द्रकरसंकोष्णंलि

सैंधवगोवरसाभव

लवणान्वितं अन्यद्वासिद्धविहितंनस्यंतीक्ष्णंप्रयोजयेत् तेनप्रभिद्यतेश्लेष्माप्रभिन्नश्चप्रसिच्यते शि

रोहृदयकंठास्यपार्श्वरुक्चोपशाम्यति मोहाभयेनमुग्धंवोधयितुंयाहशाःचाक्रः कल्पतरुनामधेयो

रसोनतास्त्कपरंकिंचित् इतिनस्यं अथनिष्ठीवनं जिह्वातालुगलक्लोममरुतपित्तेनचोत्थितः तदा पित्तस्या

स्वाच्चरेच्छोषंजिह्वायाःखरतांतथा स्फुरनंचतदाजिह्वांलेपयेन्मधुघिष्टया द्राक्षयासाज्ययातेन

जिह्वास्यात्सरसामृदुः आर्द्रकस्यरसोपेतंसैंधवंकटुकत्रयं आकरावाधारयेदास्येनिष्ठीवेच्चपुनः पु॰

तेनास्यहृदयक्लोममन्यापार्श्वशिरोगलात् लीनोप्याकृष्यतेश्लेष्मालाघवंचास्यजायते पर्वभेदोज्वरो

मूर्छानिद्राश्वासगलामयाः मुखाक्षिगौरवंजाड्यमुत्क्लेशश्चोपशाम्यति सकृद्द्वित्रिचतुःकुर्याद्दृष्ट्वा

दोषबलाबलं एतद्धिपरमंप्राहुर्भेषजंसन्निपातिनां इतिकवलग्रहः सुकुंसूतंद्विधागंधंजेपालंहरि। ४९

सज्जीजवाक्षार। चित्रकं
मैनशिला

तालकं कुनटीकुष्ठकं हारोवेलाजाजीफलं विषं टंकणं सैंधवं चोकं त्र्यूषणं त्रिफलाग्निकं लवंगसम
भागं च गृहीत्वा क्षिप्त्वा खलेत् धत्तूरदलमूलस्वरसेन मर्दयेत्पुनः दिनमेकं कलायैकप्रमिता क्रियते
वटी निर्गुंड्यार्द्रकरसैर्मरिचैः पंचभिस्तथा दातव्येयमवाच्येषु संनिपातार्त्तजंतुषु वस्त्रवेष्टितदेहे
षु मंदाग्नौ विषमज्वरे एकाहिके द्व्याहिके च त्र्याहिके चातुरान्हिके नित्यं चाग्ंबुकेवालेर्वलाग्निवलेत।
या पर्णखंडेन वा देया वटिकेयं रसायनी इत्यवाच्यवाचिका वटी अथावलेहः कट्फलं पौष्क
रं शृंगी शोषं पासश्च कारवी श्लक्ष्णान्चूर्णिकृतं चैतन्मधुना सह लेहयेत् एषावलेहिका हंति सन्नि
पातं सुदारुणं हिक्कां श्वासं च कासं च कंठरोगं च नाशयेत् एतद्ग्राह्यं कफोद्रेके चूर्णमा
र्द्रकजैः रसैः तंत्रांतरे चोक्तं त्र्यूषणं मधुना लिह्यादार्द्रकस्वरसेन च संमोहं दारुणं हन्यात्तंद्राका।
श्वासमन्वितमिति सर्वेषु सन्निपातेषु नद्योऽमबं वारयेत् शीतोपचारिक्तोऽकं स्यात् छीतं चात्र विरु
ध्यते अयमभिप्रायः सन्निपातज्वरेषु श्लेष्मनिग्रहार्थं सर्वदा स्वेदो हितकृक्कः तत्राग्निसंवन्धाद्देह।

नरधात २ एतद्योग्या दि: ४

भो·प्र·

५०

स्योष्णतातिक्षैक्ष्ण्यवत्वेनमधुनोविरोधः उक्तंचसुश्रुतेन उष्णैर्विरुध्यतेसर्वंविषान्वयतयामधु उष्णार्त्तमु
ष्णैरुष्णंचतन्निहंतियथाविषमिति शीतोपचारिश्चेतोक्तमिति शीतेनोपचारोस्यास्तीतिशीतोपचारि
शीतस्यात्रसन्निपातेविरुध्यते अयमवलेहः प्रायेणोर्ध्वजत्रुजरोगहरत्वात्सायमुपयुज्यते यतउक्तं
चरकेण ऊर्ध्वजत्रुगदघ्नीयासासायमवलेहिका अधोरोगहरीयासाभोजनात्प्राक्प्रयुज्यते पौष्क
रंपुष्करमूलं तदलाभेकुष्ठंदेयं शृंगीकर्कटशृंगी व्योषत्रिकटु।या। सोपवासः केचिद्यासस्था
नेयवानींप्रक्षिपंति कारवीमगरेलइतिलोके अथधात्र्यवलेहिका स्विन्नमामलकंपिष्ट्वाद्राक्षया
द्वयासहमेलयेत् विश्वभेषजसंयुक्तंमधुनासहलेहयेत् तेनास्यनश्यतिश्वासः कासेमूर्छारु
चिस्तथा इत्यवलेहः अथांजनं शिरीषबीजगोमूत्रकृष्णामरिचसैंधवैः अंजनंस्यात्प्रबोधाय
सरसोनशिलावचैः शिरीषबीजाद्यंजनं अथयोरजः श्वेतलोध्रमरिचंचांजनंतथा गोपित्तेनसमा
युक्तंतंद्रानाशनमुत्तमं गोपित्तंगोरोचना लोहचूर्णाद्यंजनं अंजनंसम्यगारक्तंमधुसिंधुशिलोषणैः ५०

लोहचूर्णो सुरमा

प्रमोहप्रेहिमवतिभाषितंभिषजांवरैः शिलःमनःशिला ऊषणंमरिचं इत्यंजनं सूतंविषंचमरिचं
तुत्थकंनवसादरं चूर्णितंस्वरसैर्मर्द्यधूर्त्तपत्ररसोनयोः संनिपातकृते मोहेमूर्द्ध्निलिंपेत्पदोपरिः
अस्थित्वयास्वनेनैवलेपंकुर्य्यात्पदोपरि पदंपच्छनाइतिलोके विल्वश्योनाकगंभारीपाटलाग
णिकारिका पाचनंवातकफहृत्पंचमूलमिदंमहत् शालिपर्णीपृष्ठिपर्णीवृहतीकंटकारिका
गोक्षुरोवातपित्तघ्नंकनीयंपंचमूलकं उभयंदशमूलंतत्पिप्पलीचूर्णसंयुतं सन्निपातज्वरंहं
तिहृत्कण्ठग्रहनाशनं तंद्रावातकफातंकश्वासपार्श्वार्त्तिकासनुत् महांतियानिमूलानिका
ष्ठगर्भाणिपानिच तेषांतुवल्कलंग्राह्यंह्रस्वमूलानिकृत्स्नशः अत्रविल्वादीनांपंचानांमूलानां
वल्कलंग्राह्यं दशमूलक्वाथः दशमूलीकषायस्तुसपौष्करकणान्वितः सन्निपातज्वरेदेयः
श्वासकाससमन्विते द्वादशांगःक्वाथः विरज्वरेवातकफोल्वणेवात्रिदोषजेवादशमूलमिश्रः
किराततिक्तादिगणप्रयोज्यःशुण्ठ्यपिनैवात्रिवृताविमिश्रः तद्यथा किराततिक्तकोमुस्तंगुडू

चीविश्वभेषजं किरातादिर्गणोह्येषचातुर्भद्रकमित्यपि चतुर्दशांगःक्वाथः दशमूलीसटीशृंगीपौष्क
रंसदुरालभं भार्गीकुटजवीजंचपटोलंकटुरोहिणी अष्टादशांगइत्येषसन्निपातज्वरापहः कासहृ
द्ग्रहपार्श्वार्त्तिश्वासहिक्कावमीहरः अष्टादशांगक्वाथः भूनिंवदारुदशमूलमहौषधाद्दतिक्तेंद्र
वीजधनिकेभकणाकषायः तंद्राप्रलापकसनारुचिदाहमोहश्वासत्रिदोषजनितज्वरनाशनः
स्यात द्वितीयोष्टादशांगः एतस्यैवगुणाउक्तोवंगसेनेन अष्टादशांगइत्येषमृत्युकल्पंज्वरंजये
दिति अथसन्निपातज्वरेरसाः विषंत्रिकटुकंगंधंटंकणंमृतशुल्वकं धत्तूरस्यचवीजानि ताम्रं
हिंगुलंनवमंस्मृतं एतानिसमभागानिदिनैकंविजयाद्रवैः मर्द्दयेच्चणकाकाराःकर्त्तव्यावटिका
यसा भक्षणीयानुपातश्चोरविम्लकषायकः मृतसंजीवनीनाम्नासन्निपातज्वरेमता मृतसंजी
वनीरसरत्नप्रदीपे शुद्धसूतसमंगंधंसूतांशंमृतताम्रकं त्रिभिस्तुल्यैर्गवांक्षीरैर्मर्द्दयेदातपेतेखरे
मर्द्दयेद्दिनमेकंतुनिर्गुंडीशिग्रुजद्रवैः विधायगोलकंगोलमंधमूषागतंचरेत् त्रियामंवालुका ५१

यंत्रे ततः खल्वे विचूर्णयेत् अष्टमांसं विषं तत्र क्षिपेत्तेनापि मर्दयेत् त्रिनेत्राख्यो रसो ह्येष देयो गुं
जाद्वयोन्मितः पंचकोलकषायेण छागीदुग्धेन वा सह रसेनानेन भुक्तेन सन्निपातज्वरो महान्
संक्षयं व्रजति क्षिप्रं कर्त्तव्यो नात्र संशयः त्रिनेत्रो रसः संनिपातज्वरे रसरत्नप्रदीपे भस्मषोडशा
द्द निष्कं स्याद्दारदापोपलसंभवं मरिचं निष्कमात्रं च विषं निष्कं विचूर्णयेत् रसो भस्मेश्वरो
नाम्ना सन्निपातज्वरांतकृत् एक गुंजामितो भक्ष्य आर्द्रकस्य द्रवेण हि भस्मेश्वरो रसः रसेंद्रचि
तामणौ अमृतवराटकमरिचैर्द्धिरपंचपनवएभागयोजितैः रचिता वटिका मुद्गसमाना क
फत्रिदोषाग्निमांद्यहरी इति वटी द्वौ कर्षौ सूतकाद्ग्राह्यौ गंधकाद्द्वौ तथैव च यत्नतस्तु द्वयं मर्द्य
फरेंबु दिनं हंसपदीरसैः कल्कस्य वटिकां कृत्वा निःक्षिपेत्काचभाजने कर्षैकममृतं तत्र क्षिप्त्वाव
क्तं निरोधयेत् कूपिकायाः परौ नागो वालुकाभिश्च पूरयेत् सार्द्धयावदहोरात्रं तावत्तत्र पचेद्
सं दीपमात्रो नलो देयः स्वांगशीतं तमुद्धरेत् तोलार्द्धममृतं तत्र क्षिपेत्तावत्तथौषधं भक्षितो रक्ते

भा॰प्र॰ कामात्रोरसस्त्वग्निकुमारकः सन्निपातज्वरंहन्यात्कातंमंदाग्नितामपि शूलंसंग्रहणींगुल्मंक्षयंपाण्डुरो
५२ गंतथा श्वासकासादिकान्सर्वान्गदान्नेषविनाशयेत् अग्निकुमारोरसः संनिपातज्वरादिषु। गंधे रसेंद्रचिंतामणौ २
॰रिदं३ शोरंकमरिचंविषंधत्तूरजैर्द्रवैः दिनंसंमर्द्दितंशुष्कंपंचवक्त्रोरसोभवेत् आर्द्रकस्यद्रवेणैषदातव्यो
रक्तिकामितः सन्निपातज्वरंघोरंनाशयेन्नात्रसंशयः ईश्वराः पारदः टंकणः कणः पंचवक्त्रोरसेंद्रचिं
तामणौ अथशीतज्वरेरसाः सूतकंगंधकंचैवहरितालंमनःशिला एकनिष्कंद्विनिष्कंचचतु
र्निष्कंतथैवच पंचनिष्कंरसेष्कारवेल्याः कल्कंप्रकल्पयेत् ताम्रपत्राणितुल्यानितेनकल्के
नलेपयेत् सरावसंपुटेतानिकृत्वातेषामुपर्य्यपि दद्यात्तांपिष्टिकांपश्चात्पुटपाकेनपाचयेत् त
तः संचूर्ण्यदेयरसः शीतारिणभक्षितः पंचैकमात्रयाहंतिघोरंशीतज्वरंध्रुवं पाराटंक१ गंधकटंक
२हरितालटंक४मेनशिलटंक५।ताम्रटंक१२ शीतज्वरारिःरसः प्रदीपे पारदंगंधकंतुल्यंदरदं
चविषंसमं विषाद्द्विगुणंयोज्यंमरिचंविश्वभेषजं अभ्रगंधाथविजयाकासमर्दकविल्लकाःचतु ५२

कसौंदी१ कटैला१
वृश्चकमर्दक१

णंचिरसेरेतच्चूर्णंयत्नेनमर्द्दयेत् तुलस्यास्तुदलैः सार्द्धंभक्षितोरक्तिकामितः हंतिशीतज्वरंघोरं
नाम्नायंशीतकेशरी शीतगजकेशरीरसो रसप्रदीपे रसकंतालकंतुत्थंपारदंगंधटंकणं सर्व
मेतत्समंशुद्धंकारवेल्ल्याद्रवैर्द्दिनं मर्द्दयेत्तेनशुद्धस्यरसकादिसमस्यतु ताम्रस्यसंपुटस्यांतर्लिंपे
द्द्व्यंगुलोन्मितं तस्यचैवबालुकायंत्रेयवायावत्स्फुटंतितिहि शीतलंतद्विगृह्णीयात्ताम्रपात्रोदराद्वि
षक् शीतभंजीरसोमाषमात्रोमरिचसंयुतः भक्षितःपर्णखंडेननाशयेद्विषमज्वरान् शीतभंजी
रसः शीतज्वरादिविषमज्वरेषुरसेंद्रचिंतामणौ तालकंशुक्तिकाचूर्णंतुल्यंतत्रोभयोरपि नवमां
संतुथ्यकस्यान्मर्द्दयेत्कन्यकाद्रवैः तत्सर्वंशुष्कमुपलैर्वन्यैर्गजपुटेपचेत् शीतंतच्चूर्णयेद्दद्याद्गुंजा
मात्रासितायुता प्रभातेभक्षयेत्तेनयांतिशीतज्वराःक्षयं वांतिर्भवतिकस्यापिकस्यापिनभवेत्से पि
शीतभंजीरसःद्वितीयः तालकोदरदोद्भूतपारदोगंधकःशिला क्रमाद्भागार्द्धवर्द्धितंकारवेल्ल्यांबु
मर्द्दितं अनेनास्यप्रमाणेनताम्रपात्रींप्रलेपयेत् अधोमुखींदृढेभांडेतांनिरुध्याथपूरयेत् चुल्ल्यां।

भा·प्र· वालुकयाघस्त्रमग्निंप्रज्वालयेद्दृढं शीतंसंचूर्ण्यमाषोऽस्यनागवल्लीदलेस्थितं भक्षितोमरिचैःसा
पत्र र्द्धंसमस्तान्विषमज्वरान् शीतदाहादिकान्हंति पथ्यंशाल्योदनंपयः शीतभंजीरसस्तृतीयः
रत्नप्रदीपे कटुफलंत्रिफलादारुचंदनंसपरूषकं कटुकापद्मकोशीरंविपचेत्कर्षिकंजले
तद्दोषदाहतृष्णाघ्नंपानमात्रेयपूजितं दीर्घकालज्वरार्त्तानामेतत्स्यादमृतोपमं कर्षंकटफला
म्बुशीरंतानांसमुदितानांजलेप्रस्थमितेविपचेत् अर्द्धशेषं कटुफलादिपानंतृष्णायांदाहे
च सन्निपातेषुदाहार्त्तंपयःसिंचेच्छीतवारिणा आतुरःसकंपंजीवेन्निषांवासकंपंभवेत् एष
सन्निपातिदाहेशीतांबुसेकनिषेधोरुग्दाहादन्यत्रतत्रवाप्याद्यवगाहनस्योक्तत्वात् अथात्र
माह दुःस्पर्शगोक्षुरस्नुक्क्रासिद्धमाहारमर्प्पयेत् दोषशांतिबलार्थंत्रिदोषज्वरिणेभिषक्
दुःस्पर्शोयवासः आहारमुचितमन्ने लाजसक्तून्समश्नीयात्सैंधवेनसमन्वितान् तेचजी
र्णस्यविघ्नेनज्वरोजीवेत्तदाध्रुवं इतिकेचित् रक्तपित्तेहितंत्वेतत्पादाहज्वरेषुच लाजा

भा·प्र· चिकित्सितं पर्पटादिक्काथः किराततिक्तकंमुस्तंगुडूची विश्वभेषजं पाठोदीच्यंमृणालंचशृतंपि
५४ त्ताधिकेपिवेत् किरातादिसप्तकं कफोल्वणस्यचिकित्सा बृहत्योपौष्करंभार्गीसटीशृंगीदुरालभा
वत्सकस्यतुवीजानिपटोलंकटुरोहिणी बृहत्यादिर्गणःख्यातःसन्निपातेकफोत्तरे श्वासादिषुच
सर्वेषुहितःसोपद्रवेष्वपिबृहत्यादिक्काथः अथवातपित्तोल्वणसन्निपातज्वरस्यचिकित्सा वा
तपित्तहरंहृद्यंकनीयःपंचमूलकं तत्क्काथोमधुनाहंतिवातपित्तोल्वणंज्व[illegible]पंचमूलं
अथवातकफोल्वणसन्निपातचिकित्सा किराततिक्तकंमुस्तंगुडूची विश्वभेषजं चातुर्भद्रकमि
त्याहुर्वातश्लेष्मोल्वणेज्वरे चातुर्भद्रकक्काथः अथपित्तश्लेष्मोल्वणसन्निपातचिकित्सा पर्प्प
टक्कटूफलंकुष्ठमुशीरंचंदनंजलं नागरंमुस्तकंशृंगीपिप्पल्यैषंशृतंहितं तृष्णादाहाग्निमांद्ये
षुपित्तश्लेष्मोल्वणेज्वरे पर्प्पटादिःक्काथः अथवातपित्तकफोल्वणसन्निपातचिकित्सा नाग
रंधान्यकंभार्गीपद्मकंरक्तचंदनं पटोलंपिचुमंदश्चत्रिफलामधुकंवला शर्कराकटुकामुस्ता ५४

गजाह्वाव्याधिघातकः किराततिक्तममृतादशमूलीनिदिग्धिका योगराजोनिहंत्येषसन्निपातंत्रिको
ल्वणं सन्निपातसमुत्थानंमृत्युमप्यागतंजयेत् गजाह्वागजपिप्पली व्याधिघातःआरग्वधः निदिग्धि
का क्षुद्रगुणपार्थपृथकपठितायोगराजक्काथः अथप्रवृद्धमध्यहीनवाताद्विजनितसन्निपातज्वराणांष
णांतंत्राणचिकित्सामाह प्रवृद्धंकर्शयेद्दोषंक्षीणंसंवर्द्धयेद्भिषक् चिकित्सेयंविधातव्यादोषयोर्वृद्धि
हीनयोः अस्यायमर्थः प्रवृद्धंदोषंकर्शयेत् तत्क्षेणहेतुभिरौषधान्नविहारैःकृशीकृत्यसा
मीकुर्य्यात् क्षीणंदोषंतद्वृद्धिहेतुभिरौषधान्नविहारैर्वर्द्धयित्वासमीकुर्य्यादित्यर्थः प्रवृद्धस
मितेदोषेमध्यमःस्वयमेवहि शांतिंयातिशमंनीतेत्वनुवंध्येनुवंधवत् अस्यायमर्थः वर्षासुवा
युरनुवंध्यःसेव्यःप्रधानमितियावत् पित्तश्लेष्माणावनुवंधौवायोरनुचरौ शरदिपित्तमनुवंध्यं
वातकफौनुवंधौ वसंतेकफोनुवंध्योवातपित्तेअनुवंधौ तत्रयथानुवंध्येप्रशमंनीतेनुवंधः
स्वयमेवशांतिंयाति तथाप्रवृद्धेदोषेसमितेक्षासयित्वाशमीकृतेमध्यमोदोषःहिनिश्चयेनस्व

यमेवशांतिंयाति प्रकृतोभवतीत्यर्थः अथशीतांगादीनांत्रयोदशसन्निपातज्वराणांविशिष्टचि
कित्सा तत्रशीतांगस्यचिकित्सामाह भास्वन्मूलंजीरकंव्योषभार्गीव्याघ्रीशुंठीपुष्करंगोजलेन ।
सिद्धंसद्यःशीतगात्रार्तिमोहश्वासश्लेष्मोद्रेककासान्निहंति भास्वन्मूलमर्कमूलं काकोटिकाकं
दरजःकुलत्थरुक्षाक्वाकट्फलरुक्ष्ठजीरैः किराततिक्तानलकंदकुलांबुयष्ट्याविसक्तेनम
अयास्तं कर्कोटिकाकंदरषषसामूलरजःचूर्णः रसविषमस्विन्महेशप्रियफलमस्मैकरभू ।
चवुध्वर्वसुभिः८ भागोर्मितमुद्दूलनमिदममितस्वेदशैत्यहरं दशमूलांभसासिक्तोदशांगः प्रथि
तोगणःसार्द्रकस्वरसःपीतःसजयत्युद्धतंज्वरं अथतंद्रिकचिकित्सा क्षुद्रामृतानागरपौष्क
राणिकृतानि२ पीतानिशिवायुतानि शुंठीकणाभास्तिरसोषणानिनस्येनतंद्राविजयोल्वणाणे
मरिचकचपर्चंपर्चावचारुक्कमिहरनागरशार्वरीगवाच्यः छलागकजलकल्किताभितांतंन
सिनिहितानुतंद्रिकंजयंति कचंःवालकः पचंपचादारुहरिद्रारुकुध्कुष्टंकृमिहरःवीडं। ५५

नंसरूक्षवः शीतानवतत्रहिताभताः याचनोदीपनःसोलोलाजमंडोयतःस्मृतः दशमूलादिसिद्धा
सुसन्निपातज्वरेहितः सन्निपातज्वरीयस्तुकंपतेप्रलपत्यपि किंचिदेवनजानातिचिकित्सात।
स्यकथ्यते अभ्यंजयेत्पुराणेनसर्पिषापूर्वमेवतं वलारास्नागुडूच्याद्यैस्तैलैश्चपरिषेचयेत वार्त
कोवर्त्तकालावोवार्त्तीकिस्तित्तिरिःशशः कुलिंगश्चरसेनैषांतर्पयेत्तंयथानलं वार्तकः वटेराइति
लोके वर्त्तकावटइतिलोके वार्त्तीकोवातवटकइतिनिघंटुः वगेराइतिलोके कुलिंगोगरवारे।
आइतिलोके सन्निपातेचुधान्नयोभोजयेत्पिपिशितोदनं सकथंनिषजाख्यातुलनतेभनुजाधमः
अथवातोल्वणस्यसन्निपातज्वरस्यचिकित्सा पंचमूलीकषायंतुदद्याद्वातोत्तरेज्वरे भूयोलं
वासुखोष्णंवाहष्ट्वादोषवलावलं पंचमूलीचमहती प्रथमप्राप्तायास्त्यागेवचनाभावात् अथ
पित्तोल्वणसन्निपातज्वरस्यचिकित्सा परूषंनिंवत्रिफलदिवदारुसकट्फलं चंदनंपद्मकं
चैवतथाकटुकरोहिणी पृश्निपर्णीमृतंचैभिः कृषितंशीतलंजलं पित्तोत्तरेनृणामेतत्सन्निपाते

गः पार्वतीहरिद्रा गवाक्षीइन्द्रवारुणी नसिनाशिकायां तुरंगलालालवणोत्तमेंदुमनःशिलामागधि(
कामधूमि नियोजितान्यञ्जनानि श्लिष्टंद्राक्षकंतंद्रांसनिद्रांविनिवारयंति लवणोत्तमंसैन्धवं इन्दुःक
पूरः निद्रांअतिनिद्रांप्रलापकचिकित्सा सतगरवरतिक्तारेवतामोदतिक्तानलदतुरगगंधाना
रतीहारकूराः मलयजदशमूलीशंखपुष्पः सुपक्वाः प्रलपनमुपहन्युः पानतोनातिदूरात् वरति
क्तोत्रपर्प्पटोनतुमहानिंबः तस्यांतरानुरोधात् नलदंलामज्जकंतदलाभात्कुष्ठीरेयाह्वं भारतीब्रा
ह्मी वरंभीइतिलोके हारकूराद्राक्षा सांत्वनैरंजनैर्नस्यैस्तीक्ष्णैस्तिमिरसेवनैः सर्वतोविसतं
चित्तमस्यप्रकृतिमानयेत् अथस्फूर्त्तीविनाशचिकित्सा रोहिकधन्वयवासकवासापर्प्पटगंध
लताकटुकाभिः शर्करयासममेषकषायःस्फूर्त्तीविनाशंदितउपायः रोहिषंरोहिसइतिलो
के गंधलताप्रियंगुः पद्मकचंदनपर्प्पटमुस्ताजातिवराफणचंदनवारि शीतकनिंबयुतंप
रिपक्ववारिभिर्विदिहस्रोणितहारि शीतकंयष्टीमधुकः इहस्फूर्त्तीविनि मधुकमधूकपरू

भा॰प्र॰ षकषायश्चंदनपल्लवदारुसनाथः श्रीपर्णिफलशीतकषायःससितस्तद्धस्याद्स्त्रजयाय
५६ पल्लवंपत्रकं सनाथःसप्रधानः श्रीपर्णिखंभारी१ अथभुग्ननेत्रचिकित्सा तुरंगगंधालव
णोग्रगंधामधूकसारोषणमागधीभिः वस्त्रावबद्धंगुलिसुनान्विताभिर्नस्यंत्वसंभुग्नहशंकरो
ति अथाभिन्यासचिकित्सा शृंगीभार्ग्यभयाजाजीकणाभूनिंबपर्प्पटैः देवदारुवचाकुष्ठ्या
सकटुफलनागरैः मुस्तधान्यकतिक्तेंद्रयवपाठाहरेणुभिः हस्तिपिप्पल्यपामार्गपिप्पली
मूलचित्रकैः विशालारग्वधारिष्टशटीवाकुचिकाफलैः विडगरजनीदार्वीजवानीद्वयसं
युतैः समांशैर्विहितःक्वाथोहिंग्वार्द्रकरसान्वितः अभिन्यासज्वरंघोरंहंतितंद्रांचतत्क्षणात
प्रमोहंकर्णमूलंचसन्निपातांस्त्रयोदशः हिक्कांश्वासंचकासंचतथासर्वानुपद्रवान् शृंग्यादि
ःक्वाथः अथजिह्वकस्यचिकित्सा किराततिक्ताकुलकृत्तकुलिंजकट्फलाकटुतैलयुक्त
अम्लद्रवःसंशमयेज्जसज्ञादोषांस्तुतोदप्रारविर्यथार्द्रं आकुलकृततस्त्रकरकरहाइतिलोके ५६

कुलिंजं कुलिंजनइति लोके अम्लद्रवः वीजपूरादिरसः किरातादिः कवलः शालरपर्णीमालू
रमूलामयमधुप्लुता शंखूकपुष्पीसहितासेव्यावाचांविशुद्धये शालरपर्णीब्राह्मी मूलरमूलं
विल्वमूलं आमयकुष्टं शंचूकपुष्पीशंखपुष्पी शालरपर्णादिरवलेहः चुडानागरपुष्क
रामृतलताब्राह्मीवचासुब्रताभार्गीवासकयामृतोयसुरसाक्काथोजयेज्झिकक्कं विम्बावर्मवि
भावरीयुगवरावत्सादनीवारिदव्याघ्रीनिंबपटोलपुष्करजटास्गदारुनिर्वाकृतः पुष्करंपु
ष्करमूलं तथाचामरसिंहः मूलेपुष्करकाश्मीरपद्मपत्राणिपौष्करे सुब्रतागंधपलाशी
काश्मीरेप्रसिद्धा सुरसातुलसी विम्बादिर्येगांतरवर्मपर्पटः विभावरीयुग्मंहरिद्राद्वयं
हरिद्रा दारुहरिद्राधरात्रिफल वत्सादिनीगुडूची व्याघ्रीकंटकारीरुक्कुष्टं अथसंधिगावि
कित्सा सटीसुरतरूत्तमाः स्थविरदारुरास्नाः समाः सनागरसुधान्विताः पिचुशतावरीसंयु
ताः मृदुज्वलनपाचिताः सहपुरेणसंधिग्रहव्यथाप्रहृतयेत्वयाशिशिरसेवनंमाकृथाः ३

न॰ मात्रिफलास्थविरदारुहस्तदारु सुधागुडूची पुरोगुग्गुलुः वचा कयचकञ्चुरात्पहस्वरामता
भंगुरासुराकघननागराऽतरुणएव्यरुरास्नापुराः हषातरुणभीरुनिःसहुलवंतिसंधिग्रहक्षयो
रुजडिमिल्कमश्रमणपद्वघातकुहः कवचःपर्प्पटः कञ्चुरायवासः भंगुरातिविषा सुराकंदे
वदारु श्रतरुणदारुस्कदारु पुरोगुग्गुलुःहषव्हहंती एरंडवत्पत्रविरया तदलाभेदंतीच।
ग्राह्या समानगुणत्वात् तरुणःएरंडः भीरुःशतावरी सुरदारुसटीसुधालतासुवहाःशुंवी
युताश्र्वताजले सपुराःशमयंतिसेविताःसततंसंधिगतंसदागार्ति सुवहारास्ना मुस्तैरंडप्राण।
दावाणदारुछिन्नारास्नाभीरुकर्चूरतिक्तं बासाविश्वापंचमूलीयुगार्ल्यंहन्याल्पन्यास्तंभसंधे
ग्रहार्त्तीः प्राणदाहरीतकी वाणःनीलपुष्पःसहचरःतिक्ताकटुका अर्थातके विधिःइहा।
पहायबतसुखवारिज्वरारियूषादिगदापहारि ज्वरछिदंजीवितदंच नित्यंमृत्युंजयंचेतसिविं
तयस्व इहश्रंतके श्रंतलंघनादिनियमं मृत्युंजयस्वरूपनिरूपणंयथा कर्प्पूरस्फुरावदात ५१

वपुषं सतयोगमुद्रायुषं त्राश्रुक्ष्णकंजनेषु भावुकयुषं भालस्फुरत्स्वचुषं संपूर्णामृतकुंभसंभृतक
रंत्रुश्राक्षमालाधरं पिंगोत्तुंगजटाकलापरुचिरं स्वंद्रार्द्धमौलिं स्तुहि। इति भिषग्भिरिह निर्णीतं सन्नि
पातेऽन्तकाभिधे भेषजं जान्हवीतोयं वैद्यो नारायणो हारः अथ रुग्दाहचिकित्सा उशीरश्चंदनो
दीच्यद्राक्षामलकपर्प्पटैः श्रृतं शीतं जलं दद्याद्दाहतृड्ज्वरशांतये षडंगपानीयं सशितो नि
शि पर्युषितः प्रातर्धान्याकतंडुलक्वाथः पीतः शमयत्यचिराद्दंतर्दाहं ज्वरं पैत्तं धान्याकतंडुलाः
कंडितधान्याकानि धान्याकक्वाथः प्रशमयति दाहमचिराद्दधियुक्तकर्कंधुपल्लवैर्लेपः लेपो
हिमकरमलयजनिंबदलैस्तक्रपिष्टैर्वा हिमकरः कर्प्पूरः तथा च घनसारश्चंद्रसंज्ञः स्या(
मरः उत्तानसुप्तस्य गंभीरताम्रकांस्यादिपात्रे निहिते च नाभौ शीतांबुधारा वक्रलापतंती निहंते
दाहं त्वरितं ज्वरस्य च शीतांभसानुशातशाम्य विलोडितेन गव्येन चंदनयुतेन घृतेन दिग्धः दाह
ज्वरी सकमलोत्पलमाल्यधारी क्षिप्रं विशेत्सलिलकोष्ठमनल्पकालं कांजिकार्द्रपटेनावगुं

भा· प्र·
५८

टनंदाहनाशनं अथगोतक्रसंखिन्नशीतलीकृतवाससा अथान्नमाह दाहवम्यर्द्दितंशामंति
रन्नंवल्लयान्वितं शर्करामधुसंयुक्तंपाययेल्लाजतर्प्पणं लाजसक्तुस्स्यंतर्प्पणं वाप्यकमलहा
सिन्योजलयंत्रगृहाःशुभाः नार्य्यश्चंदनदिग्धांग्योदाहदैन्यहरामताः मुक्तावलीचंदनशीतला
नांसुगंधपुष्पांवरभूषितानां नितंबिनीनांसुपयोधराणामालिंगनान्याशुहरंतिदाहं प्रल्हादं
चास्यविज्ञायताःस्त्रीरपनयेत्पुनः हितंचभोजयेदन्नंयेनाप्नोतिसुखंमहत् प्रल्हादंकामकृतं
हर्षं अथचित्तभ्रमचिकित्सा कणोषणोग्रालवणोत्तमानिकरंजवीजत्रपुणदाडिमलानि पथ्या
क्षासिद्धार्थकहिंगुगुणीयुतानिवस्तांबुविमिश्रितानि पिष्ट्वागुटीयंनयनेविधेयाप्रचेतनेतिप्र
चेतनेतिप्रथितान्वितार्या चित्तभ्रमापस्मृतिभूतदोषशिरोर्त्तिरोगभ्रमनाशहेतुः वस्तांबुछा
गमूत्रं कुंभोद्भवतरोरंभोगुडविश्वाकणान्वितं निहितंनसितन्नूनंचित्तभ्रमविनाशनं कुंभो
द्भवतरोरंभःअगस्तिवृक्षत्वग्वल्करसः मुराम्बुदजमेघाक्रमधूकमलयोद्भवैः मरुत्तरुम ५८

भा॰प्र॰ क्रियापूयजित्साव्रणत्वंगतंचकुर्यात्तच्चिकित्सा अयमर्थः अल्पंतंकर्णकं एकःप्रलेपः अस्तंना
५९ शंनयति तच्चिकित्साप्रसंगचिकित्सा निशाविशालामरुत्यमग्निमंथदा गुंदीमूलकृतप्रलेपः
प्रभाकरक्षीरयुतःप्रभावाद्यस्तःसमस्तोप्यथकर्णकघ्नः कुलथ्यःकटुफलंशुंठीकारवीचस
मांशकैः सुखोष्णैर्लेपनंकार्यंकर्णमूलेमुहुर्मुहुः गैरिकंकंटिनीशुंठीकटूफलैःसवचैःसमैः
उष्णैःकांजिकसंपिष्टैःप्रलेपःकर्णकप्रणुत् शिग्रुराजिकयोःपिष्ट्वाकर्णमूलंप्रलेपयेत् कर्ण
मूलभवःशोथस्तेनलेपेनशाम्यति अशिशिरजलपरिमृदितंमस्विकणाजीरसिंधुजंत्वरितं न
स्यविधिसेवितंननुकर्णकरुग्राशाक्रमतितं मार्गिजयायोष्करकंटकारीकटुत्रिकोग्राघन
कुंडलीभिः कुलीरशृंगीकटुकाभ्यासाभिःकृतःकषायःकिलकर्णकघ्नः कुंडलीगुडूचीकुली
रशृंगीकर्कटशृंगी दर्भमूलमत्स्यशाकलाचपलात्रिफलामहौषधकिरातयुतं मस्विंपरि
क्वथितमाशुबलाद्पहंतिकर्णकरुजःसकलाःचपलापिप्पली अथकराठकुब्जचिकित्सा ५९

फलत्रिकत्र्यूषणमुस्तकंड्कीकलिंगसिंहाननशार्वरीभिः क्वाथःकृतःकृंततिकएठकुब्जंकंठी
रवःकुंजरमात्रयुक्त सिंहाननोवासकः किरातकटुकाकणाकुटजकंटकारीसटीकलिंगकि
लिमालयाकटुककटूफलंभोधरैः विषामलकपुष्करानलकुलीरशृंगीवृषैर्महौषधसखैरयं
जयतिकएठकुब्जंगएः शठीकर्चूरः कलिंगःविभीतकः किलिमंदेवदारु कटुकंमस्विं
विषाअतिविषा वृषःवासकः वृषादिभिःकिंविशिष्टैः महौषधसखैः महौषधस्यसखिभि
ः तेनएतैःसहितेनमहौषधेनेत्यर्थः अथोल्वणवातादिप्रहृष्टमध्यक्षीणवातादिहेतुका
नांकुंभीपाकादिसन्निपातज्वराणांत्रयोदशानांचिकित्साभिधीयते साचतुल्यहेतुकार्नांवि
स्फुरकादीनांद्वयोः॥ह्यणानामिवविधातव्या इतिसन्निपातज्वराधिकारः अथागंतुकज्व
राधिकारमाह तत्रागंतुकज्वरस्यनिदानमाह' अभिघाताभिषंगाभ्यामभिचाराभिशापत
तः आगंतुर्जायतेदोषैर्यथास्वंतंविभावयेत् अभिघातःशस्त्रमुष्टिलगुडादिभिरभिहननं

अभिषंगः कामशोकभयक्रोधभूतादीनमावेशः अभिचारः कृत्याद्युत्पादनं अभिशापः ब्राह्मण
गुरुवृद्धसिद्धादिकृतःशापः तं आगंतुज्वरं यथास्वं यथादोषलक्षणं दोषैर्विभावयेत् विजानीया
त् अपराण्यपि निदानान्याह येभूतविषवाय्वग्निक्षतभंगादिसंभवाः रागद्वेषभयाद्याश्च तेस्यु
रागंतवो गदाः वाय्वग्न्यादिशब्देन भूतविषवाय्वग्निक्षतभंगादयः संगृह्यंते ते न रागादयः क्षतभंगा
द्यंता हेतवोप्यागंतुसंज्ञाः स्युः कार्यकारणयोरभेदोपचारात् एतेन आगंतुजः स्मृत इत्यत्रा
प्यागंतुशब्दो हेतुवाची आगंतुर्जायते दोषैरित्यत्र व्याधिवाची अभिघाताभिषंगाभ्यामित्या
दिश्लोके दोषैर्यथास्वं विभावयेदिति वचनेनैवं प्रतीयते अभिघातादीनां विप्रकृष्टकारणत्वं
मिथ्याहारविहाराणामिव दोषाणां निकृष्टकारणत्वं तथासति क्षयापमानसंक्रुद्धस्कंदेत्या
दिश्लोके आगंतुज्वरस्याष्टमत्वविलापतो दोषजेष्वेव प्रवेशात् उच्यते आगंतुज्वरस्य दोषा आ
रंभका न किंतु पश्चादनुबंधिनः तथा च आगंतुज्वरस्य संप्राप्तीमाह चरकः आगंतुर्हि व्यथा ६०

धूमश्रेष्ठेः पुरपाणिजपांशुभिः लोहलामज्जकैलाभिर्धूपश्च तत्रमापहः ग्रहदोषहरः श्रीदःसोभा
ग्यकरा उत्तमः रसुराणकांगी मूर्द्धजो वालः मरुत्तरुः देवदारुः पुरः गुग्गुलुः पाणिजः नखः पांशुः
पर्पटकः लोहं अगरु लामज्जकं उशीरवत्तीतस्य वितृणविशेषः तद्दलाभेउशीरंग्राह्यं मक्षीका
मरदारु मत्स्यशकलामुस्तामलक्यामृता पथ्यारेवतरामसेनकरंजोराजीफलैः संयुता हन्युश्चे
तरुजोथदर्दुरदलाद्राक्षापटोलीपयः पथ्यापर्पटराजवृक्षकटुकाशंबूकपुष्पश्रुताः मक्षी
काद्राक्षा मत्स्यशकलाकटुकी आरेवतः आरग्वधः रामसेनः किरातः रजः पर्पटः राजी
फलं पटोलः अथयोगांतरमाह दर्दुरदलासाकपर्णि साध्व्यर्था ब्राह्मीमंजिष्ठाशोणक
स्य तथाप्यत्र ब्राह्मी ग्राह्या यतउक्तं ब्राह्मीमतिप्रदामेध्याज्वरहंत्रीरसायनीति ब्राह्मीव
स्तीतिलोके पयः वालकं राजवृक्षः आरग्वक्षः शंबूकपुष्पीशंखपुष्पी अथकर्णक
स्य चिकित्सा प्रलेपस्तमस्तं नयत्यल्पमेकः समुद्रिक्तशोथं चरक्तावसेकः विपक्वं चशास्त्र

मा॰ प्र॰ नानि यथा कामाद्भ्रमो रुचिर्दाहो ह्रीनिद्राधीधृतिक्षय इति भयाच्च प्रलापः शोकाच्च भयेत्कोपाच्च वेप
६१ थुः भयात् भयजे ज्वरे प्रलापः शोकाच्च चकारेण प्रलाप एवानुकृष्यते कोपाच्च कोपादपि वेपथु
र्भवति ननु वेपथुर्वातस्य कार्य्यं तत्कथं क्रोधजे ज्वरे वेपथुः यतउक्तं क्रोधात्पित्तमिति उच्यते
एकः प्रकुपितो दोष इतरानपि कोपयेदिति वचनात्पित्तकोपितवातजन्य वेपथुः क्रोधाद्वायुर
पि भवति यतउक्तं विदेहेन क्रोधशोकौ स्मृतौ वातपित्तरक्तप्रकोपणाविति भूताभिषंगादु
द्वेगो हास्यं रोदनकंपने केचिद्भूताभिषंगोत्थं वदंति विषमज्वरं भूताभिषंगोत्थो विषमज्वरो भव
ति कदाचिदतिवेगवान् कदाचिच्छांतवेग इत्यर्थः अभिचाराभिशापाभ्यां मोहस्तृष्णा च जायते
तृष्णा चेति चकारेणाहारीतानुवादि वाग्भटोक्तं च बोधव्यं तद्यथा तत्राभिचारकैर्मंत्रैर्हूयेनाद
ति लोके दूषितस्पर्द्धयमानस्य तप्यते पूर्वं मनस्ततो देहस्ततो विस्फोटतृड्भ्रमैः सदाहमूर्च्छैर्ग्र
स्तस्य प्रत्यहं वर्द्धते ज्वर इति अथ तेषां चिकित्सामाह आगंतुजे ज्वरे नैव नरः कुर्वीत लंघनं तथा ६१

च वाग्भटः शुद्धवातक्षयागंतुजीर्णज्वरिषु लंघनं नेष्यत इति शेषः अन्यच्च लंघनं न हितं का
मशोकचिंताप्रहारजे भयभूतश्रमक्रोधलंघनैश्च कृते ज्वरे किंतु दीप्तान् पेतत्र दद्यान्मांसरसौद
नं अभिघातज्वरे युंज्यात् क्रियामुष्णविवर्जितां कषायं मधुरं स्निग्धं यथादोषमथापि वा अभि
घातज्वरो नश्येत्पानाभ्यंगेन सर्पिषः रक्तावसेकैर्मध्यैश्च तथा मांसरसौदनैः मेध्यैर्मधायैर्हितैः
वधबंधश्रमाध्वकर्मभ्रंशसमुद्भवान् ज्वरानुपचरेत्पूर्वं क्षीरमांसरसौदनैः वधः ताडनं क
र्णादिवेधो वा अंगः छेदभेदआदिकः भ्रंशो वृक्षादितः पतनं अध्वश्रांतेषु चाभ्यंगादिकानि
प्रांच कारयेत् औषधीगंधविषजौ विषपित्तप्रशमनैः जयेत्कषायैर्मतिमान्सर्वगंधकृते
र्भिषक् सर्वगंधमाह चातुर्ज्जातककर्पूरकंकोलागुरुकुंकुमं लवंगसहितं चैव सर्वगं
धं विनिर्दिशेत् क्रोधजे पित्तजे काम्यैर्नार्य्यः सद्वाक्यमेव च आश्वासेनेष्टलाभेन वायोः प्रशम
नेन च हर्षणैश्च शमं यांति कामशोकभयज्वराः कामेरणोमनोद्वेश्च पित्तभेश्चाणुपक्रमैः

सद्यःक्षेप्यसमंयातिज्वरःक्रोधसमुच्छितैः कामैः कामावेशैः मनोज्ञैःधिक्कारदिवचनैः । भयज
नकवचनैर्वक्तामात्क्रोधज्ज्वरोनश्येत्क्रोधात्कामज्वरस्तथा घातिताभ्यामुभाभ्यांचकामक्रोधज्व
रक्षयः घातिताभ्यामुभाभ्यांमनसिनिगृहीताभ्यांकामक्रोधाभ्यां भूतविद्यासमुद्दिष्टैर्बंधकवेशन
ताडनैः जयेद्भूताभिषंगोत्थंमनःशांत्यैश्चमानसमुताडनैरित्यस्यस्थानेकेचित्पूजनैरितिपठंति
सहदेवायामूलंविधिनाकंठेनिबद्धमपहरति एकाहिकंचतुर्थिकंद्विवसैर्भूतज्वरंपुंसां अभिचा
राभिशापोत्थोज्वरोहोमादिभिर्जयेत् दानस्वस्त्ययनातिथ्यैरुत्पातग्रहपीडिजो इत्यागंतुज्वराधि
कारः अथविषमज्वराधिकारः तत्रविषमज्वरस्यनिदानकथनपूर्विकांसंप्राप्तिमाह दोषो
ल्पोहितसंभूतोज्वरोत्सृष्टस्यवापुनः धातुमन्यतमंप्राप्यकरोतिविषमज्वरं अपसृष्टःज्वरो
त्सृष्टस्य ज्वरेणात्यक्तस्यसन्निकृष्टंहेतुमाह दोषः अल्पःज्वरमुक्तस्याल्पोपिविप्रकृष्टंहेतुमा
ह अहितआहारविहारादितेनसंभूतःसंपूर्णोजातः अन्यतमंधातुंरसरक्तादिकंप्राप्यहृष्यपि ।

पूर्वेजायतेपश्चान्निजैर्दोषैस्तुबध्यतइति तत्रकस्यागंतोःकोवानिजोदोषइत्यपेक्षायामाह का
मशोकभयाद्वायुःक्रोधात्पित्तंत्रयोमलाः भूताभिषंगात्कुप्यंतिभूतसामान्यलक्षणाः कामशो
कभयजादागंतोःवायुःकुप्यति क्रोधात्क्रोधजादागंतोःपित्तंभूताभिषंगात् भूतावेशजादागं
तोस्त्रयोमलादोषाःकुप्यंतीत्यर्थःत्रयोमलाःकथंभूताःभूतसामान्यलक्षणाः भूतलक्षणस्य
सामान्यंलक्षणंयेषांतेतादृशाः अथागंतुज्वराणांहेतुभेदैर्लक्षणैर्भेदानाह श्यावास्यतावि
षकृतेतथातीसारएवच भक्तारुचिःपिपासाचतोदश्चसहमूर्छया श्यावःशुक्लानुविरुद्धःक
ष्णोवर्णःशाकवर्णोवाविषकृतेस्थावरजंगमविषलक्षणकृतेज्वरे अतीसारःस्थावरविषे ।
ऽपिच तस्याधोगामित्वात् तोदःशूच्याव्यधनेनेवव्यथा ओषधीगंधजेमूर्छाशिरोरुग्वमथु
स्तथा कामजेचित्तविभ्रंशस्तंद्रालस्यमभोजनं हृदयेवेदनाचास्यगात्रंचपरिशुष्यति काम
जे समीहितकांताद्यप्राप्तिनिमित्तकेज्वरे चकाराद्धात्मटोक्तान्यपिलक्षणानिबोद्धव्यानि

भा॰प्र॰ असंततस्य लक्षणमाह सप्ताहं वा दशाहं वा द्वादशाहमथापि वा संतत्या यो विसर्गी स्यात्संततः स
६२ निगद्यते विकल्पो वातिकादिभेदात् संतत्या नैरंतर्येण अविसर्गी अपरित्यागी ननु मुक्तानु
बंधित्वं विषमत्वमिति विषमलक्षणं तच्च न घटत इति कथमयं विषमेषु पठ्यते घटत एवेति न
दोषः यदुक्तं चरकेण विसर्गं द्वादशे कृत्वा दिवसेऽव्यक्तलक्षणः दुर्लभोपशमः कालं दीर्घम
प्यनुवर्त्तत इति यत्तु खरनादः ज्वराः पंच वये प्रोक्ताः पूर्वं संततकादयः चत्वारः संततं हित्वा ज्ञेया
स्ते विषमज्वरा इति तद्विरेण त्यागाभिप्रायेण सततलक्षणमाह अहोरात्रे सततको द्वौ काला
वनुवर्त्तकौ द्वौ कालौ अहन्येककालं रात्रावेककालं यतो दोषाणामहोरात्रे प्रत्येकं द्वौ द्वौ प्रकोप
कालौ यदुक्तं वाग्भटेन वयोहोरात्रिभुक्तानां तेऽन्तमध्यादिगाः क्रमात् इति अन्येद्युष्कल
क्षणमाह अन्येद्युष्कस्त्वहोरात्रादेककालं प्रवर्त्तते एककालं दोषापेक्षया एककालमपि द्वि
तीयं प्रथमकाले हृद्येव दोषस्य स्थितेः तृतीयकचतुर्थकयोर्लक्षणमाह तृतीयकस्तृतीयेऽह्नि ६२

चतुर्थकः तृतीयेऽह्नि त्यागागमनदिनं गृहीत्वा यदुक्तं दिनमेकमतिक्रम्य यो भवेत्स तृतीयकः दि
नद्वयं त्वतिक्रम्य यः स्यात्स हि चतुर्थक इति अत्राह स्म सुश्रुतः कफस्थानविभागेन यथासंख्यं करो
ति हि सततान्येद्युष्कत्र्याख्यचतुर्थकप्रलेपकान् अहोरात्रादहोरात्रात्स्थानात्स्थानं प्रपद्यते दो
षश्चामाशयं प्राप्य करोति विषमज्वरं अयमर्थः आमाशयोरःकंठशिरःसंधयः पंच श्लेष्म
स्थानानि एषु तिष्ठन्दोषो यथासंख्यं सततादीन्करोति तत्रामाशये स्थितो दोषः सततं करोति द्वौ
कालौ अहोरात्रे कालद्वये दोषप्रकोपात् हृदये स्थितो दोष आमाशयमागत्य अन्येद्युष्कं करो
ति एककालं नैकत्वादेकस्मिन्नेवाहोरात्रे दोष आमाशयमायाति तत्र द्वौ दोषप्रकोपकालौ
एकस्मिन्काले हृदये तिष्ठत्यपरस्मिन्नामाशयमिति कंठे स्थितो दोषोऽहोरात्राद्धृदयमायाति
तृतीये दिने आमाशयमागत्य स्वप्रकोपकाले तृतीयकं ज्वरं करोति व्याप्नोति एककालं न तु द्वौ का
लौ स्वभावात् एवं शिरःस्थितो दोषोऽहोरात्रात्कंठमायाति ततः पुनरहोरात्राद्धृदयमायाति चतु

भा॰प्र॰ र्थेदिवसेऽस्थिमज्जानमागत्यस्वप्रकोपकालेचतुर्थकंज्वरंकरोति एककालंनतुद्वौकालौस्वभावादेव
६४ ननुदोषस्यागमनंक्रमेणनिजस्थानागमनक्रमात्कथंतृतीयचतुर्थदिवसयोर्ज्वरागमनं उच्यते
दोषोहिप्रकोपसमयेवेगवत्तयालाघवात्स्वस्थानंतुवेगाद्दिनएवयाति यतआह दोषःप्रकोपका
लेहिवेगवत्त्वेनलाघवात् वेगवासरएवायंस्वस्थानमभिगच्छति संधिषुस्थितःप्रलेपंकरोति
संधयस्त्रयाणामाश्रयेपिसंतितेषुस्थितःप्रलेपकंसर्वदाकरोति निवृत्तःपुनरायातिविषमोनियतेदि
ने स्वभावकारणंतत्रमन्यंतेमुनिपुंगवाः स्वभावस्यकारणत्वेकफस्थानविभागानपेक्षश्चतु
र्थकादिविपर्ययाश्रयिज्वराःस्वस्वकालेभवंति अधिशेतेयथाभूमिंबीजंकालेप्ररोहति अधि
शेतेतथाधातूनदोषःकालेप्रकुप्यति सुश्रुतोप्याह सचापिविषमोदेहंनकदाचिद्विमुंचति ग्ला
निगौरवकार्श्येभ्यस्सयस्मान्नप्रमुच्यते वेगेतुसमतिक्रांतेमतोऽयमितिलक्ष्यते गौरवंशिरसोग्ला
निर्नातिश्रद्धाचभोजने माधुर्य्यंमुखवैरस्यंतिक्तत्वमथवापुनः वक्त्रस्यजायतेयस्मात्वेगेपिग ६४

त्वापुनःविषमज्वरंकरोति ज्वरोत्सृष्टस्यवेतिवाग्भटेनेतिबोध्यते प्रथमतोविषमज्वरोभवतियत
उक्तं आरंभाद्विषमोयस्त्वित्यादि कंधातुंदूषयित्वाकंविषमज्वरंकरोतीत्यपेक्षायामाह संततंर
सवहस्थःसततंरक्तधातुगः दोषःकुर्याज्ज्वरंपुंसांसोन्येद्युःपिशिताश्रितः मेदोगतस्तृतीयेन्हिअ
स्थिमज्जगतःपुनः कुर्याच्चातुर्थकंघोरमंतकंरोगसंकरं अंतकंअंतकमिवमारकत्वात् अ
थविषमज्वरस्यसामान्यलक्षणमाह यःस्यादनियतात्कालाच्छीतोष्णाभ्यांतथैवच वेगतश्चा
पिविषमोसज्वरोविषमःस्मृतः यस्त्वनियतात्कालात्स्यादित्यस्यायमर्थः यथावातिकोज्व
रःसप्तदिनानिपैत्तिकोदशदिनानिश्लैष्मिकोद्वादशदिनानिदोषाणांप्राबल्येवातिकश्चतुर्द
शदिनानिपैत्तिकोविंशतिदिनानिकफजश्चचतुर्विंशतिदिनानिस्यात् तथाविषमज्वरोनिय
तकालंव्याप्यनस्यादित्यर्थः शीतोष्णाभ्यांगुणाभ्यांस्यात वेगतश्चापिविषमोकदाचिदतिवे
गवान् कदाचिच्छांतवेगः विषमज्वरस्यभेदानाह संततःसततोन्येद्युस्तृतीयकचतुर्थकौत

सतताद्दिपंचकादपरः चतुर्थकविपर्ययाख्योज्वरः सोपिविषमज्वरएवसकेधातुस्थ इत्यपेक्षायामाह अ
स्थीत्यादि तस्यचतुर्थिकविपर्ययस्यलक्षणमाह समध्येज्वरयत्यक्तोआद्यंतेचविमुंचति चतुर्थकवि
पर्ययइत्युपलक्षणं सततादिविपर्ययोपिवोध्यः यथा होरात्रेद्वौकालौमुंचति शेषंपूर्वमहोरात्र
तिष्टतीतिसततविपर्ययः अहोरात्रेएककालंमुंचतिशेषंसर्वमहोरात्रंतिष्टती तिअन्येद्युयतिआ
द्यावंतेचदि नमुंचतिइतितृतीयकविपर्ययः विपर्ययः मध्यएककालंज्वर एतेविषमज्वराउपल
क्षका अन्येरात्रिज्वरादयोपिविषमज्वराबोद्धव्याः यथा समौवातकफौयस्यक्षीणपित्तस्यदेहि
नः रात्रौप्रायोज्वरस्तस्यदिवाहीनकफस्यतु प्रायःवाकुल्येन संततादीनांशीतपूर्वत्वेदाहपूर्वत्वे
चहेतुरमाह त्वक्स्थोश्लेष्मानिलौशीतमादौजनयतोज्वरं तयोःप्रशांतयोः पित्तमंतेदाहंकरो
तिच शीतंशीतसहितं प्रशांतयोःप्रशांतवेगयोः अंतेअभ्यंतरे करोत्यादौतथापित्तंत्वक्स्थंदा
हमतीवच तस्मिन्प्रशांतेत्वितरौकुरुतःशीतमंततःअंततःहस्तपादादितः शीतदाहादिज्वरयो ६५

त्रिदोषजत्वमाह द्वावेतौदाहशीतादीज्वरौसंसर्गजौस्मृतौ दाहपूर्वस्तयोःकष्टःसुखसाध्यस्ततो
परः संसर्गजोसन्निपातिकौ कष्टःकष्टसाध्यः विषमज्वरस्यविशेषानाह विदग्धेन्नरसेदेहेश्ले
ष्मपित्तेव्यवस्थिते तेनार्द्धंशीतलंदेहेमर्द्धमुष्णंचजायते अन्नरसेविदग्धेआहारजेरसेदुष्टेदेहेश्ले
ष्मपित्तेचव्यवस्थिते दुष्टेस्थितेतेनहेतुनाशीतलंकफेनउष्णंपित्तेन अर्द्धत्वंचार्द्धनारीश्वरोका
रेणनरसिंहाकारेणवा कायेदुष्टंयदापित्तंश्लेष्माचांतेव्यवस्थितः तेनोष्णत्वंशरीरस्यशीतत्वंह
स्तपादयोः अंतेहस्तपादादौ कायेश्लेष्मायदादुष्टः पित्तंचांतेव्यवस्थितं शीतत्वंतेनगात्रस्यचो
ष्णत्वंहस्तपादयोः विषमज्वरविशेषस्यप्रलेपकस्यलक्षणमाह प्रलिपन्निवगात्राणिघर्मेण
गौरवेणच मंदज्वरविलेपीचसशीतःस्यात्प्रलेपकः गौरवेणउपलक्षितः मंदज्वरविलेपी
मंदवेगस्यज्वरस्यसदासंबंधोस्यास्तीतिमंदज्वरविलेपी अयंविषमज्वरः तथाचसुश्रुतः प्र
लेपकाख्योविषमःप्रायःश्लेष्मायशोषिणामिति अथविषमज्वराणांसामान्याचिकित्साज्व

राश्च विषमाः सर्वे सन्निपातसमुद्भवाः यथोल्बणस्य दोषस्य तेषु कार्य्यं चिकित्सितं विषमेष्वपकर्त्तव्य
मूर्द्ध्वं चाधश्च शोधनं स्निग्धोष्णैरन्नपानैश्च शमयेद्विषमज्वरं कालिंगकः पटोलस्य पत्रं कटुकरोहिणी १ प
टोलं सारिवा मुस्तं पाठा कटुकरोहिणी २ निंबः पटोलं त्रिफला मृद्वीका मुस्तवत्सकौ ३ किराततिक्तमम
ताचंदनं विश्वभेषजं ४ गुडूच्यामलकं मुस्तापमर्द्धश्लोकसमापनाः कषायाः शमयंत्याशु पंचपं
चविधं ज्वरं कालिंगकः इन्द्रयवः वत्सकः कुटजः चंदनमत्र रक्तं कषायाः पंचपंचविधं संततस्त
ततान्येद्युष्कतृतीयकचतुर्थकरूपं महाबलामूलमहौषधाभ्यां क्वाथो निहन्याद्विषमज्वरं हि
शीतं सकंपं परिदाहयुक्तं विनाशयेद्द्वित्रिदिनप्रयोगात् मुस्तामलकगुडूचीविश्वौषधकंटकारि
क्वाथः पीतः सकणाचूर्णः समधुर्विषमज्वरं हंति तिलतैललवणयुक्तं कल्कं लसुनस्य सेवि
तः प्रातः विषमज्वरमपहरते वातव्याधीनशेषांश्च कालाजाजी तु सगुडा विषमज्वरनाशिनी मधु
नाचाभ्यालीगहंत्याशु विषमज्वरान् कालाजाजी कलौंजी मगरेल इति लोके साच किंचिद्दृश्यगु ९९

ते सति तस्मात्तु नियतोऽप्युष्णः शरीरे विषमज्वर इति धात्वंतरेषु लीनत्वात्सौक्ष्म्यान्नैवोपलक्ष्यते द्विदो
षोल्बणस्य तृतीयस्य लक्षणमाह कफपित्तात्त्रिकग्राही पृष्ठाद्वातकफात्मकः वातपित्ताच्छिरो
ग्राही त्रिविधः स्यात्तृतीयकः त्रिकग्राही वेदनया त्रिकं गृह्णातीत्यर्थः वातकफात्मकः पृष्ठान
व्यथया पृष्ठं गृह्णातीत्यर्थः क्वचिल्लोपे पंचमी कफोल्बणस्य वातोल्बणस्य चतुर्थकस्य लक्ष
णमाह चातुर्थको दर्शयति स्वभावं द्विविधं ज्वरः जंघाभ्यां कफजः पूर्वं शिरसोऽनिलसंभवः क
फजः कफोल्बणः तथा अनिलसंभवः वातोल्बणः संततादीनां त्रिदोषजत्वात् उक्तं च
रके प्रायशः सन्निपातेन पंचस्युर्विषमज्वरा इति प्रायशोग्रहणाद्द्वेकदोषजाः द्विदोषजाः
अपि भवंति इति जेज्जटः श्लैष्मिकः पूर्वं प्रथमं जंघाभ्यां व्यथया जंघे व्याप्य पश्चात्सकलं शरी
रं व्याप्नोति एवमुल्बणवातजः शिरसः पूर्वं व्यथया शिरसो व्याप्य पश्चात्सकलं शरीरं व्याप्नोतीत्यर्थः
विषमज्वर एवान्यश्चतुर्थकविपर्ययः अस्थिमज्जगतो दोषश्चतुर्थकविपर्ययः जनकः अन्यः सं

बृहद्दंती एरंडवत्पत्रविख्यातद्वलाभिर्दंतीच ग्राह्या समानगुणत्वात् पटोलेंद्रयवानंता पथ्यारिष्टाम
ताजलं क्वथितं तज्जलं पीतं ज्वरं सततकं जयेत् अनंता सारिवा अरिष्टो निंबः जलं वालकं द्राक्षाय
दोलनिंबाद्दशाक्वाक त्रिफलासतं जलं जंतुः पिबेच्छीघ्रमन्येद्युः ज्वरशांतये शक्राह्वः इंद्रयवः क
र्मसाधारणं स्यस्क्वातृतीयकचतुर्थकौ निघ्नजाप्रतिकर्त्तव्यौ विशेषोक्तिचिकित्सितैः उशीरं चंद
नं मुस्तं गुडूची धान्यनागरं अंभसा क्वाथितं पेयं शर्करामधुयोजितं ज्वरे तृतीयके पुंसा तृष्णादा
हसमन्विते अपामार्गजटाकट्यां लोहितैः सप्ततंतुभिः बद्धा वारेरवेस्तूर्णं ज्वरं हंति तृतीयकं
स्थिरातामलकीदारुशिवावृषमहौषधैः सितामधुयुतः क्वाथश्चातुर्थकहरः परः स्थिरा शालि
पर्णी तामलकी भूमिधात्री वृषो वासा अगस्तिपत्रस्वरसेन नस्यं भिहंति चातुर्थकमुग्रवीर्यं
शिरीषपुष्पस्य निशाद्वयस्य कल्केन वा तद्घृतसंयुतेन ततनस्यं ज्वरस्य वेगकालं च चिंतयन्
जप्यति बुधः तस्येष्टैरनुतैर्वापि विषयैर्नाशयेत्स्मृतिं संततं विषमं वापि क्षीणस्य सुचिरोत्थितं ६७

ज्वरं संभोजनैः पथ्यैः ज्वरघ्नैः समुपाचरेत् सततादिविपर्य्ययाणं विषमज्वराणां चिकित्सा सततादी
नांइकर्त्तव्या शीताभिभूते पुरुषे कुर्य्याच्छीतहरीं क्रियां दाहाभिभूते तु विधिं विदध्याद्दाहनाश
नं आच्छादनैर्वह्नितरैः युरुभिः कंबलादिभिः तूलवत्या महाशीतं शीतास्त्विचरेणे हरेत् तूलवती
तुलाईइति लोके तं स्तनाभ्यां सुपीनाभ्यां पीवरोरुनितंबिनी युवती गाढमालिंगेत्तेन शीतं प्रशाम्य
ति क्रांतासंगमसंजाततृष्णा शीते निवारिते प्रह्लादं चास्य विज्ञाय पृथक्कां कारयेत्स्त्रियं ततोदा
हे तु संजाते पत्रैरेंडसंभवैः शीतलेर्द्धारितैर्देहे दाहं तस्यापनोदयेत् पिष्टा तालकतोलकैकम
मलं सदंकचूर्णसमं द्वाभ्यां तस्य नवांशकेन च शिखि ग्रीवं पुनर्मर्द्दयेत् कौमारीरसभावितं गजपु
टेशीतं ततोप्युद्धरेद्वातव्यं सितयाप्रभातसमये शीतज्वरघ्नं सकृत् मध्यान्हसमये पथ्यं शिखरि
णी शर्करं च शीतज्वरे मृतमेरवचूर्णं शुद्धं सूतं तथा ताम्रमायसं धातुमाक्षिकं सूतकाद्विगुणं गंधं
गंधाशालं समं भवेत् यद्यस्मिन्शुद्धिमायाति तस्मिंस्तत्विशोधयेत् शंकभस्म त्रिगुणं मर्द्दयेत्क

न्यकाद्रवैः दिनत्रयं दिने कंचुकारवेल्याद्यैस्तथा ततः सरावके रुध्वा सम्यग्गजपुरे पचेत् गुंजामात्रं दद्या
त्प्रातः सितया सह बुद्धिमान् पथ्यं चन्नार्कराद्युग्धमन्नं दद्याद्भिषग्वरः दाहपूर्वं शीतपूर्वं विषमं संततादि
कं नाशयेत्त्रिदिनेनायं रसः कल्पतरुः खलु इति कल्पतरुरसः शीतदाहादिविषमज्वरे तालकं तु
त्थिकाचूर्णं तुल्यं तत्रोभयोरपि नवमांशश्च तुत्थं स्यान्मर्दयेत्कन्यकाद्रवैः तत्तु संशुष्कमुपलैर्वन्यैर्ग
जपुरे पचेत् शीतं तच्चूर्णयेच्चूर्णं गुंजामात्रं सितायुतं प्रभाते भक्षयेन्नित्यात्त्रिशीतज्वरखंडयं वांतिर्नव
तिकस्यापि कस्यापि न भवत्यपि एकेन दिवसेनैव शीतज्वरहरं परं मध्याह्ने ... पथ्यं शिखरिणी
भक्तं च शीतज्वरेऽमृतसैरवचूर्णं कायस्यानाकुलीतिक्ता वयस्यापुरुचोरकैः सहदेवीवचाकुष्ठैः
शीतघ्नैर्धूपलेपनैः एतैरेवौषधैः पिष्टैश्च वएक्षारसंयुतैः साम्लैर्विपाचितं तैलमभ्यंगाच्छीतनाश
नं कायस्या हरीतकी नाकुली रास्ना भेदः नाईति लोके वयस्या गुडूची पुरो गुग्गुलुः चोरकः (
भ्रष्टिरतदला भेगटिवन सहदेवी हहद्भला द्वारोयवक्षारः कायस्यादिधूपनं लेपनं तैलं च एरं ६८

डतुल्याकर्षमितान्भक्षणीया पीतो मरिचचूर्णेन तुलसीपत्रजो रसः द्रोणपुष्पीभवो वापि निहं
ति विषमज्वरान् अमृतायाः शतं चूर्णं वाससा परिशोधितं पृथक्षोडशभागाः स्युर्गुडमाक्षिक
सर्पिषां यथाग्निभक्षयेदेतन्नरो हितमिताशनः नास्य कश्चिद्भवेद्व्याधिर्न जरापलितं न च न ज्व
रविषमानेव मेहा नानिलरक्तकं न च नेत्रगता रोगाः परमेतद्रसायनं मेधाकरं त्रिदोषघ्नं प्रयोगाद
स्य बुद्धिमान् जीवेद्वर्षशतं साग्रं यथैवादितिजास्तथा गुडूचीकल्पः अथान्नमाह तक्रमांसं पयो
मांसं दधिमांसमथापि वा माषमांसं च भुंजानो मुच्यते विषमज्वरात् अग्निवेशश्च सुरासमंडाया
नापभोजने चरणायुधाः तित्तिरा विष्किराः पथ्याः कुक्कुटा विषमज्वरे चरणायुधमाह कुक्कुटाः
कुक्कुटाः वनकुक्कुटाः विष्किराः वर्तिकालावविगिरचकोराद्याः अथ संततादीनां विशिष्टचि
कित्सा त्रायंतीकटुकानंतासारिवाभिः सृतं जलं संतताख्ये ज्वरे देयं वातादीनां निवृत्तये अनंता
दुरालभा पटोलाद्यृषा तिक्तासारिवाभिः शृतं जलं संतताख्ये ज्वरे देयं वातादीनां निवृत्तये वृषा

डस्यवु पत्राणि लिप्तभूमौ निधापयेत् दाहार्दितज्वरिणो देहे तानि पत्राणि धारयेत् तेन नस्यति दाहोस्य
ज्वरश्चैवोपशाम्यति दाहे शांते यदा शेषं तत्त्वयुक्त्या निवारयेत् जघनचक्रचलन्मणिमेखलास
रसचंदनचंद्रविलेपना वनलतेव ततं परिवेष्टयेत्प्रबलदाहनिपीडितमंगना चक्रुः कर्पूररःत
दंगसंगसंजातशैत्यैर्दाहे निवारिते प्रल्हादं चास्य विज्ञाय तां स्त्रीमपनयेत्पुनः सुवर्चिकानागरकु
ष्टमूर्वालाक्षानिशालोहितयष्टिकाभिः सिद्धं हरेद्यद्गुणतक्रपक्वतैलं ज्वरं दाहसमन्वितं च षट्
तक्रतैलं रास्नानागरकुष्टचंदननिशायष्ट्याह्वकल्कबलालाक्षासैंधवसारिवामधुरसादेवदुरो
हीतकैः सोशीरांबुधिफेनरोहिषजलैस्तैलं पचेत्षड्गुणैस्तक्रैस्तच्छमयेज्ज्वरं हठतरं दाहादिशी
तादिकं चंदनमत्र श्वेतं मधुरसा मूर्वा रोहितकः मधुरोहितिद्रतिलोके रोहिषं रोहीसद्दतिव
णविशेषः छांटमध्यदेशभाषा जलं वालं महाषट्तक्रतैलं पद्मकोत्पलकल्हारमृणालवि
शपोष्करैः कुमुदोशीरमंजिष्ठापद्मगैरिककट्फलैः सारिवाद्वयलोध्राह्वह्रीरीखर्जूरमस्तु

केः धात्रीशतावरीयुक्तैः क्वाथे कल्के प्रयोजितैः लाक्षारसपयःशुक्रमस्तुभिःसहकांजिकैः पक्वं
तैलमिदं त्वच्यं दाहज्वरहरं परं लाक्षारसादिः पृथक्तैलचतुष्टैः पद्मकादितैलं प्रलेपके प्रयुंजीत
श्लेष्मज्वरहरीं क्रियां रुद्रजटागोशृंगं विडालविष्ठोरगस्य निर्मोकः मदनफलमृतकेशौवंशाखरु
द्रनिर्माल्यं घृतयवमयूरचंद्रकछगलकरोमा निसर्षपाः सवचाः हिंगुगजास्थिमरीचाः समभा
स्त्रागमूत्रसंपिष्टाः धूपनविधिनाशमयंत्येते सर्वज्वरान्नियतं ग्रहडाकिनीपिशाचप्रेतविका
रानयं धूपः रुद्रजटाजटाधरी मृतकेशजटामांसी रुद्रनिर्माल्यं रुद्रनिर्माल्यपुष्पादि मयू
रचंद्रः मयूरपुच्छचंद्रकं माहेश्वरो धूपः सोमं सानुचरं देवं समातृगणमीश्वरं पूजयेत्प्रयतः
शीघ्रं मुच्यते विषमज्वरात् सोमं उमया सहितं सानुचरं नंद्यादिगणसहितं प्रयतः पवित्रः वि
ष्णुं सहस्रमूर्द्धानं चराचरपतिं विभुं स्तुवन्नामसहस्रेण ज्वरान्सर्वान्व्यपोहति सहस्रमूर्द्धानमि
ति सहस्रशीर्षेत्यादिवेदाभिहितनामसहस्रेण भारतोक्तेनेत्यर्थः ज्वरस्य देवत्वात्पूजा कार्य्या

यतश्चाह विदेहः तीर्थायतनदेवाग्निगुरुस्त्र्युपसर्प्पणैः श्रद्धयापूजनैश्चापिसहसासोम्पतिज्वरः ती
र्थेक्षिविजुषृजलं आयतनंदेवाधिष्ठितंपुरुषोत्तमक्षेत्रश्रीशैलादि इतिविषमज्वराधिकारः अ
थरसादिधातुगतज्वरमाह गुरुताहृदयोत्क्लेशः सदनंछर्द्यरोचकाः रसस्थेतुज्वरेलिंगंदैन्यंचा
स्योपजायते गुरुतागात्राणां हृदयस्यस्यदोषस्योपचितत्वाद्वमनमिव दैन्यंक्लीवत्विन्नतारस
धातुगते यद्यपिरसधातुंप्राप्यसंततश्चायंतथापिश्रनुक्रमधातुगतकथनार्थोऽयमत्रनिर्देशः
अथतस्यचिकित्सा रसस्थेतुज्वरेतस्मिन्कुर्याद्वमनलंघने अथरक्तगतज्वरमाह रक्तनिष्ठी
वनंदाहोमोहश्छर्दनविभ्रमो प्रलापःपिडिकातृष्णारक्तप्राप्तेज्वरेनृणां मोहोव्यग्रचित्तता अथ
तस्यचिकित्सा रोगसंशमनोलेपोरक्तमोक्षमसृग्गते मांसगतमाह पिंडिकोद्वेष्टनंतृष्णासृष्ट
मूत्रपुरीषता ऊष्मांतर्दाहविक्षेपौग्लानिःस्यान्मांसगेज्वरे अन्येऊष्मांतर्मोहविक्षेपाविति पठंति
तत्रऊष्मांतः विक्षेपःहस्तपादादिचालनं तस्यचिकित्सा तीक्ष्णांविरेकंचतथाकुर्यान्मांस

गतेज्वरे मेदोगतमाह भृशंस्वेदस्तृषामूर्छाप्रलापश्छर्दिरेवच दौर्गंध्यारोचकौग्लानिर्मेदस्थेचासहिष्णु
ता भृशंस्वेदःमेदोमलत्वात् तस्यचिकित्सा मेदस्थेमेदसःशोधनं अस्थिगतमाह भेदोस्थ्नांकूजनं
श्वासोविरेकश्छर्दिरेवच विक्षेपणंचगात्राणांविद्यादस्थिगतेज्वरे तस्यचिकित्सा अस्थिस्थेतुज्व
रेकुर्य्याद्वातनाशनकोविधिः वस्तिकर्म्मप्रयोक्तव्यमभ्यङ्गोन्मर्द्दनंतथा मज्जगतमाहतमःप्र
वेशनंहिक्काकासंशैत्यंवमिस्तथा अन्तर्दाहोमहाश्वासोमर्म्मच्छेदश्चमज्जगे असाध्यत्वान्नात्रचिके
त्सा शुक्रगतमाह मरणंप्राप्नुयात्तत्रशुक्रस्थानंगतेज्वरे शेफसःस्तब्धतामोक्षःशुक्रस्यतुविशे
षतः अथजीर्णज्वराधिकारमाह तत्रजीर्णज्वरस्यसामान्यंलक्षणमाह योद्वादशेभ्योदिवसेभ्य
ऊर्द्ध्वंदोषत्रयेभ्योद्विगुणेभ्यऊर्द्ध्वंनृणांतनौतिष्ठतिमंदवेगोभिषग्भिरुक्तोज्वरएषजीर्णः जीर्ण
ज्वरस्यैवविशेषंवातबलासकमाह नित्यंमदज्वरोरूक्षःशूनःकृच्छ्रेणसिध्यति स्तब्धांगःश्ले
ष्मभूयिष्ठोनरोवातबलासको वातबलासकाख्योज्वरोऽस्यास्तीतिवातबलासकी नरइहकभ ७०

वेत् ज्वरनः शोथी श्लेष्मनृपिष्टोवकुलश्लेष्मकः अथजीर्णज्वरस्यसामान्याचिकित्सा जीर्ण
ज्वरीनरःकुर्य्यान्नोपचासंकदाचन लंघनात्सभवेत्क्षीणोज्वरःस्याच्चबलीयतः पुराणेपिज्वरे(
दोषायघपथ्येःपुनस्तथा लंघयेत्तत्रतंपश्चात्पूर्ववत्कारयेत्क्रियां तथापूर्ववत् निदिग्धिकाना
गरिकामृतानांक्वाथंपिवेन्मिश्रितपिप्पलीकं जीर्णज्वरारोचककासशूलश्वासाग्निमांद्याहित
पीनसेषु हंत्यूर्ध्वजानयंप्रायःसार्पतेनोपयुज्यते कंटकार्य्यादिःक्वाथः पिप्पलीचूर्णसंयुक्तः
क्वाथश्छिन्नोद्भवोद्भवः जीर्णज्वरकफध्वंसीपंचमूलकृतोथवा अमृतायाःकषायंवुशीतली
कृतमीरितं मधुपादयुतंपीतंजीर्णज्वरहरंपरं पिप्पलीमधुसंमिश्रंगुडूचीस्वरसंपियेत् जीर्णज्व
रकफप्लीहकासारोचकनाशनं जीर्णज्वरेऽग्निमांद्येचशस्यतेगुडपिप्पली कासाजीर्णारुचिः(
श्वासहृत्पांडुकृमिरोगनुत् द्विगुणःपिप्पलीचूर्णपिंडोत्रभिषजांमतः पिप्पलीमधुसंयुक्तामे
दःकफविनाशिनी श्वासकासज्वरहरीपांडुप्लीहोदरापहा आमलंचित्रकंपथ्यापिप्पलीसैंध

भा॰प्र॰ घंतथा चूर्णितोयंगणोज्ञेयः सर्वज्वरहरः परः भेदीरुचिकरः श्लेष्मजेतादीपनपाचनः आमल
७१ क्यादिचूर्णं द्राक्षामृताशटीशृंगीमुस्तकंरक्तचंदनं नागरंकटुकीपाठाभूनिंबःसदुरालभः उशी
रंधान्यकंपद्मंवालकंकंटकारिका पुष्करंपिचुमंदश्चदशांगमिदंस्मृतं जीर्णज्वरारुचिश्वा २
सकासश्वयथुनाशनं द्राक्षादिरष्टादशांगक्वाथः त्रिरुध्वापंचरुध्वावासप्तरुध्वाथवाकणाः गु
डक्षीरेणसंपिष्टापिवेद्दशादिनानिहि तथैवयन्दूनयेदेताएवंविंशतिवासुरान पिवतांज्वरशां
तिः स्यात्पांडुरोगश्चशाम्यति कासःश्वासोऽग्निमांद्यंचकफाधिकंचतत्रपति त्रयादिवृद्धि
याकफदृष्टिःउग्धवृद्धिर्यथाग्निवृद्धिवर्धमानपिप्पली वातश्लेष्मज्वरोक्तासिन्क्रियावातव
लासके जीर्णज्वरेकफेक्षीणेदाहतृष्णासमन्विते पयःपीयूषश्राहशांतस्तत्रवेतुविषोपमं चंदना
द्यंहितत्तैलंशोषाविःकारकीर्तितं तथानारायणंतैलंजीर्णज्वरहरंपरं इतिजीर्णज्वराधिकारः
अथद्वंद्वजनितज्वरस्यचिकित्सा हरीतकीनिंवपत्रंनागरंसैंधवोनलः एषांचूर्णंसदाखादेत् ७१

भा॰प्र॰ स्वप्नदोषेषुज्वरःसाध्योनुपद्रवः ज्वरस्योपद्रवानाह श्वासोमूर्च्छारुचिश्छर्दिस्तृष्णातीसारविड्ग्रहाः
७२ हिक्काकासांगभेदश्चज्वरस्योपद्रवादश प्रसंगादुपद्रवाणांचिकित्सायाविशेषमाह संजातोपद्र
वोऽव्याधिस्त्याज्योनस्यात्चिकित्सकैः व्याधौसांतेप्रणश्यंतिसद्यःसर्वेप्युपद्रवाः अतोव्याधिं
जयेद्यत्नात्पूर्वंपश्चादुपद्रवान् भिषग्यःकुशलःसोत्रजयेत्पूर्वमुपद्रवं तेष्वपिप्रचुरेषुप्राक्तना
शयेदाशुकारिणं मूलव्याधिंजयेत्पूर्वंजेयोयोवाभवेद्बली अविरोधेनवाकुर्य्यादुभयोरपिचक्रि
यां तत्रज्वरेश्वासस्यचिकित्सा सिंहीव्याघ्रीताम्रमूलीपटोलीशृंगीपद्मापुष्करंरोहिणीच
साकंत्वंबुक्वाथशैलमल्पाश्ववीजंश्वासंहन्यात्सन्निपातेदशांगः सिंहीदीर्घाव्याघ्रीक्षुद्राकंटकारी
ताम्रमूलीदुरालभा पद्माभांर्गी रोहिणीकटुकी शैलमल्लीकोरैया दशांगोयोगः भार्गीनिंब
घनाभयामृतलताभूनिंबवासाविषात्रायंतीकटुकावचात्रिकटुकनृपोनाकशक्रकुभैः रा
स्नायासपटोलपाटलिशटीदार्वीविशालात्रिवृद्ब्राह्मीपुष्करसिंहिकाद्वयनिशाधान्यद्वदे ७२

वद्रुमैः क्वाथोऽयंखलुसन्निपातनिवहान्द्वात्रिंशतांपानतोदुर्द्धर्षान्निजतेजसाविजयतेसर्प्पान्गरुत्मानिव
किंचश्वासबलासकासगुदरुगहृद्रोगहिक्कामरुन्मन्यास्तंभगलाद्वर्द्धनर्दादानपि विषातीसशक्रद्रुमः
ककुभःदेवद्रुमदेवदारुक्षात्रिंशदंगक्वाथः मधुनाकणाकट्फलकर्कटशृंगीभवंचूर्णं श्वासामये
महोग्रेलीढ्वालोकःसुखीभवति वन्यापलाग्नितापित्तदात्रस्याग्रेणयंजरेदाहः अपहरतिश्वासम
यमसंशयंभाषितंमुनिभिः अथज्वरेमूर्च्छायाश्चिकित्सा आर्द्रकस्यरसेनैवंयंमूर्च्छायामाचरेन्न
रः अंजनंचप्रयुंजीतमधुसिंधुशिलोषणैः शीतांभसाभिषेकःसुरभिर्धूपःसुगंधिपुष्पैश्च म
दुतालवंतवातःकोमलकदलीदलस्पर्शः अथज्वरेऽरुचिचिकित्सा अरुचौतुशृंगवेररसकैःस
सिंधुजैःकवलः सिंधूत्थमातुलुंगीफलकेसरधारणंवक्त्रे अन्यच्च अम्लचोमातुलुंगस्यकेसरंसा
ज्यसैंधवं धात्रीद्राक्षासितानांवाकल्कमास्येषुधारयेत् अथज्वरेछर्दिचिकित्सा क्वाथोगुडूच्या
ःसमधुःसुशीतःपीतःप्रशांतिंवमनस्यकुर्य्यात् विरामहिक्कानांमधुनावलीढासर्वंदनाशार्का

भा·प्र· रयान्विताम्रा अथज्वरेतृष्णायाश्चिकित्सा दंतशठवीजपूरकदाडिमवदरैःसचुक्रकैर्वदनेलेपोज
७३ यतिपिपासामयरचितगुटीमुखांतस्था शीतंपयःक्षौद्रयुतंनिपीतमाकंठमाशुवमतस्तृष्णेच्छ तर्षप्र
कर्षप्रशमायवक्त्रेदद्याज्जलदक्षौद्रवटाग्रलाजान् अथज्वरेऽतीसारस्यचिकित्सा लंघनमेकंमुक्त्वा
नान्यदस्तीहभेषजंवलिनः समुदीर्णदोषनिचयंशमयतितत्पाचयत्यपिच वत्सादिनीवत्सक
वाह्वविश्वभरानिंवविषाःसविश्वाः ज्वरेतिसारंत्वरितंजयंति विश्वामृतावत्सकवारिवाहाःक्वा
थोदेयः विश्वभरानिंवोऽम्बुनिंवः पाठामृतापर्प्पटमुस्तविश्वाकिराततिक्तेंद्रयवान्विपाच्य पिवे।
न्नरस्तेवहवेनसर्वज्वरातिसारानपिवन्निवारान् अथज्वरेविड्ग्रहस्यचिकित्सा विड्ग्रहेवातजित्क
र्मकुर्य्याद्दत्वानुलोमनं मलंप्रवर्त्तयेदाशुतीक्ष्णाभिःफलवर्त्तिभिः पथ्याशवधतिक्तात्रिवृदाम
लकैःशृतंतोयं जीर्णज्वरेविबंधेदद्यादाश्वेवविड्ग्रहःशाम्येत् अथज्वरेहिक्काचिकित्सा नीरे।
णसिंधूत्थरजोतिसूक्ष्मंनस्येननूनंविनिहंतिहिक्कां शुंठींहित्वावासितयासमेवाधूपोयवाहिंगुस ७३

र्जलज्वरशांतये हरीतक्यादिचूर्णं अरुचिमनलमांद्यंपीनसं श्वासकासावुदरमुदकदोषानाशु
हन्यादशेषान् जनयतितनुकांतिंचित्तनेत्रप्रसादंपलपरिमितशुंठीहोदसिद्धः कषायः शुंठी।
क्वाथः विषभागद्वयंदग्धकपर्दः पंचभागकः मरिचंनवभागंचचूर्णंविश्वेणशोधयेत् आर्द्रकस्य
रसेनास्यकुर्य्यान्मुद्गनिभांवटी वारिणावटिकायुग्मंप्रातःसायंचभक्षयेत् अयंरसोज्वरेयोज्य।
स्तस्मिन्दुर्जलजेऽपिच अजीर्णध्मानविष्टंभशूलेषुश्वासकासयोः दुर्जलज्वरजेतारसः पटोल
मुस्तामृतवल्लिवासकंसनागरंधान्यकिराततिक्तकं कषायमेषांमधुनापिवेन्नरोनिवारयेद्दुर्ज
लदोषमुल्वणं पटोलाद्विक्वाथः किराततिक्तात्रिवृदंवुपिप्पलीविडंगविश्वाकटुरोहिणीरजः
निहंतिलीढंमधुनातिसत्वरंसुदुस्तरंदुर्जलदोषजंज्वरं किराततिक्तकादिचूर्णं भोजनादौनरै
र्भुक्तंशुंठीराजपमयोस्थितं कल्कंतुहरतेनित्यंनानादेशोद्भवंजलं महार्द्रकयवक्षारोपीत्वाचो
ष्णेनवारिणा नानादेशसमुद्भूतंवारिदोषमपोहति अथसाध्यस्यज्वरस्यलक्षणमाह वलवत्

मुक्तकस्य अथज्वरेकासस्यचिकित्सा कासेकणाकणामूलंकलिद्रुमफलंरजः सविश्वभेषजं
लिह्यान्मधुनावावृषाजःरजःपर्प्पटकं पुष्करमूलकटुत्रिकशृंगीकटुफलयासवचाचविकाग्निः
मधुलुलितानिरयंखलुलेहःकासरिपुःकफरोगहरश्च अथज्वरेदाहचिकित्सा दाहाधिकारलि
खितंदाहेकुर्य्याच्चिकित्सितं परंज्वराविमुक्तस्यन्मुख्योनाश्यपोज्वरोयतः अथसुखसाध्यस्यज्वरा
स्यलक्षणं संतापोप्यधिकोवाह्यस्तृष्णादीनांचमार्दवं वहिर्वेगस्यलिंगानिसुखसाध्यत्वमेवच त
ष्णादीत्यादिशब्देनांतर्दाहसंध्यस्थिव्यथाश्वासागृह्यंतेतेषांमार्दवमल्पता वहिर्वेगस्यज्वरस्य वर्षा
शरद्वसंतेषुवाताद्यैःप्राकृतःक्रमात प्राकृतःसुखसाध्यस्तुशरत्सुरभिसंभवः सुरभिर्वसंतः अ
थकष्टसाध्यज्वरस्यलक्षणमाह वैकृतोऽन्यःसदुःसाध्यःप्राकृतश्चानिलोद्भवः अन्यःप्राकृता
दन्यःवैकृतः वर्षादिषुज्वरंजनयतांवातादीनांचिकित्साविशेषार्थंप्रधान्यमप्रधान्यंचाह वर्षा
सुमारुतोदुष्टःपित्तश्लेष्मान्वितोज्वरं कुर्य्यात्पित्तंचशरदितस्यचानुवलःकफः कफोवसंतेत

मा·प्र· मदिवातपित्तंभवेदत तस्यपित्तज्वरस्यचिकित्सामाह तत्प्रकृत्याविसर्गाच्चतत्रनानशनाद्भयं तत्प
१५ कृत्यातस्यप्रकृत्यास्वभावेन यतउक्तं कफपित्तेद्रवेधातुसहेतेलंघनंमहदितिविसर्गाच्चशारदो
विसर्गकालत्वात्तच यतउक्तं वर्षाशरद्धेमंताविसर्गकालास्तत्रोपचितवलाःप्राणिनोभवंतिसोम
स्यवलवत्वादिति तत्रशरदिपित्तज्वरेऽनशनाद्भयंन कफोवसंतेतमपिवातपित्तंभवेदनुवसं
तेकफज्वरेपिकफप्रकृत्यालंघनाद्भयन्नभवति किंतुवसंतस्यादानकालत्वात्तं निःशंकंनकर्त्त
व्यं यतउक्तं शिशिरवसंतग्रीष्माःस्त्वादानकालास्तत्रापचितवलाःप्राणिनोभवंति सूर्यस्यवल
वत्वादिति एतेनेदमुक्तं वर्षासुवायुःप्रधानंपित्तश्लेष्माणावप्रधाने शरदिपित्तंप्रधानं कफो
प्रधानंवसंतेश्लेष्माप्रधानंवातपित्तेऽप्रधानं तत्रप्रधानस्यप्राधान्येनचिकित्साकर्त्तव्या सा
चाप्रधानानिविरुद्धाविधेया एवंद्वंद्वेकृतेष्वपिप्रधानस्यप्राधान्येनचिकित्साकर्त्तव्या तथाचोक्तं
संसर्गेयोगरीयांस्यादुपक्रमःसर्वेभवेत् शेषदोषाविरोधेनसन्निपातेतथैवचेति संसर्गे द्वे १५

प्रभेंद्रियनाशनः शीघ्रमिंद्रियनाशनः उत्पन्नमात्रएवचिकित्स्यमानोऽपींद्रियाणांचक्षुरादीनांशा।
क्तिंयोनाशयति अन्यच्चारिष्टमाह विसंज्ञस्ताम्यतेयस्तुशेतेनिपतितोपिवा शीतार्दितोंतरुष्णश्चज्व
रेणम्रियतेनरः विसंज्ञः विगतज्ञानः ताम्यतेनष्टहर्षः शेतेनिपतितोपिवा अत्रापिशब्दएवार्थः ने
पतितएवतिष्ठति नचोत्थातुंसमर्थः तथासनसंशेतएवशीतार्दितः बहिः अंतः उष्णः अंतर्दाहवा
न अन्यच्च योहृष्टरोमारक्ताक्षोहृदिसंघातशूलवान् वक्त्रेणचैवोच्छ्वसितिज्वरस्तंहंतिमानवं हृ
ष्टरोमारोमांचवान् हृदिसंघातशूलवान् संनिपातिकशूलवान् वक्त्रेणचैवोच्छ्वसितिनतुना
सिकयाकचित् अन्यच्च हिक्काश्वासतृषायुक्तंमूढंविभ्रांतलोचनं संततोच्छ्वसितंक्षीणंनरंक्ष।
पयतिज्वरः क्षपयतिसमापयतीत्यर्थः अन्यच्च हतप्रभेंद्रियंक्षाममरोचकनिपीडितं गंभीरती
क्ष्णवेगार्त्तंज्वरितंपरिवर्जयेत् हताप्रभादीप्तिर्येषां अथवा हताप्रभाप्रतिभाविषयग्रहणशक्ति
र्येषां तथाविधानींद्रियाणियस्यतं हतप्रभेंद्रियं क्षामंक्षीणं गंभीरंतीक्ष्णवेगार्त्तं गंभीरः उक्तलक्ष ७५

णः तीक्ष्णवेगः अतिदुःसहवेगः ताभ्यांआर्त्तंदुःखितं अन्यच्च मरणंप्राप्नुयात्तत्रयुक्तस्यानगतेज्वरेश्ले
ष्मसंस्तब्धतामोहः युक्तस्यतुविशेषतः व्याख्यातोयंश्लोकः विषमज्वरस्यारिष्टमाह आरंभाद्वि
षमोयस्यपस्यवादैर्घ्यरात्रिकः क्षीणस्यचातिरूक्षस्यगंभीरोयस्यहंतितं यस्य आरंभाद्विषमः प्र
थमोत्पत्तेरेवविषमः ननुज्वरोव्यष्टस्ययस्यदैर्घरात्रिकोवायस्यक्षीणस्यातिरूक्षस्यचगंभीरोभ।
वतितंविषमोदैर्घरात्रिकोगंभीरश्चहंतीत्यर्थः इतिज्वराधिकारः अथातीसाराधिकारः तत्राती
सारस्यविप्रकृष्टानिनिदानान्याह गुर्वतिस्निग्धरूक्षोष्णद्रवस्थूलातिशीतलैः विरुद्धाध्यशना
जीर्णैर्विषमैश्चापिभोजनैः स्नेहाद्यैरतियुक्तैश्चमिथ्यायुक्तैर्विषैर्भयैः शोकदुष्टांबुमद्यादिपानैः
सात्म्यर्तुपर्य्ययैः जलाभिरमणैर्वेगविघातैः कृमिदोषतः नृणांभजत्यतीसारोलक्षणंतस्यव।
क्ष्यते गुरुमात्रयास्वभावेनसंस्कारेणच अतिशब्दः स्थूलांतैः संवध्यते स्थूलं असम्यक्पिष्टं
गोधूमादि विरुद्धंसंयुक्तक्षीरमत्स्यादि अध्यशनं अजीर्णेभुज्यते यत्तुतदध्यशनमुच्यते अजीर्णं

मा·प्र· आमंविदग्धंचवक्रस्तोकमकालेचक्रुर्कंयद्विषमंमतं भोजनैरितिगुर्वादिभिर्विषमांतैः सर्वैःसहसंवध्य
७६ ते स्नेहाद्यैः स्नेहपानस्वेदनविरेचनानुवासननिरूहांतैः अतियुक्तैः वारंवारंप्रयुक्तैः मिथ्यायुक्तैः
अविधिप्रयुक्तैश्चतैः विषैः विषाणिपत्रस्थावराणितेषामधोगत्वात् शोकोवंध्वादिवियोगजनिताम
नःपीडासात्म्यर्तुपर्ययैः सात्म्यविपरीतैरसात्म्यैः तथायस्मिन्नृतौयदुचितंतद्विपरीतैः जलाभिरम
णैः जलक्रीडादिभिर्वेगविघातैः मूत्रपुरीषाद्यवधारणैः कृमिदोषतः कृमिभिः पक्वाशयस्थैर्दु
ष्टैः एतानियथासंभवंवातादीनांदुष्टेः कारणानिवोद्धव्यानि नन्वेवंसतिस्वहेतुदुष्टेनवातादिनाअति
सारोभवत्येवतावन्मात्रंवाच्यंभवतिकिमर्थंगुर्वाद्यभिधानं उच्यते गुर्वादिहेतुदूषिताएववातादयोम्बा
ताद्योवाकुल्येनातीसारंजनयंति नतुलंघनभुक्तजीर्णतालघ्वन्नक्रोधतृषाक्षुधाभिहननदध्यव्याया
मयर्षाशरद्ग्रीष्मांतादिभिःकुपिताः अतोगुर्वादीन्युच्यंते एवमन्यत्रापिवोद्धव्यं तस्यैवपूर्वरूपमा
ह हृन्नाभिपायूदरकुक्षितोदोगात्रावसादानिलसंनिरोधाः विड्संगआध्मानमथाविपाकोभवि ७६

षद्यसंसर्गो गरीयान्प्रधानं अंतर्दाहोधिकातृष्णाप्रलापःश्वसनंभ्रमः संध्यस्थिशूलंमस्वेदो
दोषवर्चोविनिग्रहः अंतर्वेगस्यलिंगानिकष्टसाध्यत्वमेवच वर्चोविनिग्रहःपुरीषाप्रवृत्तिः सं
तापोल्पधिकोवाह्येतृष्णादीनांचमार्दवं वहिर्वेगस्यलिंगानिसुखसाध्यत्वमेवच अथासाध्यस्यज्व
रस्यलक्षणमाह ज्वरःक्षीणस्यशूनस्यगंभीरोदैर्घरात्रिकः असाध्योवलवान्यश्चकेशसीमंतकृ
ज्ज्वरः दैर्घरात्रिकःवहुरात्रानुवंधी केशसीमंतकृत् प्रभावात्केशेषुसीमंतंयःकरोति गंभीर
स्यलक्षणमाह गंभीरस्तुज्वरोज्ञेयोह्यंतर्दाहेनतृष्णया आनद्धत्वेनवात्यर्थंकासश्वासोद्गमेनच
आनद्धत्वेन निवद्धमलत्वेनसामान्यज्वरेपिकर्णमूलशोथस्यासाध्यत्वादिकमाह ज्वरस्यपूर्वं
ज्वरमध्यतोवाज्वरांततोवाश्रुतिमूलशोथः क्रमादसाध्यःखलुकृच्छ्रसाध्यः सुखेनसाध्योमुनि
भिःप्रदिष्टः अथारिष्टमाह तत्रारिष्टस्यलक्षणं रोगिणोमरणंयस्मादवश्यंभाविलक्ष्यते तल्लक्ष
णमरिष्टंस्यादरिष्टमप्यभिधीयते हेतुभिर्वहुभिर्जातोवलिभिर्वहुलक्षणः ज्वरःप्राणान्तकृद्यश्च शी

भा·प्र· चविशेषेणतत्तुपक्वंविनिर्दिशेत् नचसंग्राहकंदद्यात्पूर्वमामातिसारिणे अकालेसंग्रहीतोपिवि
७१ कारान्कुरुतेबहून् दंडकालसकाध्मानग्रहणीअर्शोभगंदरान् शोथपांड्वामयप्लीहगुल्ममेहोदर
ज्वरान् उंत्रस्यःस्थविरस्यश्चवातपित्तात्मकश्चयः क्षीणधातुबलस्यापिबहुदोषोतिविस्रुतः
आमोपिस्तंभनीयःस्यात्पाचनान्मरणंभवेत् लंघनमेकंमुक्त्वानचान्यदस्तीहभेषजंबलिनः
समुदीर्णदोषनिचयंतत्पाचयतेतथाशमयेत् ततलंघनंएवदोषघ्नः सहपिपासायांदोषपाका
र्थंषडंगविधिनार्द्धस्रुतंयोगचतुष्टयमाह धान्यांपुन्यांसृतंतोयंतृष्णादाहातिसारिणे ह्रीवेरशृं
गवेराभ्यांमुस्तपर्प्पटकेनवा मुस्तोदीच्यशृतंशीतंप्रदातव्यंपिपासवे हितंलंघनमेवादौपूर्वरू
पेतिसारिणः कार्य्यंवानशनस्यांतेसद्रवंलघुभोजनं पथ्यादारुवचामुस्तैर्नागरातिविषान्वितैः
आमातीसारनाशायक्वाथमेभिःपिबेन्नरः पथ्यादिः क्वाथः पाठाहिंग्वजमोदोग्रापंचकोलाद्
डंरजः उष्णांबुपीतंसरुजंजयत्यामंससैंधवं पाठादिचूर्णं हरीतकीसातिविषाहिंगुसौवर्च्चलंवचा ७१

सैंधवंचापिसंपिष्यपाययेदुष्णवारिणा आमातिसारंयोभोग्यंपाचयित्वाचिकित्सति आमातिसारोयो
गेनयद्येतेननशाम्यति नेतंयोगगणंतेनापिचिकित्सतिचिकित्सकः चिकित्सतिअपनयति हरीतक्यादि
कल्कः वत्सकातिविषाबिल्वमुस्तवालकजंशृतं अतीसारंजयेत्सामंविबद्धंरक्तशूलजित् वत्सकादि
क्वाथः एरंडरससंपिष्टंपक्वमाम्रंचनागरं आमातिसारशूलघ्नंदीपनंपाचनंपरं नागरस्यपुटपाकः
धान्यबालकबिल्वाद्द्नागरैःपाचितंजलं आमशूलविबंधघ्नंपाचनंनित्यसेवितं धान्यपंचकं पिबे
द्धान्यचतुष्कंतुशुंठीत्यागाद्वदंतिहि रक्तेपिपित्तसाधर्म्यात्क्वथितंधान्यचतुष्टयं धान्यचतुष्कं इत्यामा
तीसारचिकित्सा सलोध्रंधातकीबिल्वंमुस्ताम्रास्थिकलिंगकं पिबेन्माहिषतक्रेणपक्वातीसार
नाशनं लोध्रादिचूर्णं अंबष्ठाधातकीलोध्रसमंगापद्मकेसरं मधुकारलुबिल्वंचपक्वातीसा
रहागणः अरलुःशोणकः पाठादिर्गणः समंगाधातकीपुष्पमंजिष्ठालोध्रएवच शाल्मलीवे
ष्टकोलोध्रोदाडिमकुफलत्वचो आम्रास्थिमध्यंलोध्रश्चबिल्वमध्यंप्रियंगुच मधुकंशृंगवेरंचदी

भा·प्र· घृष्टं तत्वगेव च चत्वार एते योगाः स्युः पक्वातीसारनाशनाः तेयोगाश्च पयोज्याः स्युः सक्षौद्रास्तंडुलांबु-
७८ ना समंगा त्वलुशालुः शाल्मलीवेष्टको मोचरसः दाडिमस्य कुसुमफलयोस्त्वचौ प्रियंगोर्नपुंसकत्व
मत्र फलेवर्त्तमानत्वात् शृंगवेरमत्र शुंठी दीर्घवृंतः शोणकस्तस्य त्वक् समंगादीनि चत्वारि चूर्णा-
नि कंचटजंबदाडिमशृंगाटकपत्र विल्ववहिष्टं जलधरनागरसहितं गंगामपिवेगवाहिनीं रुंध्या
त् कंचटश्चतुराई शाकस्यभेदः कंचटादिभिश्चतुर्भिः पत्रशाद्वः सेवध्यते वर्हिष्टं वालकं गंगाध
रः क्वाथः मोचरसमुस्तनागरपाठारलुधातकीकुसुमैः चूर्णं मथितसमेतं रुणद्धि गंगाप्रवाह
मपि अरलुशोणपाठा मथितं निर्जलं दधिवस्त्रपूतं गंगाधरश्चूर्णं मुस्तावत्सकवीजं मोचर
सो विल्वधातकीलोध्रं गुडमथितसंप्रयुक्तं गंगामपिवेगवाहिनीं रुध्यात् द्वितीयं गंगाधरश्चूर्णं
मुस्तारलुकशुंठीभिः धातकीलोध्रवालकैः विल्वमोचरसाभ्यां च पाठेंद्रयववत्सकैः आम्रवी
जसमंगातिविषायुक्तैर्विचूर्णितैः मधुतंडुलपानीयपीतैर्नश्यत्युग्रवाहिका सर्वेतिसारग्रहणी ७८

घ्नतस्तस्य पुरःसराणि अत्र कुक्षिशब्द उदरैकदेशवाची अनिलसन्निरोधः अधोवायोरप्रवृत्तिः
विट्संगः पुरीषाप्रवृत्तिः अविपाकोनुक्तस्य पुरस्सराणि एतानि लक्षणानि पूर्वभावीनि अथा
तीसारस्यसंप्राप्तिमाह संशम्यापांधातुरग्निं प्रवृद्धो वर्चोमिश्रो वायुनाधःप्रणुन्नः सरत्यतीवाति
सारं तमाहुर्व्याधिं घोरं षड्विधं तं वदंति अपांधातुः अत्र समासाकरणाद्बहुत्वेन चरसजलमू
त्रस्वेदकफपित्तरक्तादयो द्रवधातवो गृह्यंते प्रवृद्धः अग्निं संशाम्य समयित्वा वर्चोमिश्रः पुरी
षयुक्तः वायुना अधः प्रणुन्नः अधःप्रेरितः सामान्यंरूपमाह षड्विधं तं वदंतीति षड्विधत्वं
विवृणोति एकैकशः सर्वशश्चापि दोषैः शोकेनान्यः षष्ठ आमेन चोक्तः अथ सामान्याती-
सारस्य चिकित्सामाह आमपक्वक्रमं हित्वा नातिसारे क्रिया यतः अतोऽतिसारे सर्वस्मिन्ना
मंपक्वं च लक्षयेत् क्रमश्चिकित्सा तत्रामपक्वयोर्लक्षणं संसृष्टमेभिर्दोषैस्तु न्यस्तमप्स्वनिम
ज्जति पुरीषं मुक्तशुर्गंधि पिच्छिलं चामसंज्ञितं एतान्येव तु लिंगानि विपरीतानि यस्य वै लाघवं

अथतस्यचिकित्सा वचाचातिविषामुस्तंवीजानिकुटजस्यच श्रेष्ठःकषायएतेषांवातातीसारशांतये
अथपित्तातिसारस्यलक्षणं पित्तात्पीतंशारुणंफक्कंदुर्गंधिहरितंद्रुतं गुदपाकतृषामूर्छादाहयुक्तंप्रवर्तते
अथतस्यचिकित्सा विल्वशक्रयवांभोदवालकातिविषाकृतः कषायोहंत्यतीसारंसामंपित्तसमु
द्भवं विल्वादिःक्वाथः रसांजनंसातिविषंकुटजस्यफलंत्वचं धातकीशृंगवेरंचपाययेत्तंदुलांवुना
निहंतिमधुनापीतंपित्तातीसारमुल्वणं अग्निंसंपयत्येतच्छूलमाशुनिवर्तयेत् रसांजनादिचूर्णं अ
थपित्तातीसारभेदस्यरक्तातीसारस्यसंप्राप्तिमाह पित्तकृंतियदात्यर्थंद्रव्याण्यश्नातिपैत्तिक तदो
पजायतेतीक्ष्णोरक्तातीसारउल्वणःतस्यचिकित्सा वत्सकतरुत्वगार्द्रदाडिमफलसंभवाल्कक(
च त्वगुगर्भंपलमात्रंविपचेद्दष्टांगसंमितेतोये अष्टमभागशेषंक्वाथंमधुनापिवेत्पुरुषः रक्ता(
तिसारमुल्वणमतिशापितंनाशयेन्नियतं कुटजदाडिमक्वाथः कुटजातिविषामुस्तंवालकंलो
ध्रचंदनं धातकीदाडिमंपाठाक्वाथमेषांसमाक्षिकं पिवेद्रक्तातिसारेतुदाहशूलामसंयुते कुटजा ७९

दिकषायोयंसर्वातीसारनाशनः चंदनमत्ररक्तं कुटजादिःक्वाथः गुडेनभक्षयेद्विल्वंरक्तातिसारनाश
नं आमशूलविवंधघ्नंकुक्षिरोगहरंपरं गुडविल्वं जंवाम्रामलकीनांतुकुट्टयेत्पल्लवान्नवान् संगृह्य
स्वरसंतेषांअजाक्षीरेणयोजयेत् तत्पिवेन्मधुनायुक्तंरक्तातीसारनाशनं जंवादिक्वाथः निःक्वाथ्य
मूलममलंगिरिमल्लिकायाः सम्यक्पलद्वितयमष्टचतुःशरावे तत्पादशेषसलिलंखलुशोषणी
यंक्षीरेपलद्वयमितेकुशलैरजायाः प्रक्षिप्यमाषकानष्टौमधुनस्तत्रशीतले रक्तातिसारीतत्पीत्वा
नैरुज्यंक्षिप्रमाप्नुयात् कुटजक्षीरं पीत्वाशतावरीकल्कंपयसाक्षीरभुग्जयेत् रक्तातिसारंपी
त्वावातयासिद्धंघृतंनरः शतावरीकल्कहद्घृतं गोदुग्धनवनीतंचमधुनासितयासह लीढंर(
क्तातिसारेतुग्राहकंपरमंमतं नवनीतावलेहः पीतंमधुसितायुक्तंचंदनंतंदुलांवुना रक्ताति
सारजिद्रक्तपित्ततृड्दाहमेहनुत् चंदनमत्रश्वेतं चंदनकल्कः हिंगुलंमरिचंगंधंपिप्पलीटं
कणंविषं कनकस्यचवीजानिसमांशानिविजयाद्रवैः मर्दयेद्यामममात्रंतुचणमात्रावटीकृता

भा·प्र· क्षणाद्ग्रहणीं हंति रसः कनकसुंदरः अग्निमांद्यं ज्वरं तीव्रमतीसारं च नाशयेत् दध्यन्नं दापयेत्पथ्यं
८० यद्वा तक्रौदनं चरेत् ग्रहणीदोषिणां तक्रं दीपनं ग्राहि लाघवं पथ्यं मधुरपाकित्वान्न च पित्तप्रकोप
नं इति कनकसुंदरः विरेकैर्वह्निभिर्यस्य गुदं पित्तेन दह्यते पच्यते वा तयोः कार्य्यः सेकप्रक्षालना
दिकं आदिशब्देन लेपादिग्रहः पटोलयष्टीमधुककषायेण शिशिरेण हि गुदप्रक्षालनं कार्य्यं तेन
च गुदसेचनं दाहे पाके हितं छागीदुग्धं सक्षौद्रशर्करं गुदस्य क्षालने सेके युक्तं पाने च भोजने गुदा
स्य दाहपाकयोः गुदनिःसरणे प्रोक्तं चांगेरीघृतमुत्तमं अतिप्रवृत्या महती भवेद्यदि गुदव्यथा
स्विन्नमूषकमांसेन तदा संस्वेदयेद्गुदं अथ गोधूमचूर्णस्य सम्यक्नीतस्य तु वारिणा साज्यस्य गोल
कं कृत्वा मृदु संस्वेदयेद्गुदं गुदव्यथायां गुदभ्रंशे गुदं स्नेहैरभ्यज्यांतः प्रवेशयेत् प्रविष्टं स्वेद
येन्मंदं मूषकस्यामिषेण हि मूषकस्यामिषेण कांजिकेनोत्स्विन्नेन एरंडपत्रादिस्थापितेन
स्वेदयेत् मूषकस्याथवसया पायुं सम्यक्प्रलेपयेत् गुदभ्रंशसान्निध्यो व्याधिः प्रणश्यति न संशयः ८०

प्रशमं याति वेगतः वृद्धगंगाधरं चूर्णं रुंध्यात्सर्वाणि वाहिनीं समंगालज्जालुः वृद्धगंगाधरं चूर्णं अंकोटमूल
कल्कस्तंडुलपयसा समाक्षिकः पीतः सेतुरिव वारिवेगं हरति तिनिरुंध्यादतीसारं अंकोठकल्कः कुट
जत्वक्तुलामार्द्रद्रोणेन रिपचेद्भिषक् पादशेषं श्रृतं नीत्वा वस्त्रपूतं पुनः पचेत् लज्जालुधातकीबिल्व
पाठामोचरसः तथा मुस्तं प्रतिविषा चैव चूर्णान्येषां पलं पलं निक्षिप्य विपचेत्तावद्यावद्दर्वीप्रलिप्य
ते जलेन छागदुग्धेन पीतो मंडेन वा जयेत् घोरान्सर्वानतीसारान्नानावर्णान्सवेदनान् असृग्दरं समस्तं
च तथार्शांसि प्रवाहिकां कुटजाष्टकावलेहः कृत्वालवालं सुदृढं पिष्टैरामलकैर्भिषक् आर्द्रकस्य
रसेनाशु पूरयेन्नाभिमंडलं नदीवेगोपमं घोरं प्रवृद्धं दुर्धरं नृणां सद्योतीसारमत्युग्रं नाशयत्येष यो
गराट् पाठापिष्टाच्चांगेरीदध्ना तथा मध्यत्वगाम्रजा अतीसारं व्यथादाहयुक्तं हंत्युदरेश्वता अथवा
तातिसारस्य लक्षणं अरुणं फेनिलं रूक्षमल्पमल्पं मुहुर्मुहुः शकृदामं सरुक्शब्दं मारुतेना
तिसार्यते अरुणमीषद्रक्तं मलं शकृत् पुरीषं सरुक्शब्दं शब्दो गुदे तत्साहचर्य्याद्रुगपि गुदवेदनया ।

वर्चलं व्योषमभयातिविषा वचाः पीतमुष्णांबुना चूर्णमेषां श्लेष्मातिसारनुत हिंग्वादिचूर्णं कृमि
शत्रुर्वचाबिल्वयेत्रधान्याककट्फलं एषां क्वाथं निषेव्याददतीसारविलासजे विडंगादिः क्वाथः
अथ द्विदोषजातीसाराणां लक्षणानि चिकित्सा द्विदोषलक्षणैश्चिह्यादतीसारं द्विदोषजं तेषां
चिकित्सा प्रोक्तैव विशिष्टा च निगद्यते कट्फलं मधुकं लोध्रं त्वग्दाडिमफलस्य च सतंडुलजलं चूर्णं
वातपित्तातिसारनुत वातपित्तातिसारे चित्रकातिविषामुस्तं वालबिल्वं सनागरं वत्सकत्व
कफलं पथ्या वातश्लेष्मातिसारजित वातश्लेष्मातिसारे मुस्ता सातिविषा मूर्वा वचा सकुटजाः
समाः एषां कषायः सक्षौद्रः पित्तश्लेष्मातिसारनुत पित्तकफातिसारे अथ सन्निपातातिसारस्य
लक्षणं तंद्रायुक्तो मोहसादास्यशोषी वर्चः कुर्यान्नैकरूपं तृषार्त्तः सर्वोद्भूते सर्वलिंगोपपत्तिः
कृच्छ्रो साध्यो बालवृद्धाबलानां अथ तस्य चिकित्सा पंचमूलीबलाबिल्वगुडूचीमुस्तनागरैः
पाठाभूनिंबवर्हिष्टकुटजत्वक्फलैः शृतं सर्वजं हंत्यतीसारं ज्वरश्वासपितथावमिं सशूलोपद्रवं

श्वासं कासं च सापि सुदुस्तरं पंचमूल्यत्र सामान्या विज्ञेया योज्या कनीयसी वाते पनर्वलासे च सा योज्या
महतीमता वर्हिष्टं वालकं पंचमूल्यादिः क्वाथः अभया नागरं मुस्तं गुडेन सह योजितं चतुःसमे
यं गुटिका स्यात्त्रिदोषातिसारनुत आमातीसारमानाहं सविबंधं विसूचिकां कृमीनरोचकं हन्या
द्दीपयत्याशु चानलं चतुःसमा गुटिका तत्कालाकृष्टकुटजत्वचं तंडुलवारिणा पिष्टं चतुःप
लमितं जंबूपल्लववेष्टितं सूत्रेण बध्वा गोधूमपिष्टेनापरिवेष्टितं लिप्तां च घनपंकेन निर्दहे
द्गोमयाग्निना अंगारवर्णं च मृदं दृष्ट्वा वह्नेः समुद्धरेत ततो रसं समादाय शीतं क्षौद्रयुतं पिवेत
अतः कृत्वा त्रिपुत्रणपुटपाकस्तु कौटजः जयेत्सर्वानतीसारान्दुस्तरान्सुचिरोत्थितान् कुट
जपुटपाकः कुटजत्वक्कृतः क्वाथो यस्तु घनीकृतः सलीढो तिविषायुक्तः स्यात्त्रिदोषा
तिसारजित इच्छंत्यत्राष्टमांसेन काथ्यादतिविषारजः प्रक्षेपत्वाच्चतुर्थांशमितिके चिद्वदंति
हि कुटजावलेहः पलशतं कौटमूलस्य पाठां दार्वीं च तत्समां पिष्ट्वा तंडुलतोयेन वटकानक्षसं

मितान् छायाशुष्कान्श्लक्ष्णान्कुर्यान्निष्केकं तंडुलांबुना पेषयित्वा प्रदद्यात्तं पानाय गदिने भिषक्
वातपित्तकफोद्भूतान्द्वंद्वजान्सन्निपातिकान् हन्यात्सर्वानतीसारानंकोठमूलप्रयोजितः अंकोठव
टकः अथागंतुजस्य शोकातीसारस्य संप्राप्तिपूर्वकं लक्षणमाह तैस्तैर्भावैः शोचतोल्पाशनस्य
बाष्पोष्मा वै वह्निमाविश्य जंतोः कोष्ठं गत्वा क्षोभयेत्तस्य रक्तं तच्चाधस्तात्काकणंतीप्रकाशं नि
र्गच्छेद्वेविड्विमिश्रं ह्यविड्वा निर्गंधं वागंधवद्वातिसारः शोकोत्पन्नो दुश्चिकित्स्योतिमात्रं रोगो वैद्यैः
कष्ट एष प्रदिष्टः अयमर्थः तैस्तैर्भावैः बंधुक्षितद्रव्यादिभिः शोचतः शोकं कुर्वतः जंतोः प्राणे
नः बाष्पोष्मा बाष्पः शोकजदेहोष्मणा जनितं नेत्रनासागलादिषु जलं तेन सहितः ऊष्मा शोक
जं देहतेजः स कोष्ठं गत्वा वह्निमाविश्य जठराग्निं मंदीकृत्य बाष्पसाहित्यादूष्मणापि वह्नेर्मंदी
भाव इति न दोषः वह्नेर्मंदीभावादेव अल्पाशनस्येति जंतोर्विशेषणं ततस्तस्य जंतोः रक्तं क्षोभ
येत् स्वस्थानाच्चालयेदिति संप्राप्तिः अथ लक्षणं तच्च रक्तं अधस्तात् गुदात्काकणंतीप्रकाशं गुं

चांगेरीकोलदध्यम्लक्षारनागरसंयुतं घृतं विपक्वं पातव्यं गुदभ्रंशरुगदापहं चांगेरी चतुष्पत्रा अम्ल
लोनिका तस्याः स्वरसः कोलस्य क्वाथः दध्यम्लं दधिरूपमम्लं एतत्त्रयं मिलितं घृतात्चतुर्गुणं
क्षारनागरयोः कल्कः चांगेरीघृतं कोमलं पद्मिनीपत्रं यः खादेच्छर्करान्वितं एतन्निश्चित्य नि
र्दिष्टं न तस्य गुदनिर्गमः पद्मिनीपत्रं पुरइनिपत्रं जलसंशोष्य संचूर्ण्य शर्करायुक्तं खादेत् अयं
गुदभ्रंशोतीसारं विनापि भवति ततः क्षुद्ररोगेषु लिखितः अत्र गुदस्य दाहपाकव्यथा प्रसं
गाद्भ्रंशोपि लिखितः चिकित्सा तु नयत्र तुल्यैव अथ कफातीसारस्य लक्षणं श्वेतं स्निग्धं सक
फं श्लेष्मणा तु विस्रं शीतं हृष्टरोमा मनुष्यः यदुक्तं श्वेतं स्निग्धं घनं विस्रं शीतलं मंदयेदनं
गौरवारुचिसंयुक्तं श्लेष्मणा सार्यते शकृत् विस्रं आमगंधि अथ तस्य चिकित्सा कफातिसा
रे प्रथमं हितं लंघनपाचनं योज्यश्चामातिसारघ्नो यथोक्तो दीपनो गणः चव्यं सातिविषं मुस्तं
बालबिल्वं सनागरं वत्सकत्वक्फलं पेयं पथ्याद्यं श्लेष्मातिसारजित् चव्यादिः क्वाथः हिंगुसो

जाफलसदृशं विट्विमिश्रं गन्धवच्चाविट् निर्गंधं वा निर्गच्छेत् शोकोत्पन्नोऽतिसारः अतिमात्रं दुश्चि
कित्स्यः शोकापनोदनं विना केवलेन भेषजेन प्रतिकर्त्तुमशक्यत्वात् एषोऽतिसारो वैद्यैः कष्टःक
ष्टेन साध्यः प्रदिष्टः कथित इत्यर्थः अथागंतुजत्वेन सामान्याद्भयातिसारस्यापि संप्राप्तिपूर्वकं लक्षण
मत्रैवाह भयेन क्षोभिता दोषा दूषयंति मलं यदा तदातिसार्यते तत्तु द्रुतिप्रचुलं जलप्लवं वातपित्तति
सारस्य प्रायो लिंगैः समन्वितं आ भयोपशमात् स्वधर्म्मयस्मिन्स्यात् स भयात्स्मृतः प्लवत इति प्लवं जले
प्लवमानं ननु भयातिसारस्य कथमागंतुजत्वमयमपि त्रिदोषज एव यत आह भयेन क्षोभिता द्वि
ता दोषा मलं दूषयंति तन्मलमतिसरति अत्र पूर्वमेव दोषसंबंधः उच्यते रागद्वेषभयाद्यैश्च ते स्यु
रागंतवो गदाः इति वचनाद्भयातीसारस्यागंतुज एव श्लोकस्य त्वयमर्थः भयेनैव हेतुना तेन दोषा
वातपित्तकफाः अतिसारणाय क्षोभिताः संचालिता न तु दूषिताः भयेन त्रयाणामपि दोषाणां दूषणं
संभवात् अतिसर्त्तुं चलिता वातपित्तकफा मलं दूषयंति तत्सर्वं वातपित्तकफमलं भयेनैवातिसा

मा॰प्र॰ ८४ यति पश्चाद्वातसंबंधः भयाद्वायुरितिवचनात् अतएवभयातीसारेवातहार्य्येवक्रियाकार्य्यितेसतिस
माधिः अथतयोश्चिकित्सा भयशोकसमुद्भूतौज्ञेयौवाताऽतिसारवत् तयोर्वातहरीकार्य्याहर्षणाश्वा
सनैःक्रिया अथामातिसारस्यसंप्राप्तिपूर्वकलक्षणमाह अन्नाजीर्णात्प्रद्रुताःक्षोभयंतोदोषाःको
ष्ठधातुसंघान्मलांश्च नानावर्णनैकशःसारयंतिशूलोपेतंषष्ठमेनंवदंति अन्नंभुक्तंतदजीर्णंचे
तिकर्मधारयः अन्नाजीर्णात्तस्मात् प्रद्रुताः उपद्रुताः क्षोभयंतः चालयंतः नैकशःइत्यत्रनाका
द्वित्वान्नाक्षरविपर्य्ययः नन्वामेनदोषाःदूष्यंतेगुर्वादिलक्षणदिभिरिवते चातीसारमुत्पादयंति
नत्वाममेवातिसारमुत्पादयतितेनामातीसारोपिदोषजएवकिमर्थमयंपृथगुच्यते उच्यते आमाती
सारस्यचिकित्साविशेषार्थंसंप्राप्तिपूर्वकोलक्षणविशेषःपृथक्कृतः सचिकित्साविशेषःतमाह
अतीसारेषुसर्वेष्वेवसंग्राहकमौषधमुक्तमामातीसारेग्राहकंनिषिद्धं यदुक्तं नाम्मेसंग्राहकंद
द्यादतीसारेकदाचन संगृहीतोवलादामोविकारान्कुरुतेवहूनिति वलात् भेषजवलात् विका ८४

 विल्वस्य पचेत् आदौ वशेषितं सक्षीरं साधयेत्तैलं श्लक्ष्णपिष्टैरिमैः समैः विल्वं सधातकी कुष्ठं शुंठी रास्ना
 पुनर्नवा देवदारु वचा मुस्तं लोध्रं मोचरसान्वितं एभिर्मृद्वग्निना पक्वं ग्रहण्यर्शोऽतिसारनुत् विल्वतैल
मिति ख्यातमत्रिपुत्रेण भाषितं ग्रहण्यर्शोऽधिकारे ये स्नेहाः समुपदर्शिताः प्रयोज्यास्तेऽतिसारेऽपि त्रिया
णां तुल्यहेतुना त्रयाणां ग्रहण्यर्शोऽतिसाराणां विल्वतैलं अथातिसारभेदस्य प्रवाहिकाव्याधेः
संप्राप्तिपूर्वकं लक्षणमाह वायुः प्रवृद्धो निचितं बलासं नुदत्यधस्तादहिताशनस्य प्रवाहतोऽल्पं
बहुशो मलाक्तं प्रवाहिकां तां प्रवदंति तज्ज्ञाः अस्यायमर्थः अहिताशनस्य अतिशयेन वातल
भक्ष्यभोजिनः प्रवृद्धो वायुः प्रवाहतः कराग्रहस्थलेन सश्वासं वायुमपानमार्गेण त्यजतः निचितं सं
चितं बलासं कफं मलाक्तं पुरीषयुक्तं अल्पं बहुशः वारं वारं अधस्तात् गुदमार्गेण नुदति प्रेरयति
तज्ज्ञाः पुराणवैद्याः तां प्रवाहिकां प्रवदंति कथयंति तस्या वातजादिभेदेन रूपमाह प्रवाहिका वा
तकृता सशूला पित्तात् सदाहा सकफा कफाच्च सशोणिता शोणितसंभवा च ताः स्नेहरूक्षप्रभवा मता

सु तत्र रूक्षप्रभवा वातजा स्नेहप्रभवा कफजा तु शब्दात् तीक्ष्णोष्णप्रभवा पित्तजा रक्तजा च तासा
मतीसारवद्दोषलिंगं क्रमं चामविपक्वतं च क्रमं चिकित्सां तस्याश्चिकित्सामाह बिल्वपेशी
गुडं लोध्रं तैलं मरिचसंयुतं लीढ्वा प्रवाहिकाक्रांतस्ससत्वरं सुखमाप्नुयात् विल्वादिरवलेहः धातकी
बदरीपत्रकपित्थरसमाक्षिकं सलोध्रमेकतो दध्ना पिबेन्निर्वाहिका हितः एकतः प्रत्येकं दध्नापि
बेदित्यर्थः निर्वाहिका प्रवाहिका धातक्यादिः अथासाध्यातिसारिणो लक्षणमाह पक्वजांबव
संकाशं यकृत्खंडनिभं तनु घृततैलवसामज्जवेसवारपयोदधि मांसधावनतोयाभं कृष्णं नीला
रुणप्रभम् दुर्गंधिकुणपंगंधाकदालोक्य नातिसारमुपक्रमेत तृष्णादाहारुचिश्वासहिक्कापार्श्वा
गान्प्रकल्प्याक्षसमानमूषां पलार्धमानंमरिचंप्रदेयंपलानिचत्वारिमहोषधस्य सितासमस्ते
नसमाप्यचूर्णंरोगानिमानाशुबलान्निहंति कासज्वरारोचकमेहगुल्मश्वासाग्निमांद्यग्र १४०

हणीविकारान् समशार्करंचूर्णंवटिकाघा वन्ह्यर्कसोमगगनेश्वरलोहताम्रंगंधंविषंमरिचटं
कणाहृच्छिलाश्च जातीफलंवरलवंगमरिष्टतिन्दुबीजंसमंनिखनयेत्खलुपक्वबिल्वे पाकंच
कीलकजलेनतथार्ककीणसूक्ष्मंविमर्द्यवरकाचघटेनिदध्यात् वल्लंतदर्धमपितद्भिषक
जनेति क्वाथेनचार्ककरसेनजलेनवाद्यात् हंत्येषराजगदपीनसकासतंद्राश्वासपांडु
हलीमककंठरोगान् मन्याहनुश्रवणलोचनदंतजिह्वारोगानयंभुटिति वाकुककाकुरो
षान् प्रोक्तोहरेणहरवल्लभप्रार्थितेननासाप्रकासइतिविश्रुतनामधेयः नासाप्रकासर
सः कुनटीसैंधवंव्योषंविडंगामयहिंगुभिः लेहःसाज्यमधुःकासश्वासहिक्कानिवारणः
हरितकीकणाशुंठीमरिचंगुडसंयुतं कासघ्नोमोदकःप्रोक्तःपरंवान्हिप्रदीपनः कर्षः
कर्षोशापलंपलद्वयंस्यात्ततोर्धकर्षंच मरिचस्यपिप्पलीनांदाडिमगुडयावशूकानां स
वैषधैरसाध्याःकासायेवैद्यनिर्मुक्ताः अपियूर्यंच्छर्दयतांतेषामिदमौषधंपथ्यं कर्षांशो

भा॰प्र॰ त्वक्कर्षद्वयं मरिचं कर्षमर्द्धंस्यात्पिप्पलीकर्षसंमिता अर्द्धकर्षेयवक्षारः कर्षयुग्मंचदाडि
१४१ मं एतच्चूर्णीकृतंयुंज्यादष्टकर्षगुडेनहि शाणप्रमाणांगुटिकांकृत्वावक्त्रेविधारयेत् अस्याः
प्रभावात्सर्वेपिकासायांत्येवसंक्षयं दाडिमंदाडिमफलवल्कलंमार्त्सं मरिचादिवटिका स
मूलपल्लवकंटकार्य्यास्तुलांततोद्रोणमितंजलंच हरीतकीनांशतमेकपात्रेविपाच्यकुर्य्या
च्चरणाम्बुशेषं तस्मिन्कषायेतनुवस्त्रपूतेहरीतकीभिःसहितोगुडस्य तुलांविनिक्षिप्यपचेत्सु
पक्वमेतत्समुत्तार्यसुशीतलेषु पलंपलंचापिकटुत्रयस्यतथाचतुर्जातपलंविचूर्ण्य पलानिष
ट्पुष्परसस्यचापिविनिःक्षिपेत्तत्रविमिश्र्ययत्नात् प्रयुज्यमानोविधिनैषलेहोयथाबलंचापि
यथानलंच वातात्मकंपित्तकृतंकफोत्थंत्रिदोषजातानपिचत्रिदोषं क्षतोद्भवंचक्षयजंच
कासंश्वासंचहन्यात्सहपीनसेन यक्ष्माणमेकादशरूपमुग्रंहरीतकीयंभृगुणोपदिष्टा पु
ष्परसःमधुचातुर्जातिंत्वगेलापत्रनागकेसराः भृगुहरीतकी कंटकारीतुलांनीरद्रोणेपक्त्वा १४१

क्षितान् ग्राम्यानूपोदकैःरसैरित्यन्वयः आत्मगुप्ताकेवांचइतिलोके दशमूलीकृताकासश्वासहृ
कारुजापहा यवागूर्दीपनीवृष्यावातरोगविनाशिनी रसःकर्कटकानांवाघृतभृष्टःसनागरः
वातकासप्रशमनःशृंगीमत्स्यस्यवापुनः अथपित्तकासस्यचिकित्सा कंटकारीगुडूचीभ्यां
साकर्चूरवालकैः नागरेणचपिप्पल्याक्वथितंसलिलंपिबेत् शर्करामधुसंयुक्तंपित्तकास
हरंपरं अथकफकासस्यचिकित्सा पिप्पलीकट्फलंशुंठीशृंगीभार्ङ्गीतथोषणं कारवी
कंटकारीचसिंधुवारोयवानिका चित्रकोवासकश्चैषांकषायंविधिवत्कृतं कफकासवि
नाशायपिबेत्कृष्णारजोयुतं पिप्पल्यादिक्वाथः अथक्षतजकासचिकित्सा इक्षुवालि
काप्रसमृडालोत्पलचंदनं मधुकंपिप्पलीद्राक्षालाक्षाशृंगीशतावरी द्विगुणाचतुगाक्षी
रीसितासर्वचतुर्गुणा लिह्यान्मधुसर्पिर्भ्यांक्षतकासनिवृत्तये इक्षुवालिकाइक्षुभेदःचं
द्रइतिलोके पद्मंपद्मकाष्ठं मृणालंबिशंउत्पलंकमलं चंदनमत्रधवलंचूर्णत्वात् शृं

मा॰ प्र॰ त्राणिमुखादिवाक्षिपन् सदोषवानाशुहिनस्त्यसून्यतस्ततस्तु हिक्केत्यभिधीयते बुधैः वायुस्तत्रोदा
१४२ नः प्राणो बोद्धव्यः उदेति ऊर्ध्वं याति सस्वनः हि गिति शब्दवान् ऊर्ध्वगमनं विशिनष्टि यकृदित्या
दि प्लिहन्शब्दोप्यस्ति दीर्घत्वविकल्पत्वात् मुखादिति ल्यब्लोपे पंचमी तेन यकृत्प्लिहान्त्राणि मु
खमानीय आक्षिपन् निस्सारयन्निवेत्यर्थः सवायुः दोषवान् दोषोऽत्र कफः तद्वान् घोषवानि
ति पाठे घोषोऽव्यक्तध्वनिस्तद्वान् वायुः कफेनानुगत इति संप्राप्तिः हिनस्तीति हिक्का पृषोदरादित्वा
द्रूपसिद्धिः हिगिति हिक्कायति शब्दं करोतीति वा पूर्वरूपमाह कंठोरसोर्गुरुत्वं च वदनस्य क
षायता हिक्कायां पूर्वरूपाणि कुक्षेराटोप एव च वदनस्य कषायता वातात् नतु कफान्माधु
र्यव्याधिप्रभावात् अन्नजायाः लक्षणमाह पानान्नैरतिसंयुक्तैः सहसा पीडितोऽनिलः हिक्क
यत्यूर्ध्वगो भूत्वा तां विद्यादन्नजां भिषक् अनिलः प्राणो वायुः यमलाल्लिंगमाह चिरेण यमलै
र्वेगैर्या हिक्का संप्रवर्त्तते कंपयंती शिरो ग्रीवां यमलां तां विनिर्दिशेत् क्षुद्रामाह विकृष्टकाले १४२

र्या वेगैर्मंदैः समभिवर्त्तते क्षुद्रिका नाम सा हिक्का जत्रुमूलात्प्रधाविता विकृष्टकालैः चिरेण जत्रुक
क्षोरसोः संधिः गम्भीरामाह नाभिप्रवृत्ता या हिक्का घोरा गंभीरनादिनी अनेकोपद्रववती गंभीरा
नाम सा स्मृता अनेकोपद्रववती तृष्णाज्वरादियुक्ता महतीमाह मर्म्माणि पीडयंतीव सततं या
प्रवर्त्तते महाहिक्केति सा ज्ञेया सर्वगात्रप्रकंपिनी मर्म्माणि बस्तिहृदयशिरः प्रभृतीनि असा
ध्यत्वमाह आयम्यते हिक्कतो यस्य देहो दृष्टिश्चोर्ध्वं ताम्यते नित्यमेव क्षीणोऽन्नद्विट्क्षौति यश्चाति
मात्रं तौ द्वौ चांत्यौ वर्जयेद्धिक्कमानौ आयम्यते विस्तार्यत इव तोदादिति आयम्यत इत्यादिनान्ते
त्यमेवेत्यन्तेनैको हिक्कमानः क्षीण इत्यादिना गतिमात्रमित्यन्तेनापरः तौ द्वौ अंत्यौ च गंभीरया
महत्या च हिक्कमानौ वर्जयेत् अपरं च अतिसंचितदोषस्य भक्तच्छेदकृशस्य च व्याधिभिः
क्षीणदेहस्य वृद्धस्यातिव्यवायिनः आसां यासां समुत्पन्ना हिक्का हन्त्याशु जीवितं यमिका च
प्रलापार्त्तिमोहतृष्णासमन्विता साध्यत्वमाह अक्षीणश्चाप्यदीनश्च स्थिरधात्विंद्रियश्च यः

भा॰प्र॰ तस्यसाधयितुंशक्यायमिकाहन्त्यतोऽन्यथा अथहिक्कायाश्चिकित्सा यत्किंचित्कफवातघ्नमु
१४२ ष्णंवातानुलोमनं भेषजंपानमन्नंवाहिक्काश्वासेषुतद्धितम् हिक्काश्वासातुरेपूर्वंतैलाक्तेस्वेदइ
ष्यते ऊर्ध्वाधःशोधनंशक्तेदुर्बलेशमनंमतं प्राणावरोधतर्ज्जनविस्मापनशीतवारिपरिषेकैः
चित्रैःकथाप्रयोगैःशमयेद्धिक्कीमनोविघातैश्च हिक्कार्त्तस्यपयश्छागंहितंनागरसाधितं मधु
सौवर्चलोपेतंमातुलुंगरसंपिबेत् मधुकंमधुसंयुक्तंपिप्पलीशर्करान्वितं नागरंगुडसंयुक्तं
हिक्काघ्नंनावनत्रयं कृष्णामलकशुंठीनांचूर्णंमधुसितायुतं मुहुर्मुहुःप्रयोक्तव्यंहिक्काश्वासे
षुतद्धितं चूर्णंकणागैरिकयोस्सक्षौद्रंचावलेहयेत् प्रवालशंखत्रिफलाचूर्णंमधुघृतप्लुतं
पिप्पलीगैरिकंचैतिलेहोहिक्कानिवारणः नेपाल्याशोविषाणाद्याकुष्ठात्सर्जरसस्यच धूमं
कुशस्यवासाज्यंपिबेद्धिक्कोपशांतये नेपालीमनःशिला निर्धूमाङ्गारनिःक्षिप्तहिंगुमाष
रजोभवः हिक्काःपंचापिहन्त्याशुधूमःपीतोनसंशयः हरेणूणांकणानांवाक्वाथोहिंगुसम १४२

कषायकं पादशेषंगृहीत्वाचतच्चूर्णानिदापयेत् पृथक्पलांशान्येतानिगुडूचीचव्यचित्रका
ःमुस्तंकर्कटशृंगीचत्र्यूषणंधन्वयासकं भार्ङ्गीरास्नाशटीचैवशर्करापलविंशतिः प्रत्येकंचय
लान्यष्टौप्रदद्यात्घृततैलयोः पक्वंलेहत्वमानीयशीतेमधुपलाष्टकं चतुःपलंतुगाक्षीर्याः
पिप्पलीचचतुःपला क्षिप्त्वानिदध्यात्सुदृढेमृन्मयेभाजनेशुभे लेहोयंहंतिहिक्कांत्रिकासश्वा
सानशेषतः कंटकार्य्यवलेहः इतिकासाधिकारः अथहिक्काधिकारः तत्रहिक्कायाविप्रकृ
ष्टनिदानमाह विदाहिगुरुविष्टंभिरूक्षाभिष्यंदिभोजनैः शीतपानाशनस्थानरजोधूमैस्तथा
निलैः व्यायामकर्म्मभाराध्ववेगाघातापतर्प्पणैः हिक्काश्वासश्चकासश्चनृणांसमुपजायते
अपतर्प्पणमनशनादि पूर्वरूपमाह कण्ठोरसोर्गुरुत्वंचवदनस्यकषायता हिक्कानाम्प्र
ग्रूपाणिकुक्षेराटोपएवच संप्राप्तिमाह वायुःकफेनानुगतःपंचहिक्काःकरोतिच अन्नजां
यमलांक्षुद्रांगंभीरांमहतींतथा सामान्यलक्षणमाह मुहुर्मुहुर्वायुरुदेतिसस्वनोयकृत्प्लिहा

नः विकृताक्ष्याननोबद्धमूत्रवर्चाविशीर्णवाक् दीनःप्रश्वसितंचास्यदूराद्विज्ञायतेभृशं महाश्वा।
सोपसृष्टस्तुक्षिप्रमेवविपद्यते उद्धूयमानवातः ऊर्द्ध्वंनीयमानोवातोयस्यसः शब्दवत् सशब्दंयथा।
स्यात् कीदृक्सशब्दइत्यस्तद्बोधयितुमाह मत्तर्षभइव उच्चैःश्वसितीत्यन्वयः संरुद्धः आनद्धः आना
हयुक्तइतियावत् ज्ञानंशास्त्रंविज्ञानंतदर्थविनिश्चयः विशीर्णवाक् स्खलितवचनः दीनः
म्लानः मारकश्चायंमहाश्वासः ऊर्द्ध्वश्वासमाह ऊर्द्ध्वंश्वसितियोऽत्यर्थंनचप्रत्याहरत्यधः श्लेष्मा
वृतमुखस्रोताःक्रुद्धगंधवहार्दितः ऊर्ध्वदृष्टिर्विपश्यंस्तुविभ्रान्ताक्षइतस्ततः प्रमुह्यन्वेद
नार्त्तश्चशुष्कास्योऽरतिपीडितः ऊर्ध्वश्वासेप्रकुपितेह्यधःश्वासोनिरुध्यते मुह्यतस्ताम्यतश्चो
र्ध्वश्वासस्तस्यैवहन्त्यसून् सर्वेष्वपिश्वासेषूर्ध्वश्वसनेपि अत्यर्थमिति विशेषः नचप्रत्याह
रत्यधः न्यश्वासमधःकरोतिश्लेष्मावृतेत्यादिश्लेष्मणावृतंयन्मुखंस्रोतांसिचतैः क्रुद्धोयोगं
धवहस्तेनार्दितः विपश्यन् इतस्ततोविकृतंयथास्यादेवंपश्यन् अधःश्वासोनिरुध्यतेश्वा १४४

सोनाधःप्रवर्त्ततइत्यर्थः ऊर्ध्वश्वासस्यारिष्टलक्षणमाह मुह्यतोमोहंप्राप्नुवतस्ताम्यतोग्लानिं
प्राप्नुवतश्चऊर्ध्वश्वासः असून्प्राणान्हंतितस्यैवेति नतुमोहग्लानिरहितस्य छिन्नश्वासमा
ह यस्तुश्वसितिविच्छिन्नंसर्वप्राणेनपीडितः नवाश्वसितिदुःखार्त्तोमर्मच्छेदरुजार्दितः आ
नाहस्वेदमूर्च्छार्त्तोदह्यमानेनवस्तिना विप्लुताक्षः परिक्षीणःश्वसन्रक्तैकलोचनः विचेताःप
रिशुष्कास्योविवर्णःप्रलपन्नरः छिन्नश्वासेनविच्छिन्नःसशीघ्रंविजहात्यसून् विच्छिन्नंसवि
च्छेदंसर्वप्राणेनयावद्बलेन मर्मच्छेदरुजार्दितः हृदयशिरश्छेदनवेदनयाइवपीडितः दह्य
मानेनवस्तिनाउपलक्षितः विप्लुताक्षः अश्रुपूर्णनेत्रः विचेताःउद्विग्नचित्तः छिन्नश्वासेन
विच्छिन्नःसःयस्तुश्वसितिविच्छिन्नमित्यादिलक्षणयुक्तोयःसनरश्छिन्नश्वासेनविच्छिन्नःपी
डितोबोद्धव्यइत्यर्थः मारकश्चायंछिन्नश्वासः तमकश्वासमाह प्रतिलोमंयदावायुःस्रोतांसि
प्रतिपद्यते ग्रीवांशिरश्चसंगृह्यश्लेष्माणंसमुदीर्यच करोतिपीनसंतेनकण्ठेघुर्घुरकंतथा

मा·प्र· अतीवतीव्रवेगंचश्वासंप्राणप्रपीडकं प्रताम्यतिसवेगेनत्रस्यतेसंनिरुध्यते प्रमोहंकासमानश्च
१४५ सगच्छतिमुहुर्मुहुः श्लेष्मण्यमुच्यमानेनभृशंभवतिदुःखितः तस्यैवचविमोक्षान्तेमुहूर्त्तंलभते
सुखं तथास्योध्वंसतेकण्ठः कृच्छ्राच्छक्नोतिभाषितुं नचापिनिद्रांलभतेशयानःश्वासपीडितः
पार्श्वेतस्यावगृह्णातिशयानस्यसमीरणः आसीनोलभतेसौख्यमुष्णंचैवाभिनंदति उच्छ्रिता
क्षोललाटेनस्विद्यताभृशमार्त्तिमान् विशुष्कास्योमुहुःश्वासोमुहुश्चैवावधम्यते मेघाम्बुशी
तप्राग्वातैःश्लेष्मलैश्चविवर्द्धते सयाप्यस्तमकश्वासःसाध्योवास्यान्नवोत्थितः संग्रहव्याख्यया
समुदीर्य वर्द्धयित्वा पीनसं नासास्रावंतेनश्लेष्मणा घुर्घुरकं प्राणप्रपीडकं प्राणधिष्ण्यान्हृ
दयप्रपीडकं प्रताम्यति तमसीवप्रविशतिवेगेनश्वासवेगेनसंनिरुध्यते निश्चेष्टोभवतीतिच
कः संनिरुध्यतेश्वासइतिजेज्जटः श्लेष्मणाअमुच्यमानेन सुखंसुखमिव ध्वंसतेध्वंसितोभ
वति शयानःशय्यानिहितांगः अवगृह्णाति पीडयति उष्णंचैवाभिनंदतीत्यनेनतमकोवा १४५

न्वितः हिक्काप्रशमनःश्रेष्ठोधन्वन्तरिवचोयथा चंद्रसूरस्यबीजानिक्षिपेदष्टगुणेजले यदामृद्नि
मर्दीयात्ततोवासस्रिगालयेत् हिक्कातिवेगविकलस्तज्जलंपलमात्रया पिबेत्पुनःपुनश्चापिहिक्का
वश्यंप्रशाम्यति चंद्रसूररसः इतिहिक्काधिकारः अथश्वासाधिकारः तत्रनिदानमाह यैरेव
कारणैर्हिक्कादेहिनांसंप्रवर्त्तते तैरेववक्ष्यमिःश्वासोव्याधिर्घोरःप्रजायते श्वासस्यभेदानाह म
होर्ध्वछिन्नतमकक्षुद्रभेदैस्तुपञ्चधा भिद्यतेसमहाव्याधिःश्वासएकोविशेषतः पूर्वरूपमा
ह प्राग्रूपंतस्यहृत्पीडाशूलमाध्मानएवच आनाहोवक्त्रवैरस्यंशङ्खनिस्तोदएवच संप्राप्ति
माह यदास्रोतांसिसंरुध्यमारुतःकफपूर्वकः विष्वग्व्रजतिसंरुद्धस्तदाश्वासान्करोतिसः
स्रोतांसिप्राणोदकान्नवहानिकफपूर्वकः कफःपूर्वःप्रधानंयस्यसः विष्वग्व्रजतिसर्वतो
विमार्गान्याति संरुद्धःकफेनरुद्धमार्गः महाश्वासस्यलक्षणमाह उद्धूयमानवातोयःशब्द
वद्दुःखितोनरः उच्चैःश्वसितिसंरुद्धोमत्तर्षभइवानिशं प्रनष्टज्ञानविज्ञानस्तथाविभ्रान्तलोचन

श्वासस्यचिकित्सा श्वासहिक्कातुरंप्रायःस्निग्धैःस्वेदैरुपाचरेत् युक्तैर्लवणतैलाभ्यांतैरस्यग्रथि
तःकफः श्वासोविलयमायातिमारुतश्चोपशाम्यति स्निग्धंज्ञात्वाततश्चैनंभोजयेच्चरसौदनं
स्वरसंशृंगवेरस्यमाक्षिकेनसमन्वितं पाययेच्छ्वासकासघ्नंप्रतिश्यायकफापहं शृंगवेरमा
र्द्रकं प्रस्थंविभीतकानामस्थिविनासाधयेद्दशामूत्रे अयमवलेहोलीढोमधुसहितःश्वासका
सघ्नः दशमूलीशटीरास्नापिप्पलीविश्वपौष्करैः शृंगीतामलकीभार्ङ्गीगुडूचीनागराग्निभिः
यवागूंविधिनासिद्धांकषायंवापिबेन्नरः श्वासहृद्ग्रहपार्श्वार्त्तिहिक्काःकासप्रशांतये तामल
कीभूम्यामलकी दशमूलस्यवाक्वाथःपौष्करेणवचूर्णितः श्वासकासप्रशमनःपार्श्वशूल
विनाशनः रंभाकुंदशिरीषाणांकुसुमंपिप्पलीयुतं पिष्ट्वातंडुलतोयेनपीत्वाश्वासमपोहति
शृंगीमहौषधकणाघनपुष्कराणांचूर्णं शटीमरिचपोष्ठसिताविमिश्रं क्वाथेनपीतममृताव
षपंचमूल्याःश्वासंग्रहेणविनिहन्तिहिघोररूपं पंचमूलीतुसामान्यापित्तेदेयाकनीयसी १५६

महतीमारुतेयोज्यासैवदेयाकफेऽधिके कूष्मांडकशिफाचूर्णंपीतंकोष्णेनवारिणा शीघ्रंशमय
तिश्वासंकासंवापिसुदारुणं हरीतकीशतंयुज्यादशवानामाढकंतथा पलानिदशमूलस्यविंश
तिश्चनियोजयेत् चित्रकंपिप्पलीमूलमपामार्गंशटीतथा कपिकच्छूंशंखपुष्पीभार्ङ्गीवार
णपिप्पलीः बलापुष्करमूलंचपृथग्द्विपलमात्रया पचेत्पश्चाढकेनीरेयवैःस्विन्नैस्मृतंनये
त् तत्राभ्याशतंदद्यात्क्वाथेतस्मिन्विचक्षणः सर्पिस्तैलाष्टपलकंक्षिपेद्गुडतुलांतथा पक्वा
लेहत्वमानीयसिद्धंदत्वापृथक्पृथक् क्षौद्रंचपिप्पलीचूर्णंदद्यात्कुडवमात्रया हरीतकीद्व
यंखादेत्तेनलेहेननित्यशः क्षयंकासंज्वरंश्वासंहिक्काशोरितिपीनसान् ग्रहणींनाशयत्येषव
लीपलितनाशनः बलवर्णकरःपुंसामवलेहोरसायनः विहितोगस्तिमुनिनासर्वरोगप्रणा
शनः अगस्तिहरीतक्यवलेहः हरिद्रांमरिचंद्राक्षांकणांरास्नांशटींगुडं कटुतैलंलिहन्हन्या
च्छ्वासान्प्राणहरानपि शतंसंगृह्यभार्ङ्ग्यास्तुदशमूल्यास्तथाशतं शतंहरीतकीनांचपचेत्तो

भा॰प्र॰ द्रवेचतुर्गुणे पादावशेषेतस्मिंस्तुरसेवस्त्रनिपीडिते आलोड्यचतुलांपूतांगुडस्यत्वनयात्रातं
१५७ पुनःपचेन्मृद्वग्नौयावल्लेहत्वमेतितत् शीतेचमधुनस्तत्रषट्पलानिविनिक्षिपेत् त्रिकटुःत्रिसु
गंधंचपलमात्रंपृथक्पृथक् यवक्षारंकर्षयुग्मंसंचूर्ण्यप्रक्षिपेत्ततः भक्षयेदनयामेकांलेह
स्यार्द्धपलंतथा श्वासंसुदारुणंहंतिकासंपञ्चविधंतथा अर्शांसिपीनसंचैवगुल्मंशाकंप्रमेहंक्षयं
तथा स्वरवर्णप्रदोह्येषजठराग्नेश्चदीपनः नाम्नाभार्गीगुडःख्यातोभिषग्भिःसकलैर्मतः
भार्गीगुडः रसोगंधोविषंचापिटंकणंचमनःशिला एतानिकर्षमात्राणिमरिचंचाष्टकर्षकं
कटुत्रयंकर्षयुग्मंपृथगत्रविनिक्षिपेत् रसःश्वासकुठारोयंसर्वश्वासनिवारणः श्वासकुठा
रोरसः रसभागोभवेदेकोगन्धकोद्विगुणोमतः त्रिभागापिप्पलीग्राह्याचतुर्भागहरीतकी वि
भीतकस्यपञ्चस्युर्वासाषड्गुणितामता भार्गीसप्तगुणाग्राह्यासर्वंचूर्णंप्रकल्पयेत् बब्बूलक्वा
थमादायभावयेदेकविंशतिं विभीतकप्रमाणेनमधुनावटिकांकिरेत् एकैकांभक्षयेत्प्रातः १५७

वातकफात्मकश्वासेतिबोद्धव्यं उच्छ्रिताक्षःऊर्ध्वाक्षः ललाटेनस्विद्यताउपलक्षितः अवधम्यतेगजात्म
ऊर्ध्वश्वासेवसर्वगात्रंचाल्यते तमकस्यैवपित्तानुबंधजनितज्वरादियोगेन प्रतमकसंज्ञामाह ज्वरमूर्च्छा
परीतंतंविद्यात्प्रतमकंभिषक् तमकस्यैवसनिदानंलक्षणान्तरमाह उदावर्त्तरजोजीर्णक्लिन्न
कायनिरोधजः तमसावर्द्धतेत्यर्थंशीतैश्चाशुप्रशाम्यति मज्जतस्तमसीवास्यविद्यात्प्रतमकंतु
तम् क्षुद्रश्वासमाह रूक्षायासोद्भवःकोष्ठेक्षुद्रोवातउदीरयन् क्षुद्रःश्वासोनसोत्यर्थंदुःखेनांग
प्रबाधकः हिनस्तिनचगात्राणिनचदुःखोपथेतरे नचभोजनपानानांनिरुणद्धिचितांगतिं नेंद्रि
याणांव्यथांचापिकांचिदुत्पादयेद्रुजं ससाध्यउक्तोयलिनः सर्वेचाव्यक्तलक्षणाः क्षुद्रःअल्प
निदानलिंगः उदीरयन् ऊर्ध्वंगच्छन् दुःखंदुःखप्रदःसर्वेमहाश्वासादयोपि श्वासानांसा
ध्यत्वादिकमाह क्षुद्रःसाध्यतमस्तेषांतमकःकृच्छ्रउच्यते त्रयःश्वासानसिध्यंतितमकोदुर्ब
लस्यच कामंप्राणहरारोगाबहवोनतुतेतथा यथाश्वासश्चहिक्काचहरतःप्राणमाशुवे अथ

भा॰प्र॰ सन्निपातेनाह सर्वात्मके भवति सर्वविकारसंपत्तं चाप्यसाध्यमृषयः स्वरभेदमाहुः क्षयजमा
१४८ ह धूम्येत वाक्क्षयकृते क्षयमाप्नुयाच्च स्यादेष एव हतवाक्परिवर्जनीयः वाक् धूम्येत स
धूमेव निःसरति क्षयं चाप्नुयात् वागेव मेदोभवमाह अंतर्गलं स्वरमलक्ष्यपदं चिरेण मे(
दोन्वयाद्वदति दिग्धगलस्तृषार्त्तः अंतर्गलं गलमध्य एव स्वरं वदति दिग्धगलः मेदसा श्ले
ष्मणा वा लिप्तगलः तृषार्त्तः मेदसो मार्गविरोधात् असाध्यमाह क्षीणस्य वृद्धस्य कृ(
शस्य वापि चिरोत्थितो यश्च सहोपजातः स्मेदस्विनः सर्वसमुद्भवश्च स्वरामयो यो न स सिद्धि
मेति क्षीणस्य क्षयरोगिणः कृशस्य अपुष्टस्य अथ स्वरभेदस्य चिकित्सा वातादिजनितस्वा
सकासघ्ना ये प्रकीर्त्तिताः योगांस्तान्संप्रयुंजीत यथादोषं चिकित्सकः वाते सलवणं तैलं पित्ते
सर्पिः समाक्षिकं कफे सक्षारकटुकं क्षौद्रं कवलइष्यते गले ताल्वनि जिकायां दंतमूलेषु
वाश्रितः तेन निष्कृष्यते श्लेष्मा स्वरश्चाशु प्रसीदति आर्द्रकोष्णं जलं पेयं भुक्त्वा घृतगुडोद १४८

नं क्षीरानुपानं पित्तोत्थे पिबेत्सर्पिरतन्द्रितः पिप्पली पिप्पलीमूलं मरिचं विश्वभेषजं पिबेन्मूत्रे
ण मतिमान् कफजे स्वरसंक्षये व्याघ्रीस्वरसविपक्वं रास्नावाट्यालगोक्षुरव्योषैः सर्पिः स्वरोपघातं
निहन्ति कासं नु पञ्चविधं शुष्कद्रव्यमुपादाय स्वरसानामसम्भवे वारिण्यष्टगुणे साध्यं ग्राह्यं पा
दावशेषितं स्वरसालाभे चूर्णस्याढकमाढकमुदकस्य च ग्राह्यं न वारि पर्युषितमर्दितं स्वरसस्था
ने प्रयोक्तव्यं कल्याणकारी घृतं चव्याम्लवेतसकटुत्रिकतिन्तिडीकतालीसजीरकतुगादहनैः
समांशैः चूर्णं गुडप्रमर्दितं त्रिसुगंधियुक्तं वैस्वर्यपीनसकफारुचिषु प्रशस्तम् चव्यादिचू(
र्णं निदिग्धिकावलायास्तुलास्यात दर्द्धं ग्रंथिकस्य च तदर्द्धं चित्रकस्यापि दशमूलं च तत्समं जल
द्रोणद्वये क्वाथ्यं गृह्णीयादष्टकं ततः पूते क्षिपेत्तदर्द्धं तु पुराणस्य गुडस्य च सर्वमेकत्र कृ
त्वावलेहवत्साधु साधयेत् अष्टौ पलानि पिप्पल्यास्त्रिजातकपलं तथा मरिचस्य पलं चैकं
सर्वमेकत्र चूर्णितं मधुनः कुडवं दत्वा तदश्नीयाद्यथानलं निदिग्धिकावलेहोयं निषेवि

भा·प्र· मुनिनिर्मितः स्वरभेदहरो मुख्यः प्रतिश्यायहरस्तथा कासश्वासाग्निमांद्यादिगुल्ममेहगलग्रहान्
१४७ अनाहमूत्रकृच्छ्राणि हन्यात् कुष्ठार्बुदानि च निदिग्धिकावलेहः ब्राह्मीवचाभयावासापिप्पली
मधुसंयुता यस्य प्रयोगात् सप्ताहात् किन्नरैः सह गायति बदरीपत्रकल्कं वा घृतभृष्टं ससैन्धवं
स्वरोपघाते कासे च लेहमेनं प्रयोजयेत् चक्रदत्तात् बिभीतकफलं शुण्ठी सैन्धवं त्वक् समंस
मं गोमूत्रेण पिबेत् कर्षं किन्नरैः सह गायति जातीपत्रकणालाजामातुलुङ्गफलम्मधु पलं लेहं
भवेन्नादः किन्नराधिकः एव च देवदारुकणाव्योषशताह्वासैन्धवं निशा वचासैन्धवसिन्धू
त्थमूलं पेष्यं समं समं कर्षैकं मधुसर्पिर्भ्यां मासस्य विदशालिहेत् कण्ठशुद्धिर्भवेत्तस्य किं
न्नरैः सह गायति इति स्वरभेदाधिकारः अथारोचकाधिकारः तत्र सनिदानमरोचकमा
ह वातादिभिः शोकभयातिलोभक्रोधैर्मनोघ्नाशनरूपगन्धैः अरोचकाः स्युः परिहृष्टद
कषायवक्त्रश्च मतोऽनिलेन अरोचकाः अन्नभोजने रुचिमुत्पादयन्तीति अरोचकाः व्याधयः १४७

श्वासकासनिवृत्तये रसेन्द्रवटिका रसरत्नसमुच्चये इति श्वासाधिकारः अथ स्वरभेदाधिका
रः तत्र स्वरभेदस्य निदानसंप्राप्तिपूर्वकं लक्षणमाह अत्युच्चभाषणविषाध्ययनाभिघातसं
दूषणैः प्रकुपिताः पवनादयस्तु स्रोतःसु ते स्वरवहेषु गताः प्रतिष्ठां हन्युः स्वरं भवति चापि हि
षड्विधः सः अध्ययनम् उच्चैर्वेदादिपाठः अभिघातः कण्ठादिदेशे लगुडादिभिः एतैरत्युच्चभा
षणादिभिश्चतुर्भिः संदूषणैरन्यैरपि निजैः उपरिहेतुभिः स्रोतस्सु सुश्रुतोक्तेषु चतुर्षु प्रतिष्ठां
स्थितिं हन्युः स्वरमिति लक्षणं स स्वरभेदः षड्विधः वातपित्तकफसन्निपातक्षयमेदोभवभे
दैः तत्र वातिकस्वरभेदस्य लक्षणमाह वातेन कृष्णनयनाननमूत्रवर्चा भिन्नं शनैर्वदति
गर्दभवत् खरं च पित्तेनाह पित्तेन पीतनयनाननमूत्रवर्चा ब्रूयाद्गलेन स च दाहसमन्वितेन
गलदाहोऽत्र वचनसमय एव बोद्धव्यः कफेनाह ब्रूयात् कफेन सततं कफरुद्धकण्ठः स्व
ल्पं शनैर्वदति चापि दिवा विशेषात् दिवा विशेषात् दिवा सूर्यरश्मिभिः कफस्य स्वल्पीभावात्

पंचवातजादिभेदैः वातिकस्यलक्षणमाह परिहृष्टदंतःअम्लभक्षणेनेवपरिहर्षादव्याप्त्र
सः तथाचकषायवक्त्रः कषायरसंवक्त्रंयस्यसः पैत्तिकमाह कट्वम्लमुष्णंविरसंचपूतिपि
त्तेनविद्यात्तथावर्णंचवक्त्रं कट्वम्लमित्यादिनाविद्यादित्यंतेनपैत्तिकस्यलक्षणं श्लैष्मिक
माह लवणंचवक्त्रंतथा माधुर्यपैच्छिल्यगुरुत्वशैत्यस्निग्धत्वदौर्गंध्ययुतंकफेन पैच्छि
ल्यंमुखस्याभ्यंतरेस्निग्धत्वंबहिः आगंतुजमाह अरोचकेशोकभयातिलोभक्रोधाद्यहृ
द्याशुचिगंधजेस्यात् स्वाभाविकंचास्यमथारुचिश्चत्रिदोषजेनैकरसंभवेच्च क्रोधादित्या
दिशब्देनारुद्ध्ययोरशनरूपयोर्ग्रहणंस्वाभाविकं अविकृतरसं त्रिदोषजमाह नैकर
सं अनेकरससमास्यंस्यात् वातजादिभेदेनमुखेविकृतिमभिधायान्यदेशेविकृतिमाह
हृच्छूलपीडनयुतंपवनेन पित्तात्तृड्दाहचोषबहुलंसकफप्रसेकं श्लेष्मात्मकंवपुरु
जंबहुभिश्चविद्याद्वैगुण्यमोहजडताभिरथापरंच हृच्छूलपीडनयुतं हृदिशूलेनपीडनं

भा·प्र तेनयुतं चोषः पार्श्वस्थितान्निनेवसंतापः वक्त्रतिक्ततिर्दोषैः वक्त्ररुजं उरुवातादिरोगयुक्तं वैगुण्यं
१५० मनसोव्याकुलत्वं जडता शून्यहृदयता अपस्वरूपं अरोगं युक्तं भक्तद्वेषाभक्तछंदौचरकसुश्रुताभ्यां।
मरोचकत्वेनैवसंगृहीतौ कृत्स्नभोजस्त्वेषांलक्षणानिपृथगाह चिंतयित्वातुमनसादृष्ट्वास्पृष्ट्वा
तुभोजनं द्वेषमायातियोजन्तुर्भक्तद्वेषःसउच्यते कुपितस्यभयार्त्तस्यतथाभक्तनिरोधतः यत्र
नान्नेनयेच्छासभक्तछन्दउच्यते अथारोचकस्यचिकित्सा भोजनाग्रेसदापथ्यंलवणार्द्रक
भक्षणं रोचनंदीपनंवह्नेर्जिह्वाकंठविशोधनं लवणमत्रसैंधवंशृंगवेररसंचापिमधुनास
हयोजयेत अरुचिःश्वासकासघ्नंप्रतिश्यायकफापहं पक्वाम्लिकासिताशीतवारिणा।
वस्त्रगालिता एलालवंगकर्प्पूरमरिचैरवधूलिता पानकस्यास्यगंडूषंधारयित्वामुखे।
मुहुः अरुचिंनाशयत्येवपित्तंप्रशमयेत्तथा अम्लिकापानकं सूक्ष्मैलाकेशरस्त्वैवत्व.
क्पत्रंतालिसकंतुगा पृथ्वीकादाडिमंधान्यंजीरकंचार्द्धकार्षिकं पिप्पलीपिप्पलीमूलंच १५०

चित्रकनागरं मरिचंदीप्यकंचैववृक्षाम्लंचाम्लवेतसं अजमोदाश्वगन्धाचदधित्थंचेतिकार्षिकं
प्रदेयमिहशुद्धायाःशर्करायाश्चतुःपलं चूर्णमग्निप्रसादाख्यंपरमंरुचिवर्द्धनं प्लीहानंकासम
र्शांसिश्वासंशूलंवमिंज्वरं निहंतिदीपयत्यग्निंबलवर्णप्रसादनम् वातानुलोमनंहृद्यंकण्ठ
जिह्वाविशोधनं अगस्त्योदितमग्निप्रसादाख्यंचूर्णम् राजिकाजीरकौभृष्टौसृष्टंहिंगुचनागरं
सैन्धवंदधिगोःसर्व्ववस्त्रपूतंप्रकल्पयेत् तावन्मात्रंक्षिपेत्तत्रयथास्यात्कटुचिरुत्तमा तक्रमेतज्जवे
त्सद्योरोचनंवह्निवर्द्धनं तक्रंचुगाथ्यं सम्यगावर्त्तितंगंधनिवर्द्धदधिमाहिषं एकीकृत्यपटेघृष्टंचतु
श्शर्करयासमं एलालवंगकर्प्पूरमरिचैश्चसमन्वितं नाम्नाशिखरिणीकुर्य्यात्कटुचिसकलवल्ल
भा शिखरिणी द्वेपलेदाडिमाद्द्वेसितखंडेव्योषंपलत्रयं त्रिसुगंधिपलंचैकंचूर्णमेकत्रकारयेत्
त्चूर्णंमात्रयाभुक्तमरोचकहरंपरं दीपनंपाचनंचस्यात्पीनसंज्वरकासजित् दाडिमादिचूर्णं
लवङ्गंकंकोलमुशीरचंदनंनतंसनीलोत्पलकृष्णजीरकं जलंसकृष्णागुरुभृंगकेशरंकणास

भा॰प्र॰ क्षिप्रानलदं सहेलया तुषारजातीफललवंगरोचनासिताईभागासकलं विचूर्णितं सुरोचनं तर्प्प
१५१ णमग्निदीपनं बलप्रदं हृष्यतमं त्रिदोषजित् उरोविबंधं तमकं गलग्रहं सकासहिक्कारुचियक्ष्म
पीनसं ग्रहण्यतीसारमुरःक्षतं वर्षां तथाप्रमेहान्निखिलान्निहंति कंकोलं फलं सुगंधविशेषः
नतं तगरं जलं वालकं भृंगं त्वग् नलदमुशीरं तुषारः कर्प्पूरः लवंगादिचूर्णं इत्यरोचका
धिकारः अथच्छर्द्यधिकारः तत्र छर्द्देर्विप्रकृष्टसंनिकृष्टनिदानपूर्विकां संप्राप्तिमाह
अतिद्रवैरतिस्निग्धैरहृद्यैर्लवणैरपि अकाले चातिमात्रैश्च तथासात्म्यैश्च भोजनैः आमा
द्भयात्तथोद्वेगादजीर्णात्क्रिमिदोषतः नार्य्याश्चापन्नसत्वायास्तथातिद्रुतमश्नतः आमा
त् असम्यक्पक्वकाद्रसात् अजीर्णात् यथास्थितान्नुक्तात् आपन्नसत्वायाः प्राप्तगर्भायाः
दुष्टैर्दोषैः पृथक्सर्वैर्बीभत्सालोकनादिभिः बीभत्सैर्हेतुभिश्चान्यैर्भुक्तमुत्क्लेश्यपतेद्बलात्
अन्यैर्बीभत्सैर्विकृतैर्हेतुभिः घृणाकारिभिः अनिष्टश्रवणस्पर्शनदर्शनभक्षणघ्राणैः ३ १५१

त्क्लेन्नुपते ऊर्ध्वंनीत्वामुखाद्बहिः क्रियते पूर्वरूपमाह हृल्लासोद्गाररोधौचप्रसेकोलवणस्तथा
द्वेषोन्नपानेचभृशंवमीनांपूर्वलक्षणं छर्देः सामान्यंलक्षणमाह छादयन्नाननंवेगैरर्दयन्नंगभ
ञ्जनैः निरुच्यतेछर्दिरिति दोषोवक्त्रंप्रधावितः छादयन् पूरयन् अंगभंजनैः अंगभेदैः
अर्दयन् अंगानिपीडयन् वक्त्रंप्रधावितः वक्त्रंप्रतिधावितः दोषः छर्दिरिति निरुच्यते वा
तजायालक्षणमाह हृत्पार्श्वपीडामुखशोषशीर्षनाभ्यर्त्तिकासस्वरभेदतोदैः उद्गारशब्द
प्रबलंसफेनंविच्छिन्नकृष्णंतनुकंकषायं कृच्छ्रेणचाल्पंमहताचवेगेनार्त्तोऽनिलाच्छर्द
यतीहदुःखं विच्छिन्नंविरलवेगं अल्पफेनं वा वातस्यद्रवत्वाभावात् तनुकं अघनं अल्पं।
स्तोकं महतावेगेनबहुवेगेन कषायं कषायरसे दुःखंदुःखमिव छर्दयतिइति पित्तजा
माह मूर्छापिपासामुखशोषमूर्द्धताल्वक्षिसंतापतमोभ्रमार्त्तः पीतंभृशोष्णंहरितंचति
क्तंधूम्रंचपित्तेनवमेत्सदाहं कफजामाह तन्द्रास्यमाधुर्य्यकफप्रसेकसन्तोषनिद्रारुचे

मा·प्र।
१५२

गौरवार्त्तः स्निग्धंघनंस्वादुकफाद्विशुद्धंसलोमहर्षोऽल्परुजंवमेत्तु सन्तोषः तृप्तिः त्रिदोषजामा
ह शूलाविपाकारुचिदाहतृष्णाश्वासप्रमोहप्रबलाप्रसक्ता छर्दिस्त्रिदोषाल्लवणाम्लनीलं
सान्द्रोष्णरक्तंवमतांनृणांस्यात् आगंतुजामाह असात्म्यजा च कृमिजामजाच्चबीभत्सजादौ(
हृदजाचयाहि सापंचमीतांश्चविभावयेच्च दोषोच्छ्रयेणैवयथोक्तमादौ एताःपञ्चाप्यागंतुज
त्वेनासाम्यादेकैकः अतएवसाआगन्तुजापंचमीतांचविभावयेत् अनुबंधयेत् उपद्रवा(
नाह कासश्वासोज्वरस्तृष्णाहिक्कावैचित्यमेवच हृद्रोगस्तमकश्चैवज्ञेयाश्छर्देरुपद्रवाः
वैचित्यंविकृतचित्तत्वं तमकोऽत्रतमकः श्वासपदेनैवतमकाख्यस्यापिश्वासस्योक्तेः असा
ध्यंसाध्यंचाह क्षीणस्ययाछर्दिरतिप्रसक्तासोपद्रवाशोणितपूययुक्ता सचंद्रिकांतांप्रवदे
दसाध्यांसाध्यांचिकित्सेन्निरुपद्रवांच सचंद्रिकामयूरपिच्छचन्द्रिकाप्रभायुक्ता अथछ(
र्देश्चिकित्सा आमाशयोत्क्लेशभवाहिसर्वाश्छर्द्योमतालंघनमेवतस्मात् विधीयतेमारु १५२

तज्ञांविनातुसंशोधनंवाकफपित्तहारि अत्रछर्दिशान्तःप्रयुक्तस्यतुराजीधूलीप्रभृतिशाह्वत्सा
धुः हन्यात्तह्रीरोदकंपीतंछर्दिम्पवनसंभवा मुद्गामलकयूषोवासमर्पिकससैंधवः ह्रीरोदकं ।
नाशितस्यक्षीरस्योदकं गुडूचीत्रिफलानिंबपटोलैःक्वथितंजलं पिबेन्मधुयुतंतेनछर्दिर्नश्यति
पित्तजा हरीतकीनांचूर्णंवुलिह्यान्माक्षिकसंयुतं अधोमार्गीकृतेदोषेछर्दिःशीघ्रंनिवर्त्तते ।
विडंगत्रिफलाविश्वाचूर्णंमधुयुतंजयेत् विडंगप्लवशुंठीनांचूर्णंवाकफजांवमिं लवंकेवर्त्तिमु
स्तगुडतजीशतिलोके पिप्पलीसमीफलंलाजानशर्करांचपलोन्मितान् दत्वामधुपलंचापिकु
डवंसलिलस्यच वाससागालितंपीतंहंतिछर्दिंत्रिदोषजांगुडूच्याःक्वथितंहन्त्रिहिमंमधुसमन्वितं
दुर्निवारामपिछर्दिंत्रिदोषजनितांबलात् एलालवंगगजकेशरकोलमज्जलाजप्रियंगुघनचंदनापि
प्पलीनां चूर्णानिमाक्षिकसितासहितानिलीढ्वाछर्दिंनिहंतिकफमारुतपित्तजातां एलादिचूर्णं
अश्वत्थवल्कलंशुष्कंदग्धंनिर्वापितंजले तज्जलंपानमात्रेणछर्दिर्जयतिदुर्जयां पथ्यात्रिकटुधा

भा॰प्र॰ न्याकजीरकाणांरजोलिहन् मधुनावारयेच्छर्द्दिमरुचिंचत्रिदोषजां बिल्वत्वचोगुडूच्यावाक्का-
१५४ थःक्षौद्रेणसंयुतः छर्द्दिंत्रिदोषजांहंतिपर्प्पटःपित्तजांतथा आम्रास्थिबिल्वनिर्यूहःपीतःसम
धुशर्करः निहन्याच्छर्द्यतीसारौवैश्वानरइवाहुतिं निर्यूहःक्वाथः जंब्वाम्रपल्लवशृतंलाजर
जःसंयुतंशीतं शमयतिमधुनायुक्तंवमिमतिसारंतृषाग्निमुग्रां बीभत्सजांहृद्यतमैरिष्टैर्दौ
हृदजांफलैःलंघनेरामजांछर्द्दिंजयेत्सात्म्यैरसात्म्यजां कृमिहृद्रोगवद्धन्यात्कृमिजांकृमिसमुद्भ
वां तत्रतत्रयथादोषंक्रियांकुर्य्याच्चिकित्सकः इतिछर्द्यधिकारः अथतृष्णाधिकारः
तत्रतृष्णायानिदानपूर्विकांसंप्राप्तिमाह भयश्रमाभ्यांबलसंक्षयाद्वाऊर्द्ध्वंचितंपित्तविवर्द्ध
नैश्च पित्तंसवातंकुपितंनराणांतालुप्रपन्नंजनयेत्पिपासां स्रोतःस्वपांवाहिषुदूषितेषुदोषै
श्चतृट्संभवतीहजंतोः तिस्रस्स्मृतास्ताःक्षतजाचतुर्थीक्षयात्तथान्यामसमुद्भवाच भुक्तो
द्भवासप्तमिकेतितासांनिबोधलिंगान्यनुपूर्वशस्तु नराणांचितं स्वस्थानएवसंचितंपित्तंस १५४

वातंपित्तविवर्द्धनैः कटूम्लोष्णादिभिःकुपितं भयश्रमाभ्यांबलसंक्षयादुपवासादेश्चवातःकुपि
तः तद्द्वयंऊर्द्ध्वप्रसरन् पिपासांजनयेत् नकेवलंतालुन्येवदूषितेतृषाभवति किंतुजलवाहि
स्रोतःस्वपि यतश्चाह स्रोतःस्वित्यादिना नन्वत्रवक्तव्यवचनंनयुक्तं अतोजलवहेद्वेस्रोतसी
सुश्रुतेनोक्तेउच्यते तयोरेवानेकप्रतानयोगात्मदोषः अंबुवाहिषुस्रोतःस्विति जिह्वादे
ष्वुपलक्षणं यतश्चाहचरकः रसवाहिनीश्चधमनीर्जिह्वाहृदयगलतालु क्लोमचसंशोष्यतृ
ष्णांदेहेकुरुतस्ताभ्यामतिबलौपित्तानिलाविव संख्यामाह तिस्रइत्यादि तृष्णायाःसामान्यं
लक्षणमाह सततंयःपिबेत्तोयंनतृप्तिमधिगच्छति मुहुःकांक्षतितोयंचतंतृष्णार्त्तमादि
शेत् वातजायाःलक्षणमाह क्षामास्यतामारुतसंभवायांतोदस्तथाशंखशिरःसुचापि स्रो
तोनिरोधोविरसंचवक्त्रं शीताभिरद्भिश्चविवृद्धिमेति शंखशिरःसुच शंखयोःशिरसिच
स्रोतोनिरोधःरसांबुवाहिनीधमनीनिरोधः पित्तजामाह मूर्च्छान्नविद्वेषविलापदाहरक्ते

क्षणत्वंप्रततश्चशोषं शीताभिनंदामुखतिक्तताचपित्तात्मिकायांपरिधूपनंच विलापःप्रलापः
प्रततश्चशोषः अविरतश्चशोषः शीताभिनंदाशीतेच्छा परिधूपनं कंठात्धूमनिर्गमइव
कफजामाह वाष्पावरोधात्कफसंवृतेग्नौ तृष्णा बलासेनभवेन्नरस्य निद्रागुरुत्वंमधुरास्य
ताचतयार्दितःशुष्यतिचातिमात्रं अग्नौजठराग्नौ कफसंवृतेस्वकारणकुपितेनकफेनो।
परिच्छादिते वाष्पावरोधात् अग्नेरूष्मावरोधात् अवरुद्धानलोष्मणांबुवहस्रोतःशो
षणात् बलासेनकफेननरस्यतृड्भवेत् तयातृष्णयाच अर्दितःपीडितःशुष्यतिकृशोभव
ति क्षतजामाह क्षतस्यरुक्शोणितनिर्गमाभ्यांतृष्णाचतुर्थीक्षतजामतातु क्षतस्यशस्त्रा।
दिक्षतयुक्तस्यरुक्पीडा क्षयजामाह रसक्षयाद्याक्षयसंभवासातयाभिभूतस्तुनिशादि
नेषु पेपीयतेम्भःससुखंनयातितांसन्निपातादितिकेचिदाहुः रसक्षयोक्तानिचलक्षणानित
स्यामशेषेणत्रिदोषजन्यवस्येत् रसक्षयेलक्षणानिसुश्रुतेनोक्तानि रसक्षयेहृत्पीडाकंपशो

षः शूलस्पतातृष्णाचेति व्यवस्येत्तजानीयात आमजामाह त्रिदोषलिंगामसमुत्थयाच हृच्छूलनि
ष्ठीवनसादकर्त्री भुक्तोद्भवामाह स्निग्धंतथाम्लंलवणंचभुक्तंगुर्वन्नमेवाशुतृषांकरोति लवणं
चेतिचकारात्कटुच उपसर्गजामप्याह क्षीणस्वरःप्रताम्यन्दीनाननःसंशुष्कहृदयगलता
लुः भवतिसखलुसोपसर्गात्तृष्णासाशोषिणीकष्टा शोषिणीधातुशोषिणी उपसर्गानाहज्व
रोमोहःक्षयःश्वासोवाधिर्य्यकासमेवच वहिर्निर्गतजिह्वात्वंसप्तैतेतदुपद्रवाः तद्युक्तायाश्चा
रिष्टत्वंचाह ज्वरमोहक्षयकासश्वासाद्युपसृष्टदेहानां सर्वास्त्वतिप्रसक्तारोगकृशाणांवमिप्र
सक्तानां घोरोपद्रवयुक्तातृष्णामारणायविज्ञेया आदिशब्दादतीसारादीनांग्रहणं अतिप्रस
क्ताःनिरंतराघोरोपद्रवयुक्ताःअतीवमुखशोषादियुक्ताः अथतृष्णायाश्चिकित्सा वातघ्न
मन्नपानंमृदुलघुशीतंचवाततृष्णायां तृष्णायांपवनोत्थायांसगुडंदधिशस्यते स्वादुतिक्तंद्र
वंशीतंपित्तं तृष्णापहंपरं मुस्तापर्प्पटकोदीच्यधन्वयासोशीरचंदनैःशृतंशीतंजलंदद्यात्

भा·प्र·

१५५

तृड्दाहज्वरशांतये छत्राधान्याकं कश्चिद्धात्रीचदद्यात् चंदनमत्रधवलंतस्यातिवाहरत्वात्
शृतम् अर्द्धपक्वमत्रकर्त्तव्यंषडङ्गपानीयं लाजोदकंमधुयुतंशीतंगुडविमर्द्दितं काश्मरीशर्क
रायुक्तंपिबेत्तृष्णार्द्दितोनरः आस्तरणमार्द्रवासःप्रावरणंचार्द्रमेवस्यात् तेनपिपासाशाम्यतिदा
हश्चसोपोपिदेहिनांनियतं तेनोल्मकालेजलार्द्रधारणमपथ्यमेवेत्युक्तंभवति गोस्तनीक्षुरसः।
क्षीरयष्टीमधुमधूत्पलैः नियतंनासिकापीतैःतृष्णाशाम्यतिदारुणा वैशद्यंजनयत्यास्येसंदधा
तिमुखेजलं तृष्णादाहप्रशमनंमधुगण्डुषधारणं जिह्वातालुगलक्लोमशोषेमूर्द्धनिदापयेत्
केशरंमातुलुंगस्यघृतसैंधवसंयुतं दाडिमंवदरंलोध्रंकपित्थंवीजपूरकं पिष्ट्वामूर्द्धनिलेपस्तु
पिपासादाहनाशनः अरुणचंदनंचंदनवालकंनलदपद्मकतुल्यकृतांशकं शिरसिलेप
नमादधतांनृणांतृडुपयातुपशाम्यमसंशयम् वारिशीतंमधुयुतमाकंठाद्वापिपासितं पाय
येद्वामयेद्वाथतेनतृष्णाप्रशाम्यति प्रातःसशर्करःपेयोहिमोधान्याकसंभवः अपेत्तृष्णांतया १५५

दाहंभवेत्ततोविशोधनं आमलकमलंकुर्यंलाजाश्चघटरोहकं एतच्चूर्णस्यमधुनागुटिकांधारयेन्मु
खे तृष्णांप्रवृद्धांहंत्येषांमुखशोषंचदारुणं कवाबचीनीबीजानिभक्षितानितथाकुर्वंति अनुभूतमि
दं ह्रतोऽन्नवांरुग्विनिवारणेनजयेत्ततानामसज्जश्चपातेः ह्रयोस्थितांद्दीरजलंनिहन्यान्मांसोदकं
वामधुकोदकंवा आमोऽन्नवांविल्वकचायुतानांजयेत्कषायैरथदीपनानां गुर्वन्नजामुल्लिख
नैर्जयेच्चह्रयंविनासर्वकृतांचतृष्णां अल्लिखनैःलेखनकृष्यैः स्निग्धेन्नेभुक्तेयातलास्यातांमुक्त
मुनाशमयेत् अतिरोगदुर्बलानांतृष्णांशमयेन्नृणामिहाम्बुपयः पयोन्नरूपं मूर्छाच्छर्दितृषा
नाहस्त्रीमद्यमन्नाकर्षिताः पिबेयुःशीतलंतोयंरक्तपित्तेमदात्यये सात्म्यान्नपानभैषज्यैस्तृष्णां
तस्यजयेत्पुनः तस्यांजितायामन्योपिव्याधिःशाक्यश्चिकित्सितुं तृष्णमन्यूर्वमियक्षीणेनलभे।
तज्जलंयदि मरणंदीर्घरोगंचप्राप्नुयात्स्वरित्नरः तृषितोमोहमायातिमोहात्प्राणान्विमुंचति
तस्मात्सर्वास्ववस्थासुनक्कचित्वारिवर्जयेत् अन्नेनापिविनाजंतुःप्राणान्धारयतेचिरं तोयाभा

भा·प्र वाल्पिपासार्त्तः तृष्णात्मात्प्रणैर्विमुच्यते अत्ररसाला पिहिता इति तृष्णाधिकारः अथमूर्च्छाधिकारः
१५६ तत्रमूर्च्छायानिदानपूर्विकां संप्राप्तिमाह क्षीणस्यबहुदोषस्यविरुद्धाहारसेविनः वेगाघातादभि
घाताद्धीनसत्वस्यवापुनः करणायतनेषूग्रावाह्येष्वाभ्यंतरेषुच निविशंतेयदादोषास्तदामूर्च्छं
त्रिमानवाः बहुदोषस्य अधिकदोषस्यनत्वनेकदोषस्यतदामूर्च्छात्रिदोषजैवस्यात् तथैवा
स्तुकोदोषः अत्रएकदोषजानांमूर्च्छानांवक्ष्यमाणत्वात् वेगाघातात् मलादेः अभिघाता
त् लगुडादिनाहीनसत्वस्यस्वल्पसत्वगुणस्य अर्थादधिकतमोगुणस्ययतउक्तंमूर्च्छापित्ततमः
प्रायेति करणायतनेषु करणंमनस्तस्यायतनेषुस्थानेषु वाह्येषुकर्मेन्द्रियेषु आभ्यन्तरेषु
बुद्धीन्द्रियेषु पूर्वरूपमाह हृत्पीडाजृंभणंग्लानिस्संज्ञादौर्वल्यमेवच सर्वासांपूर्वरूपाणि
यथास्वंचविभावयेत् संज्ञादौर्वल्यमसम्यक्ज्ञानं सर्वासांपूर्वरूपाणीतिपादत्रयेणछेदः
तांचमूर्च्छांयथास्वंनभसवातादिभेदेनविभावयेत्जानीयादित्यर्थः व्यक्तरूपावस्थायान्तु १५६

पूर्वरूपावस्थायां सामान्यंलक्षणमाह संज्ञावहासुनाडीषुपिहितास्वनिलादिभिः तमोभ्युपैतिस
हसासुखदुःखव्यपोहकृत् सुखदुःखव्यपोहाच्चनरःपततिकाष्ठवत् मोहोमूर्च्छेतितंप्राहुःषड्वि
धासाप्रकीर्तिता तमोगुणः अज्ञानहेतुः अभ्युपैतिआगच्छति दुःखासुखव्यपोहकृत् सुखदुः
खज्ञाननाशकरं नष्टसुखदुःखज्ञानेनरः काष्ठवत्पतति तेनयोमोहोमूर्च्छेतितंप्राहुरित्यन्व
यः मूर्च्छायामूर्च्छायोपिपर्य्यायः तदुक्तं संज्ञोपघातोमूर्च्छायोमूर्च्छास्यान्मूर्च्छनंतथा कश्मल
लंप्रलयोमोहःसंन्यासस्तुमृतोपमइतिषडपिमूर्च्छाविहरणेति वातादिभिःशोणितेनमद्येनच
विषेणच षड्भ्यप्येतासुपित्तंतुप्रमुखत्वेनावतिष्ठते यतउक्तं मूर्च्छापित्ततमःप्रायेति तत्रवातिकं
मूर्च्छायमाह नीलंवायदिवाकृष्णमाकाशमथवारुणं पश्यंस्तमःप्रविशतिशीघ्रंचप्रातीबु
ध्यते वेपथुश्चाङ्गमर्दश्चप्रपीडाहृदयस्यच कार्श्यंश्यावारुणच्छायामूर्च्छायेवातसंभवे नील
वर्णंकृष्णंकज्जलाभं अरुणंआश्चकरागं तमःप्रविशतिमूर्छति श्यावारुणच्छायागात्रस्ययेति

भा॰प्र॰ कमाह रक्तं हरितवर्णं वा वियत्पीतमथापि वा पश्यंस्तमः प्रविशति सस्वेदः प्रतिबुध्यते सपिपा
१५७ सः ससंतापो रक्तपीताकुलेक्षणः संभिन्नवर्चाः पीताभो मूर्च्छाये पित्तसंभवे श्लैष्मिकमाह मेघ
संकाशमाकाशं तमोभिर्वा घनैर्वृतं पश्यंस्तमः प्रविशति चिराच्च प्रतिबुध्यते गुरुभिः प्रावृतैरंगैर्य
थैवार्द्रेण चर्म्मणा सप्रसेकः सहृल्लासो मूर्च्छाये कफसंभवे मेघसंकाशं शुभ्रमेघसंकाशमित्य
र्थः यतआह सुश्रुतः कफेन पश्येद्रूपाणि श्वेतान्यप्रतिमानि तु घनैः निविडैस्तमोभिः गुरुभिरं
गैरुपलक्षितः मूर्च्छायः षड्विधश्चोक्तः सुश्रुतेन चरकस्तु सान्निपातिकमपि मूर्च्छायमाह सर्वाकृ
तिः सन्निपातादपस्मार इवागतः सजंतुं पातयत्याशु विना बीभत्सचेष्टितैः अपस्मार इव तेन मह
ताभिघातेन पतति चिरेण प्रतिबुध्यते तर्हि तयोः को भेद इत्यत आह सान्निपातिको मूर्च्छायः वि
ना बीभत्सचेष्टितैः फेनवमनदंतघटनाक्षिविकृत्यादिभिर्विना पातयति रक्तजायां मूर्च्छायां नि
दानमाह पृथिव्यम्भस्तमोरूपं रक्तगंधस्तदन्वयः तस्माद्रक्तस्य गन्धेन मूर्च्छन्ति भुवि मानवाः १५७

तमोरूपंतमोवहुलंमानवाश्चपेतामस्याः नतुसात्विकाराजसाश्च अत्रैकेवदंतिनैषायुक्तिःसमीची
ना तर्हिचंपकादिगन्धेनापिमूर्छाप्रसज्येत् तत्रापिगंधस्यपार्थिवत्वात् एतदाह द्रव्यस्वभावइत्ये
केयद्दृष्ट्वापिविमुह्यति अत्राहभोजः दर्शनादसृजस्तज्ज्ञाद्गन्धाच्चैवप्रमुह्यति रक्तेनमूर्छितस्यल
क्षणमाह स्तब्धांगदृष्टिस्त्वसृजामूढोच्छासश्चमूर्छितः मद्यजविषजयोर्मूर्छयोर्निदानमाह गुण
स्तीव्रतरत्वेनस्थितास्तुविषमद्ययोः तएवतस्मात्ताभ्यांतुमोहोस्यात्तांपर्येरितो येगुणांलघुरू
क्षाशुविशदमव्यवायितीक्ष्णविकाषिसूक्ष्ममौल्यानिर्देश्यरसत्वादयः तेलादोजव्यैव्यस्ताः तीव्राश्च
सन्ति तएवगुणाः विषमद्ययोस्तुतीव्रतरत्वेनस्थिताः तत्रापिभेदः मद्येतीव्रतराः विषेतीव्रत
माः यतउक्तंतंत्रांतरे विषस्यापिगुणाःप्रोक्ताःसन्निपातप्रकोपणाः तएवमद्येहस्वंपतेविषे
वुवलवत्तराःइति मद्यजायाःमूर्छायाःलक्षणमाह मद्येनप्रलपन्शेतेनष्टविभ्रांतमानसः ।
गात्राणिविक्षिपन्भूमौजरांयावन्नयातितत् नष्टविभ्रांतमानसः नष्टसर्वथास्मृतिहीनंविभ्रां

मा·प्र· तंद्रज्ञोसर्पज्ञानयुक्तंमानसंयस्यसः जरांजीर्णतांतत्तमद्यं विषजायालक्षणमाह वेपथुःस्वप्नत
१५८ ष्णाःस्युः तमश्चविषमूर्छितेवेदितव्यंतीव्रतरंयथास्वंविषलक्षणं विषस्यमूलकंदफलपत्र
क्षीरादिभेदभिन्नस्ययथास्वंलक्षणमुक्तंसौश्रुतेकल्पस्थानेतल्लक्षणंमद्यापेक्षयातीव्रतरंवेदि
तव्यं ननुसंज्ञानाशोनसाधर्म्यात् मूर्छाभ्रमतंद्रादीनांकोभेदइत्यतआह मूर्छापित्ततमःप्रा
यारजःपित्तानिलाद्भ्रमः तमोवातकफात्तन्द्रानिद्राश्लेष्मतमोभवा रजःपित्तानिलाद्भ्रमइति
नात्रसमुच्चयः केवलपित्तज्वरेभ्रमस्योक्तत्वात् भ्रमश्चक्रारूढस्येव भ्रमद्वस्तुज्ञानं स्वदेह
स्यभ्रमतःइवज्ञानंच तन्द्रायालक्षणमाह इन्द्रियार्थेष्वसंवित्तिर्गौरवंजृम्भणंक्लमः निद्रार्त
स्येवयस्येतितस्यतन्द्रांविनिर्दिशेत् इन्द्रियाणामर्थःप्रयोजनेयेषुतेषुअर्थादिविषयेषु असं
वित्तिः असम्यग्ज्ञानं इन्द्रियार्थासम्यग्ज्ञानादि निद्रायांप्रबुद्धस्यक्लमाभावस्तन्द्रायांतुप्र
बोधितस्यापिक्लमइत्यनयोर्भेदः क्लमस्यलक्षणमाह योनायासःश्रमोदेहेप्रवृद्धःश्वासवर् १५८

वर्जितः क्रमस्स इति विज्ञेय इंद्रियार्थप्रवाधकः इंद्रियाणां बुद्धींद्रियाणां कर्म्मेंद्रियाणां च अर्थसंप्र
योजनं विषयग्रहणं तस्य प्रवाधकः आवल्येन निःक्रालक्षणमाह यदा तु मनसि क्लांते कर्म्मात्मानः क्ल
मान्विताः विषयेभ्यो निवर्त्तंते तदा स्वपिति मानवः क्लांते ग्लाने श्रांत इति यावत् कर्म्मात्मानः इ
न्द्रियाणि ज्ञानेंद्रियाणि कर्म्मेंद्रियाणि च क्लमान्विताः श्रांताः संन्यासस्य संप्राप्तिपूर्वकं लक्षण
माह वाग्देहमनसां चेष्टाम आक्षिप्यातिवला मलाः संन्यस्यंत्यवलं जंतुं प्राणायतनमाश्रिताः स ना
संन्याससंन्यस्तः काष्ठीभूतो मृतोपमः प्राणैर्विमुच्यते शीघ्रं मुक्त्वा सद्यः फलां क्रियां आशि
प्पविनाकृप संन्यस्यंति मूर्छयंति प्राणायतनं हृदयं संन्यस्तः मूर्छितः काष्ठीभूतः क्रियार
हितः अत एव मृतोपम इति सद्यः फलां क्रियां सूचीव्यधनांजनावपीडनकपिकच्छूघर्ष
ण वृश्चिकादिदंशनादिरूपां संन्यासस्य मूर्छातो भेदमाह दोषेषु मदमूर्छायां गतवेगेषु दे
हिनां स्वयमप्युपशाम्यंति संन्यासो नौषधैर्विना मदमूर्छायां मदः अप्रवृद्ध उन्मादः मूर्छायाः

मूर्छादिषेषु गतवेगेषु शान्तवेगेषु स्वयमुपशाम्यत्सि संन्यासस्तु चिकित्सां विना नोपशाम्यतीतिभे
दः अथमूर्छायाश्चिकित्सा सेकावगाहामणयःसहाराःशीताःप्रदेहव्यजनानिलाश्च शीता
निपानानिचगंधवंतिसर्वासुमूर्छास्वनिवारितानिमणयश्चन्द्रकान्तादयःहाराःमुक्तादिहाराः
शीताप्रदेहाःसकर्पूरचन्दनाद्यनुलेपनानि सितामलकादिपानकानिगन्धवन्तिकर्पूरादिसु
गन्धवन्तिसर्वासुमूर्छास्वनिवारितानि अस्यायमभिप्रायः सेकादीन्यन्यासुमूर्छासुहितान्ये
वकिंतुवातश्लेष्मजास्वपिमूर्छासु अनिवारितानि तत्रापिपित्तस्यप्राधान्यात् सिताप्रिया
लेक्षुरसप्लुतानिद्राक्षामधूकस्वरसान्वितानि खर्जूरकाश्मर्यरसैःशृतानिसिद्धानिसर्पींषि
चजीवनानि सिद्धानिवर्गेमधुरेपयांसिसदाडिमाजांगलजारसाश्च तथायवालोहितशालय
श्चमूर्छासुपथ्याःससतीनमुद्गाः सतीनःकलायःकोलमज्जोषणोशीरकेशरंशीतवारिणा
पीतंमूर्छांजयेल्लीढाकृष्णावामधुसंयुता शीतेनतोयेनविक्षांमरणालंकृष्णांचपथ्यांमधुनाचलिह्यात् १५९

कुर्याच्चिनासावदनावरोधं क्षीरं पिबेद्वाप्यथमानुषीणां द्राक्षासितादाडिमलाजवंतिकल्हारनी
लोत्पलपद्मयंति पिबेत्कषायानिवशीतलानिपित्तज्वरेयानिचयापयंति शिरीषबीजगोमूत्र
कृष्णामरिचसैंधवैः अंजनंस्यात्प्रबोधायसरसोनशिलावचैः अन्यच्च अंजनंसम्यगारग्वधंम
धुसिंधुशिलोषणैः प्रमोहजोहिभवतिभाषितंभिषजाम्वरैः शिलाजनःशिला ऊषणंमरिचंम
धूकसारसिन्धूत्थवचोषणकणाःसमाः सूक्ष्मांपिष्ट्वाम्भसानस्यंकुर्यात्तस्यप्रबोधकं अ
पस्मारजादीनांमूर्छानांचिकित्सा रक्तजायांतुमूर्छायांहितःशीतक्रियाविधिः मद्यजायांपि
वेन्मद्यंनिद्रांसेवेतवासुखं विषजायांविषघ्नानिभेषजानिप्रयोजयेत् अथसन्यासचिकित्सा
प्रभूतदोषस्तमसोतिरिक्तात्संमूर्छितोनैवविबुध्यतेयः सन्यस्तसंज्ञस्सहिदुश्चिकित्स्योनरोभि
षग्भिःपरिकीर्तितोसौ यथामलोष्टंसलिलेनिषिक्तंसमुद्धरेदाशुविलीनमेव तद्वच्चिकि
त्सेत्त्वरयानिषक्तंसस्वेदनंमृत्युवशंप्रयातम् अंजनान्यवपीडश्चधूमाःप्रधमनानिच शू

चीनिस्तोदनंशस्त्रंदाहपीडानखान्तरे लुंचनंकेशलोम्नांवादंष्ट्रैर्दशनमेवच आत्मगुप्तावघर्ष
श्चाहितस्तस्यप्रबोधने अवपीडः कट्फलीकृतौषधरसस्यनासापुटेदानं तस्यसन्यस्तस्य अ
थमूर्च्छायांरसाः कणामधुयुतंसूतंमूर्च्छायांप्राशयेद्भिषक् शीतसेकावगाहादीन्सर्वाङ्गि
पीडनंहगात् सूतंमारितं ताम्रचूर्णसमंक्षीरंकेशरंशीतवारिणा पीतंमूर्च्छांद्रुतंहन्यात्कृत
मिश्राश्रान्तिर्यथा ताम्रचूर्णमारितताम्रचूर्णं अथभ्रमस्यचिकित्सा पिबेद्दुरालभाक्वाथंसघृ
तंभ्रमशान्तये पथ्याक्वाथेनसंसिद्धंघृतंधात्रीरसेनवा शुण्ठीकृष्णाशुताक्षामांसाभयपर्णां
पलंपलं गुडस्यषड्बलान्येषागुटिकाभ्रमनाशिनी ताम्रंदुरालभाक्वाथैःपीत्सुघृतसंयुतं
निवारयेद्भ्रमंशीघ्रंतयथाग्नांमुनाभाषितं अथतन्द्रायाश्चातिनिद्रायाश्चिकित्सा तुरंगलाला
लवणोत्तमेन्दुमनःशिलामागधिकामधूनि नियोज्यएतान्यक्षिणि निहन्तितन्द्राकतन्द्रासनिद्रां
विनिवारयन्ति इन्दुःकर्पूरःसैंधवंश्वेतमरिचंसर्षपःकुष्ठमेवच वस्तमूत्रेणसंपिष्टंनस्यं १६०

तज्ज्ञानिवारणं श्वेतमरिचंशिग्रुबीजं चुंबीकणाग्निरसोषणानिनस्येनतद्वाविजयोल्वणानि
चुर्णमतापौष्करनागराणि मार्गीशिवाभ्यांक्वाथितानिपानात् शिवाहरीतकीइतिमूर्च्छाभ्र(
मनिद्रातंद्रासन्यासाधिकारः अथमदात्ययाधिकारः तत्रमद्यस्यस्वभावमाह मद्यंस्वभाव
तःप्राज्ञैर्यथैवान्नंतथास्मृतं अयुक्तियुक्तंरोगाययुक्तियुक्तंयथामृतं युक्तेर्महिमानमाह
प्राणाःप्राणभृतामन्नंतदयुक्त्यानिहन्त्यसून् विषंप्राणहरंतच्चयुक्तियुक्तंरसायनं विधिना
मात्रयाकालेहितैरन्नैर्यथाबलं प्रहृष्टोयःपिबेन्मद्यंतस्यस्यादमृतंतथा तत्रविधिर्यथा कृ
तःशारीरसंस्कारःशुचिरुत्तमगन्धवान् उद्दामगांधिनिस्फीतैर्मृदुभिर्वसनैर्वृतः विचित्र
विविधःस्रग्वीरत्नाभरणभूषितः सानन्दःसावधानश्चापिबेन्मद्यंशनैःशनैः देशोयथा
उपवनेषुसुरभिसुरंगसुमनःसमूहमनोरमेषु मंजुगुंजन्मधुकरनिकरेषुकूजत्कलकंठेषु
सुरभिशिशिरमधुरसमीरणेषुमंदिरेषुसुधाशुभ्रेषुसुधूपधूपितेषुसत्पधानेषुसंस्तीर्णविहि

तेशयनासने उपविष्टोऽथवा तिर्यग्गतं हृष्टः सुरां पिबेत् सौवर्णै राजतैः पात्रैः पिबेन्मणिमयैर
पि रूपयौवनमत्ताभिर्वल्लभाभिर्विशेषतः वस्त्राभरणमाल्यैस्तु भूषिताभिर्यथर्तुकैः दीपमा
नं मृगाक्षीभिः पिबेन्मद्यं मुदान्वितः मात्रयेति मात्रा तत्रात्रेरेकथिता शुद्धकायः पिबेन्मद्यं सो
पदंशं पलद्वयं मध्याह्ने द्विगुणं तत्र सुस्निग्धं भक्षयेदनु प्रदोषे षट्पलं तद्वन्मात्रा मद्यरसायने अ
नेन विधिना सेव्यं मद्यं नित्यमतंद्रितैः शुद्धकायः उत्सृष्टमलमूत्रः पलद्वयं पारिशेष्यात्पूर्वाह्णे
बोद्धव्यं अतंद्रितैः मात्रायां सावधानैः अन्ये त्वाहुः बुध्यादयो गुणा यावत्कुर्वंति निरत्ययाः मा
त्रेयं विहिता मद्यपाने न्यारोगजन्मने कालइति यस्मिन्काले यादृशं मद्यमुचितं तस्मिंस्तादृशं
पेयं यथा ग्रीष्मे शीतमधुरं माध्वीकादि शीते उष्णतीक्ष्णं गौडिकपैष्टिकादिहितैरन्नैरिति मा
त्रानुकूलैर्विविधैः फलैर्वर्णमनोहरैः सुगंधैर्लवणैर्हृद्यैर्भृष्टैर्मांसैः पृथग्विधैः स्निग्धैरन्नैः
शाकैश्च सह मद्यं पिबेन्नरः अन्नैः सिद्धौदनपर्पटादिभिर्भक्ष्यैर्लड्डुकफेनिकादिभिः अ १६१

भ्यंगोत्सादनस्नानवासोधूपानुलेपनैः स्निग्धोष्णैस्तादृशैरन्नैर्वातप्रकृतिकः पिबेत् शीतोप
चारैर्विविधैर्मधुरस्निग्धशीतलैः फलैरन्नैः सहनरः पित्तप्रकृतिकः पिबेत् श्लैष्मिकोजांगलैर्मां
सैर्मरीचैर्मदिरां पिबेत् प्राक्पिबेत्श्लैष्मिको मद्यंनुक्तस्योपरि पैत्तिकः वातिकस्तु पिबेन्मद्यंस
मदोषोयथेछति वातिकस्तु पिबेन्मद्यंप्रायो गौडिकपैष्टिकं कफपित्तात्मकोयस्तु माध्वीकं
माधवंपिबेत् विधिर्वसुमतामेष कथितश्छत्रकादिभिः यथोपपत्तिकं वापि पिबेन्मद्यंहिमा
त्यया मद्यस्यगुणमाह रसवातादिमार्गाणांसत्वबुद्धीन्द्रियात्मनां प्रधानस्यौजसश्चैवहृदयं
स्थानमुच्यते मद्यंहृदयमाविश्यस्वगुणैरोजसोगुणान् दशभिर्दशसंक्षोभ्यचेतोनयतिवि
क्रियां लघूष्णसूक्ष्मतीक्ष्णाम्लव्यवायाशुकरंतथा रूक्षंविकाशिविशदंमद्यंदशगुणंस्मृ
तं गुरुशीतंमधुस्निग्धंसान्द्रंस्वादुस्थिरंतथा प्रसन्नंपिच्छिलंश्लक्ष्णमोजोदशगुणंस्मृतं गौर
वंलाघवाच्छैत्यमौष्ण्यादम्लस्वभावतः माधुर्यंमार्दवंतैक्ष्ण्यात्प्रसादंवाशुभावनात् रौक्ष्या

भा॰प्र॰ त्वेहं यद्वापित्वात्स्थिरत्वसूक्ष्मतामपि विकाषित्वाद्वात्येच्छिद्रं प्रवेशाद्यात्सोऽन्तांतथ्या सोऽस्यान्मद्यं
१६२ विहत्येवमोजसः स्वगुणैर्गुणान् सत्वंतस्याश्रयं प्राशुसंक्षोभ्य कुरुते मदं हृदि मद्यगुणाविष्टे हर्षस्त
र्षो रतिः सुखं विकाराश्च यथासत्वं चित्रा राजसतामसाः जायन्ते मोहनिद्राद्या इत्येन मदलक्षणं हर्ष
मोजो वलं पुष्टिमारोग्यं पौरुषं तथा आयुश्चापि तं करोत्याशु मद्यं मदसुखप्रदं रोचनं दीपनं हृद्यं स्वर
वर्णप्रसादनं प्रीणनं वृंहणं वल्यं भयशोकश्रमापहं स्वापनं नष्टनिद्राणां मूकानां वाग्विशोध
नि नं नाशनं चातिस्थूलानां विवंधानां विवंधनुत् वधवंधपरिक्लेशैर्दुःखानां चाप्यवोधनं अपि प्रव
यसां मद्यमुत्सर्गामोदकारकं वहुदुःखहतस्यास्य शोकैरुपहतस्य च विश्रामो जीवलोकस्य
मद्यं युक्त्या निषेवितं मदस्त्रिलक्षणो भवति एको मदोऽधिकसत्वगुणस्य पुंसो भवति द्वितीयोऽ
धिकरजोगुणस्य तृतीयोऽधिकतमोगुणस्य अतएवोक्तं चरके प्रधानाधममध्यानां रुक्षाणां
व्यक्तिदर्शकः यथाग्निरेव सत्वानां मद्यं प्रकृतिदर्शकमिति तत्र सात्विकस्य मदस्य लक्षण १६२

माह बुद्धिस्मृतिप्रीतिकरः सुखश्च पानान्ननिद्रारतिवर्द्धनश्च संपाठगीतस्वरवर्द्धनश्च प्रोक्तोऽति
रम्यः प्रथमो मदो हि प्रीतिः परेण मैत्री सुखः सुखयतीति सुखकर इत्यर्थः पानान्नेत्यादि पानादिष्व
नुरागवर्द्धनः अतिरम्यः मनोविकारित्वेपि नदुःखकरः प्रथमः प्रथमगुणाधिकारित्वात्प्रथमः एवं
द्वितीयस्तृतीयश्च राजसस्य मदस्य लक्षणमाह अव्यक्तबुद्धिस्मृतिवाग्विचेष्टः सोन्मत्तलीलाकृति
रप्रशांतः आलस्यनिद्राभिहतो मुहुश्च मध्येन मत्तः पुरुषो मदेन अव्यक्तेत्यत्र ईषदर्थे नञ् विचे
ष्टः विरुद्धचेष्टः उन्मत्तस्य लीलाकृतिर्यास्सहितः तामसस्य मदस्य लक्षणमाह गच्छेदगम्यांश्च
गुरूंश्च मन्येत खादेदभक्ष्याणि च नष्टसंज्ञः ब्रूयाच्च गुह्यानि हृदि स्थितानि मदे तृतीये पुरुषोऽस्व
तंत्रः मन्येदिति परस्मैपदमार्षत्वात् अस्वतंत्रः मदवशः यद्यपि मदात्ययएव तथापि श्रुता
नुरोधादिति तामसमदलक्षणमप्याह चतुर्थेस्यां मदे मूढो भग्नदारुरिव विनिःक्रियः कार्य्या
कार्य्यविभागाज्ञो मतादप्यपरो मृतः मूढो मोहयुक्तः को मदं तादृशं गच्छेदुन्मादमिवापरं

भा·प्र·
१६३

वकदोषमिवारूढं कातरंस्ववशः कृता नातिमाद्यन्तिबलिनः कृताहारामहाशनाः स्निग्धाःस
त्ववयोयुक्तामद्यनित्यास्तदन्वयाः मेदःकफाधिकामन्दवातपित्ताद्दृढाग्नयः विपर्य्यतिमाद्यन्ति
विरूक्षाःकुपिताश्चये मद्येनचाम्लरूक्षेणसाजीर्णेवकुनात्तिच अथमदात्ययादीनांनिदानान्या
ह विषस्ययेगुणादृष्टाःसन्निपातप्रकोपनाः तएवमद्येस्ववपत्तेविषेतुबलवत्तराः तस्मेदविधिपीते
नतथामात्राधिकेनच युक्तेनवाहितैरन्नैरकालेसेवितेनच मद्येनखलुजायन्तेमदात्ययमुखागदाः
अविधिप्रयुक्तंमद्यं विकारांतरमप्युपपादयति इत्याह निर्भक्तमेकान्ततएवमद्यंनिषेव्यमाणंमनु
जेननित्यं उत्पादयेत्कष्टतमान्विकारानुत्पादयेच्चापिशरीरभेदं एकान्ततोनैरंतर्य्येणविकारानम
दात्ययादीन् शरीरस्यभेदंनाशं मदात्ययादीनांहेत्वन्तरमाह क्रुद्धेनभीतेनपिपासितेनशोका
भितप्तेनबुभुक्षितेनव्यायामभाराध्वपरिक्षतेनवेगावरोधाभिहतेनचापि अत्यम्लरूक्षावततोदरेण
साजीर्णभुक्तेनतथाबलेन उष्णाभितप्तेनचसेव्यमानंकरोतिमद्यंविविधान्विकारान् तानेवविका १६३

रान्निवृणोति पानात्ययं परमदं पानाजीर्णमथापि वा पानविभ्रममुग्रं च तेषां वक्ष्यामि लक्षणं तत्र मदा
त्ययस्य सामान्यं लक्षणमाह शरीरदुःखं बलवत्संमोहो हृदयव्यथा अरुचिः प्रततं तृष्णा ज्वरः शीतो
ष्णलक्षणः शिरःपार्श्वास्थिसंधीनां वेदना विद्युतेव या जायते प्रबला जृम्भा स्फुरणं वेपनं श्रमः उरो
विबधः कासश्च हिक्का श्वासः प्रजागरः शरीरकंपः कर्णाक्षिमुखरोगास्त्रिकग्रहः छर्दिर्विड्भेद उ(
त्क्लेशो वातपित्तकफात्मकः भ्रमः प्रलापो रूपाणामसतां चैव दर्शनं तृणभस्मलतापर्णपांशुभि
श्चावपूरणं प्रधर्षणं विहंगैश्च भ्रान्तचेताः समन्यते व्याकुलानामशस्तानां स्वप्नानां दर्शनानि च म
दात्ययस्य रूपाणि सर्वाण्येतानि लक्षयेत् अथ वातिकस्य मदात्ययस्य निदानमाह स्त्रीशोकभय(
भाराध्वकर्मभिर्योतिकर्षितः रूक्षाल्पप्रमिताशी च यः पिबत्यतिमात्रया रूक्षं परिणतं मद्यं नि(
शि निद्रां निहंति च करोति तस्य तच्छीघ्रं वातप्रायं मदात्ययं तत्र मद्यं अथ तस्य लक्षणमाह हिक्का(
श्वासः शिरःकंपपार्श्वशूलप्रजागरैः विद्याद्बहुप्रलापस्य वातप्रायं मदात्ययं अथ पैत्तिकस्य निदा

मा·प्र· नमाह तीक्ष्णोष्णमद्यमम्लंचयोतिमात्रंनिषेवते अम्लोष्णतीक्ष्णभोजीच क्रोधनोग्न्यातपक्रियः त
१६४ स्योपजायतेतीव्रःपित्तप्रायोमदात्ययः अथतस्यलक्षणमाह तृष्णादाहज्वरःस्वेदमोहातीसारविभ्र
मैः विद्याद्धरितवर्णस्यपित्तप्रायोमदात्ययः अथश्लैष्मिकस्यमदात्ययस्यनिदानमाह मधुरस्निग्ध
गुर्वाशीयःपिबत्यतिमात्रया अव्यायामदिवास्वप्नशय्यासनसुखेरतः मदात्ययंकफप्रायंसनरो
लभतेध्रुवं अथतस्यलक्षणमाह छर्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवैः विद्याच्छीतपरीतस्यक
फप्रायंमदात्ययंमदात्ययं अथसान्निपातिकस्यमदात्ययस्यनिदानलक्षणंचाह त्रिदोषोहेतुभिः
सर्वैःसर्वैर्लिङ्गैर्मदात्ययः अथपरमदमाह श्लेष्मोच्छ्रयोऽङ्गगुरुताविरस्यताचविण्मूत्रशक्तिरथ
तन्द्रिररोचकश्च लिङ्गपरस्यतुमदस्यवदन्तितज्ज्ञाः तृष्णारुजाशिरसिसंधिषुचापिभेदः तंद्रिस
द्रा पानाजीर्णमाह आध्मानमुग्रमथवोद्गिरणंविदाहःपानेत्वजीर्णमुपगच्छतिलक्षणानि उद्गि
रणंवातिरुद्गारोवा पीयतेइतिपानंमद्यं पानविभ्रममाह हृद्गात्रतोदकफसंस्रवकंठधूममूर्छा १६४

वमीमदशिरोरुजनप्रदेहाः द्वेषः सुरान्नविकृतेषु च तेषु तेषु तंपानविभ्रममुशंत्यखिलेषु धीराः कं(
बधूमः कंवाद्ममनिर्गमश्च प्रदेहः कफेनलिप्तास्यता द्वेषश्च सुरान्नविकृतेषु च तेषु सुराविकारेष्वन्न
विकारेषु च द्वेषः अखिलेषु मद्यविकारेषु अथ ध्वानं मदात्ययादीनां लक्षणमाह हीनोत्तरोष्ठमति
शीतमसन्ददाहं तैलप्रभास्यमतिपानहतं त्यजेच्च जिह्वोष्ठदंतमसितं त्वथवापि नीलं पीते च यस्य न
यने रुधिरप्रभे च हिक्काज्वरो वमथुवेपथुपार्श्वशूलाः कासभ्रमावपि च पानहतं त्यजेत्तं अथ मदा
त्ययादीनां चिकित्सा मद्योत्थानां तु रोगाणां मद्यमेव हि भेषजं यथा दहनदग्धानां दहनस्वेदनं हितम्
मिथ्याविहितमद्येन यो व्याधिरुपजायते स तेनैव निपीतेन मद्येन सहि शाम्यति बीजपूरकवृक्षाम्ल
कोलदाडिमसंयुतं यवानीहवुषाजाजीशृंगवेराक्तचूर्णितं सस्नेहैः सक्तुभिर्युक्तमवदंशोथवोत्थि
तं दद्यात्सलवणं मद्यं पैष्टिकं वातशांतये मद्यं सौवर्चलव्योषयुक्तं किंचिज्जलान्वितं जीर्णमद्या
यद्दातव्यं वातपानात्ययापहं चव्यं सौवर्चलं हिंगु पूरकं विश्वदीप्यकं चूर्णं मद्येन पातव्यं पानात्य

यरुजापहं लावतित्तिरदक्षाणांरसैश्चशिखिनामपि पक्षिणांमृगमत्स्यानांमानुषीणांतथोदनैः
स्निग्धोष्णलवणाम्लैश्चवेसवारैर्मुखप्रियैः स्निग्धैर्गोधूमिकैरन्नैर्वातमदात्ययंत्यजेत् नारीणां
यौवनोत्थानांनिर्दयैरुपगूहनैः श्रोणिपृथुकुचभारैश्चसंरोधोष्णसुखप्रदैः शयनाच्छादनैरुष्णैरुष्णै
श्चाग्नगृहैःसुखैः मारुतप्रबलःशीघ्रंप्रशाम्यतिमदात्ययः पित्तपानात्ययेयोज्याःसर्वतश्चक्रि
याहिमाः सितामाक्षिकसंयुक्तंमदमष्टोदकंपिबेत् मद्यंखर्जूरमृद्वीकापरूषकरसैर्युतं सदा
डिमरसंशीतंसक्तुभिश्चावचूर्णितं सशर्करंवामाध्वीकंसंयुक्तमथवापरं दद्यात्षडुदकंकाले
पातुंपित्तमदात्यये शशाङ्कपिञ्जलाञ्जैणान्लावानशितपुच्छकान् मधुराम्लान्प्रयुञ्जीतभोज
नेशालिषष्टिकान् पटोलयूषमिश्रंवाछागमांसकल्पयेद्रसं सतीनमुद्गमिश्रंवादाडिमामलका
न्वितं द्राक्षामलकखर्जूरपरूषकरसेनच कल्पयेत्तर्पणान्यूषान्रसांश्चविविधान्भिषक्शी
तानिचान्नपानानिशीतशय्यासनानिच शीतवातजलस्पर्शाःशीतान्युपवनानिच सोमपा

सोत्पलानांचमणीनांमौक्तिकस्यच चंदनोदकशीतानांस्पर्शाश्चंद्रांशुशीतलाः नीलरत्नांबुषिता
नांचस्पर्शाः पित्तमदात्यये रूक्षतर्पणसंयुक्तंयवानीव्योषसंयुतं यवगोधूमकंवान्नंरूक्षयूषेण
भोजयेत् कुलत्थानांचशुष्कानांमूलकानांरसेनवा प्रभूतकटुसंयुक्तंयवान्नंवाप्रदापयेत् ।
छागमांसरसंरूक्षमम्लंवाजांगलंरसं व्योषपूर्वमनाम्लंपिबेत्कफमदात्यये स्थाल्यामथक
कपालेवाभृष्टंकृत्वातुनीरसं कट्वम्ललवणंमांसंखादेत्कफमदात्यये वामकद्रव्ययुक्तेन।
मद्येनोल्लेखनंमतं मदात्ययेकफोद्भूतेलंघनंचयथाबलं यदिदंकर्मनिर्दिष्टंवातपित्तक
फात्मतिसर्वजेसर्वमेवेदंप्रयोक्तव्यंचिकित्सकैः अथसंगात्कोद्रवादिमदचिकित्सा सगुडः
कूष्मांडरसः शमयतिमदमाशुकोद्रवजं धत्तूरजंचदुग्धंसशर्करंचाशुपानेन सच्छर्दिमूर्छा
तीसारंमदंपूगफलोद्भवः सद्यः प्रशमयेत्पीतमात्रंतेचवारिशीतलं वन्यकरीषघ्राणंजलपा
नाल्लवणभक्षणादपिच शाम्यतिपूगफलोद्भवमदः सशूलः शर्कराकवलात् तत्क्षणा।

मा॰प्र॰ न्यस्तं चूर्णं समाघ्रातं घ्राणेनाघ्रायेत तांबूलोत्थं मदं पुंसामेकमेव स्वभावतः जातीफलमदं शीघ्रं हन्ति
१६४ पथ्या निषेविता शीततोयावगाहश्च शर्करादधियोजिता विनीतमदशांत्यर्थमिति एवमाताः पुनः
मद्यं पीत्वा यदि नातत्क्षणमेव लेहि सर्करां सघृतां जातु न मदयति मद्यं मनागपि प्रचितवीर्यमपि
इति पानात्ययपरमदपानाजीर्णपानविभ्रमाधिकारः अथ दाहाधिकारः तत्र दाहः सप्तविधः
तेष्वादौ पित्तजं दाहमाह पित्तज्वरसमः पित्तात् दाहस्यात्तस्य सत्क्रमः दाहकृष्णात्मको व्याधिः
स पित्तज्वरलक्षणः पित्तज्वरलक्षणमायुक्तं पित्तज्वरे त्वामाशयकृष्णादयो धिका इति भेदः तस्य
दाहस्य स पित्तज्वरोक्तः क्रमश्चिकित्सा रक्तजमाह कृत्स्नदेहानुगं रक्तमुद्रिक्तं दहति ध्रुवं संधू
प्यते चोष्यते चैव ताम्राभस्ताम्रलोचनः लोहगंधांगवदनो वह्निनेवावकीर्यते अद्रिक्तं अतिरिक्तं
सत् दहति दाहाख्यं व्याधिं करोति संधूप्यते अग्निनादह्यत इव उष्यते समीपस्थेनेव वह्निना
तप्यते चूष्यत इति पाराशरे अचूषणेनैव पीडामनुभवतीत्यर्थः वह्निनेवावकीर्यते १६६

शरीरोपरिवह्निःप्रक्षिप्तश्च शस्त्रादिक्षतनिःसृतरक्तपूर्णकोष्ठजमाह असृजापूर्णकोष्ठस्य।
दाहोऽन्यःस्यात्सुदुस्तरः असृजाशस्त्रादिक्षतानिःसृतेनरक्तेन मद्यजमाह त्वचंप्राप्तःसपानोष्मा
पित्तरक्ताभिमूर्छितः दाहंप्रकुरुतेघोरंपित्तवत्तत्रभेषजं सपानोष्मामद्यपानजनितऊष्मापित्तर
क्ताभिमूर्छितःपित्तरक्ताभ्यांवर्द्धितः तृष्णानिरोधजमाह तृष्णानिरोधादब्धातौक्षीणेतेजःसमुद्धतं
सबाह्याभ्यन्तरंदेहंप्रदहेन्मन्दचेतसः संशुष्कगलताल्वोष्ठोजिह्वांनिष्कृष्यवेपते अब्धातौ
रसेक्षीणेक्षयंप्राप्तेतेजःपित्तोष्मासमुद्धतंवृद्धंमन्दचेतसःअल्पबुधेः यतस्तेनतृष्णानिरोधः।
कृतः धातुक्षयजमाह धातुक्षयोत्थोयोदाहस्तेनमूर्छातृषान्वितः क्षामस्वरःक्रियाहीनःससी।
देद्भृशपीडितः सीदेत शीघ्रंदेहीम्रियेतइत्यर्थः मर्माभिघातजमाह मर्माभिघातजोऽप्यस्ति
सोऽसाध्यःसप्तमोमतः मर्माणिशिरोहृदयवस्त्यादीनि असाध्यदाहमाह सर्वएवचवर्ज्याः
स्युःशीतगात्रस्यदेहिनः अथदाहचिकित्सा शतधौतघृताभ्यक्तंदिग्धान्तुयवसक्तुकैः को

लामलकयुक्तैर्वाधान्याम्लैरपिबुद्धिमान धान्याम्लंकांजिकभेदः छादयेत्तस्यसर्वाङ्गंमारनाला
र्द्रवाससाः लामज्जकेनयुक्तेनचंदनेनानुलेपयेत् चंदनाम्बुकणस्यंदितालवृंतोपवीजनैः सु
प्तवदाहार्दितोभोजकदलीदलसस्तरेपरिषेकावगाहेषुव्यजनानांचसेवने शस्यतेशिशिरंतो
यंदाहतृष्णोपशांतये फलिनीलोध्रसेव्याम्बुहेमपत्रंकुटंनटं कालीयकरसोपेतंदाहेशस्तंप्रले
पनं फलिनीप्रियंगुः सेव्यंउशीरं अम्बुवालकं हेमपत्रंनागकेशरपत्रं कुटंनटंविलुन्नकं गुडत
जीतिलोके क्वचित्पावतीतिनाम कालीयकंकलंबकइतिलोके ह्रीवेरपद्मकोशीरस्वंद
नाम्बुजवारिणा संपूर्णमवगाहेतद्रोणींदाहार्दितोनरः वाप्यःकमलहासिन्योजलयंत्रगृहा
ःशुभाः नार्यश्चन्दनदिग्धांग्योदाहदैन्यहरामताः पाययेत्कमलस्याम्भःशार्कराम्भःपयोपि
वा क्षीरमिक्षुरसंवापिकारयेत्पित्तजिद्विधिं परीर[illegible]र्पयोशीरनीरनीरदनीरजैः मृणालवि
सिधान्याकपद्मकामलकैःकृतः अर्धशिष्टःशीतश्चीतःक्षौद्रसमन्वितः क्वाथोविपाययेद्दाहं १६७

हृणेनपरमोल्वणं परीसेचंदनं चंदनादिक्काथः तिलतैलंभवेत्तस्यतत्योडशगुणेशालैः कांजि
केविपचेन्नतस्यादाहज्वरहरंपरं कांजिकतैलं इतिदाहाधिकारः अथोन्मादाधिकारः तत्रो
न्मादस्यनिरुक्तिमाह मदयंत्युद्धतादोषायस्मादुन्मार्गमास्थिताः मानसोयमतोव्याधिरुन्माद
इतिकीर्त्तितः अयमर्थः यस्माद्धेतोः उद्धताः प्रवृद्धाः दोषाः उन्मार्गमास्थिताः मदयंतिवि
त्तंविक्षिपंति अस्मिन् अतोयमुन्मादइतिकीर्त्तितः सउन्मादः मानसोव्याधिः मनोवैकृत्य
कारणात् तस्यैवावस्याभेदेननामांतरमाह सचाप्रवृद्धस्तुरुणेमदसंज्ञांबिभर्त्तिच सउन्मा
दःतरुणोनवीनः उन्मादस्यविप्रकृष्टंनिदानमाह विरुद्धदुष्टाशुचिभोजनानिप्रधर्षणंदेव
गुरुद्विजानां उन्मादहेतुर्भयहर्षपूर्वोमनोभिघातोविषमाश्चचेष्टाः दुष्टंधत्तूरबीजादिसहितं
अशुचिरजस्वलादिस्पृष्टादिप्रधर्षणमभिभवः विषमाश्चेष्टाबलवद्विग्रहादिः सन्निकृष्टंनि
दानमाह एकैकशः सर्वशश्चदोषैरत्यर्थमूर्च्छितैः मानसेनचदुःखेनसपंचविधउच्यते

विषाद्भवति षष्ठश्च यथास्वं तत्र भेषजं तस्य संप्राप्तिमाह तैरल्पसत्त्वस्य मलाः प्रदुष्टाः बुद्धेर्निवासं हृ
दयं प्रदूष्य स्रोतांस्यधिष्ठाय मनोवहानि प्रमोहयंत्याशु नरस्य चेतः अल्पसत्त्वस्य अल्पसत्त्वगुण-
स्य मलाः वातादयः बुद्धेर्निवासं हृदयं प्रदूष्येति एतेनाशयस्य दुष्ट्या तदाश्रिताया बुद्धेरपि दुष्टिरु
क्ता मनोवहानि स्रोतांसि हृदयाश्रितानि दश एतानि विशेषतो बोद्धव्यानि यत्तच्चरकेण शाक-
लशारीरस्रोतांस्येव मनोधिष्ठानत्वेनोक्तानि प्रमोहयन्ति विकृतं कुर्वंति उन्मादस्य सामान्यरूप
माह धीविभ्रमः सत्त्वपरिप्लवश्च पर्याकुला दृष्टिरधीरता च अबद्धवाक्त्वं हृदयं च शून्यं सामान्य
मुन्मादगदस्य लिंगं धीविभ्रमः शुक्तिकायां रजतज्ञानं सत्त्वं मनस्तस्य चांचल्यं अबद्धवाक्त्वं
असंबद्धभाषित्वं शून्यं स्मृतिशून्यं वातिकोन्मादस्य निदानपूर्विकां संप्राप्तिमाह रूक्षाल्प
शीतान्नविरेकधातुक्षयोपवासैरनिलोतिवृद्धः चिंतादिदुष्टं हृदयं प्रदूष्य बुद्धिं स्मृतिं चाप्युपहंति
शीघ्रं प्रदूष्य प्रकर्षेण दूषयित्वा तस्यैव रूपमाह अस्थानहास्यस्मितनृत्यगीतवागंगविक्षे- १६८

पणरोदनानि पारुष्यकार्श्यारुणवर्णताश्चजीर्णेबलंचानिलजस्यरूपं अस्थाने अनवसरे हा

स्यादीनिरोदनान्तानि जीर्णेआहारेबलंव्याधेः पैत्तिकस्यनिदानपूर्विकांसंप्राप्तिमाह अजीर्णक

ट्वम्लविदाह्यशीतैर्भोज्यैश्चितंपित्तमुदीर्णवेगं उन्मादमत्युग्रमनात्मकस्यहृदिस्थितंपूर्ववदाशुकु

र्यात हृदिस्थितंपित्तं चितंसंचितं पुनःअजीर्णकट्वम्लविदाह्यशीतैर्भोज्यैरुदीर्णवेगंसतउन्मा

दंकुर्यात पूर्ववत्हृदयंप्रदूष्येत्यर्थः तस्यरूपमाह अमर्षसंरम्भविनग्नभावाःसंतर्जनाभिद्र

वणौष्ण्यरोषाः प्रच्छायशीतान्नजलाभिलाषाःपीतावभापित्तकृतस्यलिंगं अमर्षोसहिष्णुता

संरंभःअरपटी आटंवरइतियावत संतर्जनंपरित्रासनं अभिद्रवणंपलायनं औष्ण्यंगात्रे

श्लेष्मिकस्यनिदानपूर्विकांसंप्राप्तिमाह संपूरणैर्मंदविचेष्टितस्यसोष्माकफोमर्म्मणिसं

प्रवृद्धः बुद्धिंस्मृतिंचाप्युपहंतिचित्तंप्रमोहयेत्संजनयेद्विकारं संपूरणैर्भोजनादिभिः मंद

विचेष्टितस्य व्यायामरहितस्यसोष्माकफइति कफोप्युन्मादंकरिष्यतिपित्तंसहायमपेक्षते

मा॰प्र॰ व्याधिस्वभावात् मर्म्माणि अत्रमर्म्मशब्देनहृदयमुच्यते विकारमुन्मादस्वरूपं तस्यस्वरूपमाह वाक्चे
१६९ ष्टितंमन्दमरोचकनारीविविक्तप्रियताचनिद्रा छर्द्दिश्चलालाचबलंचभुक्तेनखादिशौक्ल्यंचकफा
त्मकेस्यात् वाक्चेष्टितंमंदंवचनं अल्पंनारीविविक्तप्रियता नारीप्रियताविजनप्रियताच भु(
क्ते अतिबलव्याधेः सान्निपातिकस्यनिदानपूर्वकंलक्षणमाह यःसंनिपातप्रभवोतिघोरस्त
र्वैः समस्तैः सहेतुभिः स्यात् सर्वाणिरूपाणिबिभर्त्तितादृग्विरुद्धभैषज्यविधिर्व्विवर्ज्यः ससा
न्निपातिकउन्मादः सन्निपातग्रहणेनैवसर्वात्मकत्वेलब्धे पुनःसर्वैरितियत्कृतंतद्रजस्तमः
प्रापणार्थंतेनरजस्तमोमिलितैरित्यर्थः तेनवातादयोरजस्तमोभिर्मनोदोषैर्म्मिलिताः समस्तै
श्चनिदानैः कुपिताः उन्मादंजनयन्ति सर्वैर्हेतुभिःसमस्तैर्मिलितैःस्यात् यतोव्याधिःसर्वै
र्हेतुभिर्मिलितैरेवभवतीतियमोनास्ति अयन्तुव्याधिः प्रभावात्सर्वैर्हेतुभिर्मिलितैरेवस्यात्
तादृक्तउन्मादः विरुद्धभैषज्यविधिःव्याधिप्रभावात् विरुद्धभैषज्यविधिरितिकोर्थःत्रिदोष १६९

ज्ञेप्रत्येकंवातादिप्रत्यनीकाक्रियाकार्य्यासाचपरस्परविरोधिनीत्रिदोषंहंतीकिंचिदेवकर्त्तव्यमाम
लकादित्वात्रायौगिकं अतएवविवर्ज्यः नचिकित्स्यइत्यर्थः मनोदुःखजस्यविप्रकृष्टनिदानमा
ह चौरैर्नरेन्द्रपुरुषैररिभिस्तथान्यैर्वित्रासितस्यधनबांधवसंक्षयाद्वागाढंक्षतेमनसिचप्रिययारिरं
सोर्जायेतचोत्कटतरोमनसोविकारः अन्यैःहिंस्रादिभिःगाढमतिशयेन क्षतेअभिहते प्रिय
याप्राप्तुमशक्यया रिरंसोःपुरुषस्यविकारःउन्मादरूपः तस्यरूपमाह चित्रंब्रवीतिचमनोऽ
नुगतंविसंज्ञोगायत्यथोहसतिरोदितिचातिमूढः चित्रमाश्चर्य्यमनोऽनुगतंगोप्यमपि विसंज्ञो
विरुद्धज्ञानःअतीवमूढः अतीवज्ञानभ्रान्त्यः अत्रविकल्पोबोद्धव्यः विषजस्यरूपमाह
रक्तेक्षणोहतबलेन्द्रियभाः सुदीनःश्यावाननोविषकृतेनचेत्परासुः परासुःमृतः अरि(
ष्टमाह अवाङ्मुखस्तून्मुखोवाक्षीणमांसबलोनरः जागरूकोह्यसंदेहमुन्मादेनविनश्यति
अथदेवादिकृतस्योन्मादस्यसामान्यलक्षणमाह अमर्त्यवाग्विक्रमवीर्यचेष्टोज्ञानादिविज्ञा

मा·म·
१७०

नवलादियुक्तः प्रकोपकालोऽनियतश्च यस्य देवादिजन्मा समनोविकारः अमर्त्त्यवाग्विक्रमवीर्य्य
चेष्टः नमर्त्त्यस्येव मनुष्यस्येव वागादयो यत्र सः विक्रमः पराक्रमः वीर्य्यं शौर्य्यं ज्ञानादिविज्ञान
बलादियुक्तः ज्ञानं बुद्धिः आदिपदेन तद्भेदा मेधाविचारणास्मृत्यादयो गृह्यन्ते विज्ञानं शिल्पा
दिविषयकज्ञानं चेष्टा यात्रं आदिपदेनाभिमानादिर्गृह्यते नियतः वक्ष्यमाणतिथ्यादिभिः
मनोविकारः उन्मादः तत्र देवाविष्टस्य लक्षणमाह संतुष्टः शुचिरतिदिव्यमाल्यगन्धो निस्त
न्द्रीऽवितथसंस्कृतप्रभाषी तेजस्वी स्थिरनयनो वरप्रदाता ब्रह्मण्यो भवति नरः स देवजुष्टः
अतिदिव्यमाल्यगन्धः अतिशयेन दिव्यस्य माल्यस्येव गंधो यस्य सः निस्तन्द्री निद्रारहितः अ
वितथं सत्यं ब्रह्मण्यः ब्राह्मणभक्तः दैत्याविष्टमाह संस्वेदी द्विजगुरुदेवदोषवक्ता जिह्म
ह्मो विगतभयो विमार्गदृष्टिः संतुष्टो भवति न चान्नपानजातैर्दुष्टात्मा भवति स देवशत्रुजुष्टः
विमार्गदृष्टिः कुमार्गरतः दुष्टात्मा दुष्टस्वभावः गंधर्वाविष्टमाह हृष्टात्मा पुलिनवनान्तरोपसे १७०

वीस्वाचारःप्रियपरिगीतगन्धमाल्यः नृत्यन्वैप्रहसतिचारुचाल्पशब्दंगन्धर्वग्रहपरिपीडितोमनु
ष्यः हृष्टात्माहृष्टजीवात्मा पुलिनंतोयोत्थितंतटं वनांतरंवनमध्यं तयोःसेवीस्वाचारःआनंदि
ताचारः प्रियाणिपरिसमंततोभावेनगीतगंधमाल्यानियस्यतथाचाल्पशब्दमिति हसनक्रिया
याविशेषणं यक्षाविष्टमाह ताम्राक्षःप्रियतनुरक्तवस्त्रधारीगंभीरोद्रुतगतिरल्पवाक्सहि
ष्णुः तेजस्वीवदतिचकिंददामिकस्मैयोयक्षग्रहपरिपीडितोमनुष्यः पित्राविष्टमाह प्रेता
नांसद्विजातिसंस्तरेषुपिंडान्नाद्यात्माजलमपिचापसव्यवस्त्रः मांसेपसुतिलगुडपायसाभि
कामस्तद्भक्तोभवतिपितृग्रहाभिजुष्टः प्रेतानांमृतानांपितृणांद्विजातिददाति अपसव्यवस्त्रः
दक्षिणस्कंधनिहितोत्तरीयः नागाविष्टमाह यस्तूर्व्यांप्रसरतिसर्प्पवत्कदाचित्सृक्कणपोमु
ऊरपिजिह्वयावलेढि क्रोधालुर्घृतमधुदुग्धपायसेप्सुर्विज्ञेयःसखलुभुजंगमेनजुष्टः प्रसर
तिसर्प्पवत उरसाचलति सृक्कणपोत्प्रोष्ठप्रांतौ राक्षसाविष्टमाह मांसासृग्विविधसुराभि

भा.प्र.
१७१

कारलिप्सुर्निर्लज्जो भृशमतिनिष्ठुरोऽतिशूरः क्रोधालुर्विविधबलो निशाविहारी शौचद्विड्भवति सरा
क्षसैर्गृहीतः अतिनिष्ठुरो निर्दयः ब्रह्मराक्षसाविष्टमाह देवविप्रगुरुद्वेषी वेदवेदांगविच्छुचिः आ
त्मपीडाकरो हिंस्रो ब्रह्मराक्षससेवितः अहिंस्रः अहिंसाशीलः पिशाचाविष्टमाह उद्धस्तः रूक्ष
परुषो विरुद्धभाषी दुर्गंधो भृशमशुचिस्तथातिलोलः बह्वाशी विजनवनांतरोपसेवी व्याचेष्टन्भ्र
मति रुदन्पिशाचजुष्टः उद्धस्तः नग्नः दिगंबर इति विदेहवचनात् ग्रहा हिंसाक्रीडार्थं गृह्णंति अ
त एवोक्तं अशुचिं भिन्नमर्यादं क्षतं हिंस्युः हिंसाविहारार्थं सत्कारार्थमथापि वा सत्कारः क्रीडा त
अहिंसार्थं गृहीतस्य लक्षणमाह स्थूलाक्षो द्रुतमटनः सफेनवामी निद्रालुः पतति च कंपते च यो ति प
श्चाद्रिद्विरदनगादिविच्युतः स्यात्सोऽसाध्यो भवति तथा त्रयोदशेऽब्दे पश्चात्पीत्यादि यः पर्वतादिप
तितस्स न ग्रहैर्गृह्यते इत्यर्थः आदिशब्देन भित्तिप्रासादादयो गृह्यंते तथा त्रयोदशोऽब्दे सर्व एव दे
वादिगृहीता असाध्याः देवादीनामावेशसमयमाह देवग्रहाः पौर्णमास्यामसुराः संध्ययोरपि १७१

गंधर्वाःप्रायशोऽष्टम्यांयक्षाश्चप्रतिपद्यथ पितरःकृष्णपक्षेचपंचम्यामपिचोरगाः रक्षःपिशाचाद्या
श्चैवचतुर्द्दश्यांविशंतिहि कृष्णपक्षेऽमावास्यायांप्रायशःपदादन्यत्रापि तिथ्यभिधानप्रयोज।
नंलक्षणार्थंतत्रतिथौवलिदानार्थंचननुयदिदेवादयोविशंतितदाविशंतस्तेदृश्यन्ते कथंनेत्य
तत्राह दर्प्पणादीन्यथाछायाशीतोष्णंप्राणिनोयथा स्वमणिंभास्करार्चिश्चयथादेहंचदेहधृक
विशंतिनचदृश्यंतेग्रहास्तद्वच्छरीरिणां दर्प्पणादीनित्यादिशब्देनान्यदपिनिर्म्मलद्रव्यंजलतैलादि
द्रव्यंचगृह्यते छायाप्रतिविंबं स्वमणिंसूर्य्यमणिंदेहधृक्जीवात्मा अथोन्मादस्यचिकित्सा।
वातिकेस्नेहपानंप्राकविरेकःपित्तसंभवे कफजेवमनंकार्य्यपरोवस्त्यादिकःक्रमः यच्चोप
देश्यतेकिंचिदपस्मारेचिकित्सितं उन्मादेतच्चकर्त्तव्यंसामान्याद्दोषदूष्ययोः जलाग्निद्रुमशैले
भ्योविषमेभ्यश्चतंसदा रक्षेदुन्मादिनंयत्नात्सद्यःप्राणहराहिते तेजलादयः ब्राह्मीकूष्मांडीफ।
लषड्ग्रंथाशंखपुष्पिकास्वरसाः दृष्टाउन्मादहृतःपृथगेतेकुष्ठमधुमिश्राः चरनीकोरसतोराध

कुष्टकाचूर्णमासा२ मधुमासा८ पेयः इत्येकोयोगः कोहंडाकेवीजकाचूर्णमासा२ कूटकाचू
र्णमासा२ मधुनासंनीपावलेहं द्वितीयोयोगः महाभरीवचकाचूर्णमासा२ कूठकाचूर्णमासा२
मधुनावलेह्यंतृतीयोयोगः शंखपुष्पीस्वरसतोला१ कूठचूर्णमासा२ मधुमासा८ पेयश्चतुर्थोयो
गः सिद्धार्थकोहिंगुवचाकरंजोदेवदारुच मंजिष्ठात्रिफलाश्वेताकटभीत्वक्कटुत्रिकं समांसा
निप्रियंगुश्चशिरीषोरजनीद्वयं वस्तमूत्रेणपिष्टोयमगदःपानमंजनं नस्यमालेपनंचैवस्नान
मुद्वर्त्तनंतथा अपस्मारविषोन्मादकृत्यालक्ष्मीज्वरापहं भूतेभ्यश्चभयंहंतिराजद्वारेचशस्यते
सर्प्पिरेतेनसंसिद्धंसगोमूत्रंतथार्थकृत् सिद्धार्थकादिः भूयादिष्टविनाशंचदद्याद्द्धुताग्निच
वर्द्धसर्षपतैलाभ्यंक्तोदुस्नानमातपे कपिकच्छ्वाथवातप्तैर्लोहतैलजलैस्पर्शयेत् कशाभिःताड
येन्नवासुबद्धंविजनेगृहे सर्प्पेणोद्धतदंतेनदंशोःसिंहैर्गजैश्चतं त्रासयेच्छस्त्रहस्तैश्चवातु।
निस्तस्करैस्तथा अथवाराजपुरुषैर्वहिर्नीत्वासुसंयतं त्रासयेयुर्वधैरेनंतर्जयंतोनृपाज्ञया दे

हृत्कुष्ठक्षयेभ्यो हि पतः प्राणभयं महत् ततस्तस्य शमं याति सर्वतो विप्लुतं मनः इच्छया विनाशो नम
नो यस्याभिहन्यते तस्य तस्य दृश्याप्राप्यासंलावयासैः शमं नयेत् त्र्यूषणं हिंगुलवणं वचाकटुक
रोहिणी शिरीषस्य करंजस्य वीजं गोराश्च सर्षपाः गोमूत्रपिष्टैरेभिस्तु वर्त्तिर्नेत्रांजने हिता। हन्त्यु
न्मादमपस्मारं तथा चातुर्थिकं ज्वरम् त्र्यूषणाद्यमंजनं कुष्ठाश्वगंधे लवणाजमोदे द्वेजीरके त्री
णि कटुनि पाठा मंगल्यपुष्पी च समान्यमनि सर्वैः समाना च वचां विचूर्ण्य ब्राह्मीरसेनाविला
मेवमासं स्वारस्य यं शुष्कमिदं हि चूर्णं अक्षप्रमाणं मधुना घृतेन लिह्यान्नरः सप्तदिनानि याव
त् मंगल्यपुष्पी शंखपुष्पी इति लोके सारस्वतमिदं चूर्णं ब्रह्मणा निर्मितं पुरा हिताय सर्वलो।
कानां दुर्मेधानां विचेतसां एतस्याभ्यासतः पुंसां वुद्धिर्मेधा धृतिः संपत्तिः कविताशक्तिः प्रवर्
द्धते तरम् सारस्वतं चूर्णं विश्वाजमोदरजनी कृयसैंधवो ग्रायप्याक्त कुष्ठमगधोत्रवजीरका
णं चूर्णं प्रमान समये लिहतः स सर्पिर्वाग्देवता निवसति स्वयमेव वक्त्रे विश्वाद्यं चूर्णं काथे

१७३
भा॰प्र॰
१७४

क्विनतिति क्षिप्त्वातत्षोडशगुणंजलं पादशेषंप्रकर्त्तव्यमेषःक्वाथविधिःस्मृतः दशमूलीतथारा(
स्नावातारिस्त्रिवृताबला मूर्वाशतावरीचेतिक्वाथयेत्तुकुडवैःपृथक् कृतेक्वाथेघृतप्रस्थद्वयंमृद(
ग्निनापचेत् कल्कीकृतैर्वक्ष्यमाणैर्द्रव्यैःसम्यक्पुनःपचेत् विशालात्रिफलाकौंतीदेवदार्वे(
लवालुकं स्थिरानंतारजन्यौद्वेप्रियंगुःसारिवाद्वयं नीलोत्पलैलामंजिष्ठादंतीदाडिमकेशरं ।
विडंगंपृश्निपर्णीचकुष्टंचंदनपद्मके अग्निपत्रीश्र्यागिनौतीइतिलोके आगियाइतिच ताली
सपत्रंबृहतीमालतीकुसुमंनवं अष्टाविंशतिभिःकल्कैरेतैःकर्षमितैःपृथक् चतुर्गुणंजलं
दत्वापिष्टैस्तद्विपचेद्घृतं महच्चैतत्समनामेदंसर्वचेतोविकारहृत् अपस्मारेमहोन्मादेमंदेऽग्नौ
ज्वरकासयोः वातरक्तेप्रतिश्यायेशोषेकार्श्येतृतीयके मूत्रकृच्छ्रेकटीशूलेविसर्पा(
ति— षुच पांड्वामयेतथाकंड्वांविषेमेहेगरेपिच देवादिहतचित्तानांगद्गदानामचेतसां आ १७३
स्त्रीणांचवंध्यानांधन्यमायुर्बलप्रदं अलक्ष्मीपापरक्षोघ्नंसर्वग्रहनिवारणं हंतिश्रमंमदं १७४

संज्ञोगदोघोरतरोहिंसः संरंभः नेत्रविकृतिर्हस्तपादादिचेष्टणादिकंच पूर्वरूपमाह हृत्कंपःश
शून्यतास्वेदोध्यानंमूर्छाप्रमूढता निद्रानाशश्चतस्मिंश्चभविष्यतिभवंत्यथ शून्यताहृदयस्येव
ध्यानंविस्मापनं मूर्छामनोमोहःप्रमूढताइंद्रियमोहः भविष्यतिभाविनितस्मिन्नपस्मारे त
त्रवातिकस्यलक्षणमाह कंपतेप्रदशेद्दंतान्फेनोद्वामीश्वसित्यपि असितारुणवर्णानिपा
श्येद्रूपाणिचानिलात् पैत्तिकस्यलक्षणमाह पीतफेनांगवक्त्राक्षःपीतासृग्रूपदर्शनः स
तृष्णोष्णानलव्याप्तलोकदर्शीचपैत्तिके पीतस्यासृग्रूपस्यवावस्तुनोदर्शनंयस्यसपीतासृ
ग्रूपदर्शनः पैत्तिकेऽपस्मारे श्लैष्मिकस्यलक्षणमाह शुक्लफेनांगवक्त्राक्षःशीतोहृष्टांग
जोगुरुः पश्येच्छुक्लानिरूपाणिश्लैष्मिकेमुच्यतेचिरात् शीतःशीतांगःहृष्टांगजोहृष्टरो
मा गुरुर्गुरुगात्रः सन्निपातिकस्यलक्षणमाह समस्तैर्लक्षणैरेतैर्विज्ञातव्यस्त्रिदोषजःअ
पस्मारःसचासाध्योयःक्षीणस्यानवश्चयः सचत्रिदोषजःअसाध्यः तथाक्षीणस्य अनव १७५

श्चएकदोषजोप्यसाध्यइत्यर्थः अपस्मारस्यारिष्टलक्षणमाह प्रस्फुरंतंचबहुशः क्षीणंप्रच
लितभ्रुवंनेत्राभ्यांचविकुर्वाणमपस्मारोविनाशयेत् स्फुरंतंगात्रस्फुरणयुक्तं नेत्राभ्यांचविकु
र्वाणं नेत्रेविकृतेविकुर्वति अपस्मारस्यप्रकोपकालमाह पक्षाद्वाद्वादशाहाद्वामासाद्वाकु
पितामलाः अपस्मारंप्रकुर्वंतिवेगंकिंचिदथांतरं पक्षात्पित्तंद्वादशाहाद्वायुःमासात्कफः
अपस्मारंकरोतीत्यर्थः वेगंकिंचिदथांतरं किंचित् अन्यं वेगंअंतरं अल्पकालान्मंत
रालेऽपिकुर्वंति ननुहेतुभूतेषुदोषेषुविद्यमानेषुसदैवतद्व्याधिप्रकोपःकथंनस्यादत
आह देवेवर्षत्यपियथाभूमौबीजानिकानिचित् शरदिप्रतिरोहंतितथाव्याधिसमुच्छ्रयः
अयमर्थः यथोत्पत्तिकारणसामग्र्यामपिवासूकादिबीजानिस्वभावाच्छरद्येवप्ररोहंति
तथा हेतुभूतेषुदोषेषुविद्यमानेष्वपिस्वभावादपस्मारोद्वादशाहादिष्वेववेगंकरोतीत्य
र्थः अपस्मारस्यचिकित्सा तैलेनलशुनःसेव्यःपयसाचशतावरी ब्राह्मीरसश्चमधुनास

भा॰ प्र॰ ७६ र्वापस्मारभेषजं चूर्णैः सिद्धार्थकादीनां नस्तितैरथवापितैः गोमूत्रपिष्टैः सर्वांगलेपैः शाम्यत्यप
स्मृति सिद्धार्थकादिरुन्मादोक्तः शिग्रुकट्वङ्गकिणिही निंबत्वग्रसपाचितं चतुर्गुणेन गवां मू
त्रैतैलमभ्यंजनेहितं कट्वंगः सोनापाठी किणिही चिचिरा लटजीरेतिच निर्गुंडीभववंदाकना
वनस्यप्रयोगतः जयेतिसहसा नाम्नामपस्मारो महागदः मनोक्तातार्क्ष्यविषघ्नश्चकृत्यारावत
स्यच अंजनाद्धंत्यपस्मारमुन्मादं च विशेषतः मनोह्वा मनःशिला तार्क्ष्यो गरुडः शाकद्विष्ट
यःस्यादेत्त्वीरसकाशीमाक्षिकेणक्वचारजः अपस्मारं महाघोरं चिरोत्थं स जयेद्ध्रुवं षचाघोर
वचा कूष्माण्डकफलोत्थेन रसेन परिपेषितं अपस्मारविनाशाय यष्ट्याह्वं च पिवेन्नरहमि
ति एतस्यपानाद्द्विसत्र्येणैवापस्मारोपशमो भवतीत्यभिप्रायः ब्राह्मीरसवचाकुष्ठशं
खपुष्पीश्रितं घृतं पुराणं स्यादपस्मारोन्मादग्रहहरं परं एतस्यप्रतिक्रिया पुराणं गोघृतं प्र
स्थमितं वचाकुष्ठशंखपुष्पीणां समुदितानां कुडवमितानां कल्के नप्रस्थमितब्राह्मीरस ७६

स्तुल्यं मिधास्मृतिमतिप्रदं इति महाचैतसं घृतं अथ देवाद्याविष्टानां चिकित्सा पूजाबल्युपहारेष्टि
होममंत्रांजनादिभिः जयेदागंतुमुन्मादं यथाविधि शुचिर्भिषक् कृष्णामरिचसिंधूत्थमधुगोरोच
नाकृतं अंजनं सर्वदेवादिकृतोन्मादहरं परं कृष्णाद्यंजनं ऋक्षजंवूककलोमानि शल्लकील
सुनं तथा हिंगुमूत्रं च वस्तस्य धूपमस्य प्रयोजयेत् एतेन शाम्यति क्षिप्रं वलवानपि यो ग्रहः ऋक्ष
जंवूकलोमादिधूपः कल्याणकं प्रयुंजीत महत्पाचैतसं घृतं तैलं नारायणं वापि महानारायणं
तथा कृतेपि शापाद्येषु प्रतिकूलं नवाचरेत रोगिणं भिषजं यते कुर्याद्धन्युर्महौजसः इत्यु
न्मादाधिकारः अथापस्माराधिकारः तत्रापस्मारस्य निदानपूर्विकां संप्राप्तिमाह चिंताशो
कादिभिर्दोषाः क्रुद्धा हृत्स्रोतसि स्थिताः कृत्वा स्मृतेरपध्वंसमपस्मारं प्रकुर्वते हृत्स्रोतसि
मनोवहस्रोतसि तस्य संख्यामाह वातात्पित्तात्कफात्सर्वैर्दोषैः सः स्याच्चतुर्विधाः अथा
पस्मारस्य सामान्यलक्षणमाह तमःप्रवेशः संरंभो दोषोद्रेकहतस्मृतिः अपस्मार इति

लोहपात्रेक्षणंपचेत गुञ्जापंचमितंभक्ष्यमपस्मारहरंपरं हिंगुसौवर्चलंव्योषंनरमूत्रेणसर्पि
षा कर्षमात्रंपिबेच्चैव रसोयंभूतभैरवः भूतभैरवरसः वराहकर्णकल्केन कर्कोटीमूलपि
ष्टकं अथवानरमूत्रेणउन्मत्तस्यास्थिपेषितं श्वेतापराजितामूलंविजयावीजसंयुतं नस्य
त्रपिष्टंतत्रस्यादपस्मारहरंपरं शङ्खपुष्पिकामूलमारनालेनपेषितं अपस्मारहरंप्रोक्तं
भूतप्रेतादिकंपुनः तन्मूलंविल्वपत्रस्यरसैर्नस्येनियोजयेत देवभूतग्रहप्रेतांस्तथाभूतो
न्मादान्ज्वरान इत्यपस्माराधिकारः अथवातव्याध्यधिकारः तत्रवातव्याधीनांसामान्यतो
विप्रकृष्टंनिदानमाह कषायकटुतिक्तकप्रमितरूक्षलघ्वन्नतः पुरःपवनजागरप्रतर
णाभिघातश्रमैः हिमादनशनात्त्रयानिधुवनाच्चधातुक्षयान्मलादिहतधारणान्मदनशो
कचिंताभयैः अतिहतजमोक्षणाज्जदक्रुतातिर्मांसक्षयादतीवमनात्रणमतिविस्वना
दामतः पयोदसमयेदिनक्षणदयोस्ततीयांशयोर्जरामतिगतेऽशितिशिशिरसंज्ञकालेपि १७७

च देहेस्रोतांसि रिक्तानिपूरयित्वानिलोवली करोतिविविधान्रोगान्सर्वांगैकांगसंश्रयान प्रमितं अ
त्रैवपरीत्येप्रोयसर्गस्तेन अपरिमितपर्यः प्रकर्षेणमितमत्यल्पंवालध्वन्नं अतिपुराणंशाल्यादि
कतिचिदन्नानिनवान्यपिवातलानि यतआहगुणरत्नमालायां नीवारस्त्रिपुटःसतीनचणकः श्या
माकमुकुष्टकौनिष्पावाश्चमकुष्टकश्चवरटाभंगल्यकःकोद्रवः एतेवातकराइतिशेषः नीवारः
प्रसाधिकातिनीइतिलोके त्रिपुटःखेशारीइतिलोके सतीनःकलायःनिष्पावोराजमाषःवोडा
इतिलोकेमकुष्टकःमोठइतिलोकेवरटा वरटिकावरैइतिलोके मंगल्यकःमसूरीतिलोके
पुरःपवनःप्राग्वातःश्रमतःश्रमेनमार्गावगात यतउक्तं वायोर्ध्वविहतया क्रोधोमार्गस्याव
रणेनचेति पयोदसमयेवर्षासु जरामतिगतेऽशितेभुक्ते अन्नेविजीर्णतांप्राप्ते देहेस्रोतसांपा
दिनासंप्राप्तिरुक्ता कषायादिभिर्हेतुभिर्वर्षादिसमयेहेतुभूतेवली अनिलःप्रवृद्धोवायुःक
रोतिविविधान्रोगानतेरोगाःकथ्यंते शिरोग्रहोऽल्पकेज्ञात्वंजंभात्यर्थहनुग्रहः जिव्हास्तंभोगद

दृत्वंमिम्निनत्वंचमूकता वाचालताप्रलापश्चरसानामनभिज्ञता बाधिर्यकर्णनादश्चस्पर्शाज्ञ
त्वंतथार्दितं मन्यास्तंभोऽत्रगणितोवाक्शोषोपवाकुकः वर्णितात्रैवविश्वाचीऊर्ध्ववातउदी
रितः आध्मानंचप्रत्याध्मानंवातष्ठीलाप्रत्यष्ठीला तूनीचप्रतितूनीचवन्हिवैषम्यमेवच आ
क्षेपः पार्श्वशूलंचत्रिकशूलंतथैवच मुकुश्चमूत्रणमूत्रनिग्रहोमलोगाढता पुरीषस्याप्रवृ
त्तिश्चगृध्रसीचततःपरा कलायखंजताचापिखंजतापंगुतातथा क्रोष्टुशीर्षकस्तल्पोचवात
कंटकएवच पादहर्षः पाददाहः आक्षेपोदंडकाभिधः वातपित्तकृताक्षेपस्तथादंडापतान
कः अभिघातकृताक्षेपश्चायामोद्विविधस्मृतः आंतरश्चतथाबाह्योधनुर्वातश्चकुब्जकः
अपतंत्रोपतानश्चपक्षाघातोविलोंगकः कंपस्तंभोव्यथाभेदोभेदश्चस्फुरणंतथा रौक्ष्यंका
र्कश्यंचकार्ष्ण्यंचशोथंपलोम्नांचहर्षणं अंगमर्दोऽंगविभ्रंशःशिरासंकोचएवच अंगशोषश्च
भीरुत्वंमोहःचंचलचित्तता निद्रानाशःस्वेदनाशो~~ऽल्पपर्योर्दितं पश्चोदितमितिसैवकाल~~।

पिष्टेनपचेत् ब्राह्मीघृतं कूष्मांडकरसेसर्पिरष्टादशगुणेपचेत् यष्ट्याह्वकल्कंतत्स्या
नमपस्मारविनाशनं कूष्माण्डघृतं कोकीटमेषोविधिवदानीयरविवासरे करवेनजे॰
वासंधार्य्यजयेदुग्रामपस्मृतिं अयंतुकीटोनदीतीरेसिकतामध्येतिष्ठति शिग्रुकुष्ठकुला
जाजीलसुनव्योषहिंगुभिः वस्तमूत्रेसृतंतैलंनावनंस्यादपस्मृतौ जलंवालकम् अजा
जीजीरकः वस्तः छागः नावनंनस्यं मृतंसूताभ्रकंतीक्ष्णमारंताप्यंविषंसमं पद्मके
सरसंयुक्तंदिनैकंमर्दयेद्द्रवैः स्नुग्वन्हिविजयैरण्डवंध्यानिष्पावसूरणैः निर्गुण्ड्याश्च
वैर्मर्दितंफोलंयाचयेत्पुनः कंगुनीसर्षपोत्थेचतैले गंधकसंयुते यामंपक्त्वासमुद्धृत्य
चणकाभाचटीकृता इयंब्रह्मगुटीनामनस्येदार्द्रकद्रवैः दशमूलीकषायंतुकण
युक्तंपिबेदनु अपस्मारंनिहंत्याशुतमस्सूर्यउदियेयथा ब्रह्मवटीरसः मृतंसूतार्क
लोहंचतालंगंधंमनःशिला स्रोतोंजनंचतुल्यानिवस्तमूत्रेणपेषयेत् तफोलत्रिगुणंगंधं

भा॰ प्र॰ लक्षणमाह पीत्वैकंश्वासमनिलः पुनस्त्यजति वेगवान् आलस्यनिद्रायुक्तश्च स जृम्भ इति कथ्यते
१७९ जृम्भा स्त्रीत्रिलिंगः तथा च जृम्भस्तु त्रिषु जृम्भणमित्यमरः अथ तस्य चिकित्सा शुंठीपिप्पल्यूष
णंदीप्यकश्च सिंधूत्थं चेति सर्वं पृथग्वा तद्रूपं वा सूक्ष्मचूर्णीकृतं वा जृम्भाभंगस्तत्कृतः स्यान्नदैव
जृम्भावेगे समुत्पन्ने शीघ्रं नेत्रायनेन नरं स्वापयेत्तेन नियमात् जृम्भावेगः प्रशाम्यति जृम्भावेगः क्षयं
याति कटुतैलेन मर्दनात् भोजनात्स्वादुभोज्यानां तथा तांबूलभक्षणात् अथ हनुग्रहस्य सनि
दानं लक्षणमाह जिह्वानिर्लेखनाच्छुष्कभक्षणादभिघाततः कुपितो हनुमूलस्थः संस्रयित्वा
निलो हनू करोति विवृतास्यत्वमथवा संवृतास्यतां हनुग्रहः स तेन स्यात्कृच्छ्राच्चर्वणभाषणं
निर्लेखनं कर्षणं शुष्कचणकादिसंस्रयित्वा अधः कृत्वा विवृतास्यत्वं व्यावृतमुखत्वं संवृतास्य
तां दंतलग्नास्यतां अथ तस्य चिकित्सा संवृतं चिबुकं स्निग्धस्विन्नमुन्नमयेद्भिषक् विवृतं नम
यित्वा तु कुर्यात्स्थानस्थमिह क्रियां अत्र मुखं वलाद्विवृतं कृत्वा तु रेण वस्त्रवर्तिन्दत्वाच्छिरेयाघ्रायेत् १७९

यथा पुनर्न दन्तालग्नता स्यात् पिप्पलीमार्द्रकं चापि संचर्व्याच्च मुहुर्मुहुः निष्ठीवेत्तत्ततो येन सोधयेद्वद
नान्तरं निःकुष्ठलशुनं सम्यक्कंसतु घृततिलतैलवत् सैंधवं नान्वितं खादेद्धनुस्तंभार्दितो नरः रसोन
गुटिकामाषविदलं परिपेष्य च योजयेत्पिष्टिकां तां च सैंधवार्द्रकहिंगुभिः ततस्तु वटकान्कृत्वा
तिलतैले पयस्त्वग्नेः भक्षयेत्तान्यथा वह्निहनुस्तंभी सुखी भवेत् अभ्यज्य पक्वतैलेन स्वेदयेन्मृदु
नाग्निना वस्तिं विधारयेन्मूर्ध्नि तैलेन परिपूरितं समूलपत्रशाखायाः प्रसारण्याः शतं पलं सम्य
क्संकुच्य शालिले द्रोणमात्रे पचेद्भिषक् सलिलस्य चतुर्थांशं कषायमवशेषयेत् ततः पलशते तै
लेतं कषायं पुनः पचेत् पचेत्पलशतं मस्तुकांजिकं मस्तुनासमं ततः शुद्धं पचेदर्धं गव्यं तैलाच्च
तुर्गुणं चित्रकं पिप्पलीमूलं मधुकं सैंधवं वचा शतपुष्पा देवदारु रास्नां च गजपिप्पली प्रसारि
णी नवं मूलं मासीरक्तं च चंदनं तथा वातारिमूलं च वलामूलं च नागरं तैलस्याष्टमांशेन सर्वं
कल्कानि साधयेत् नाम्ना प्रसारिणीतैलं विख्यातं तत्प्रयुज्यते पानेनस्ये शिरोवस्तौ मर्दनेस्वेद

मा॰प्र॰ नेतथा प्रयुक्तं वातजान्रोगान्सर्वानपि विनाशयेत् विशेषतो हनुस्तंभं जिह्वास्तंभं तथार्दितं गृध्रसींचा
१८० विश्वाचीमन्यास्तंभायवाकुके त्रिकशूलं गृध्रसीं च खंजतां पंगुतां तथा कलायखंजतां खल्लीस्तंभं संकोच
मेव च आंतर्बाह्यमायामं तथा दंडापतानकं धनुर्वातं च कुब्जं च व्यपोहति न संशयः क्षीणानां स्थवि
राणां च वातसंकोचितात्मनां प्रसारयत्यंगानि तस्मादेषा प्रसारिणी प्रसारिणीतैलं अथ जिह्वास्त
भस्य लक्षणमाह वाग्वाहिनीशिरासंस्थो जिह्वास्तंभयतेऽनिलः जिह्वास्तंभः स तेनान्नपानवाक्येष्व
नीशता अनीशताऽसामर्थ्यं अथ तस्य चिकित्सा जिह्वास्तंभे यथावस्थं वातव्याधिचिकित्सितं
सामान्योक्ता क्रिया चात्रार्दितस्यापि हिता मता अथ मूकमिन्मिनगद्गदानां लक्षणमाह आवृत्य वा
युः सकफो धमनीः शब्दवाहिनीः नरान्करोत्यवचनान्मूकमिन्मिनगद्गदान् अवचनान् अत्रैष
दर्थेन तेन ईषद्वचनान् स एव वायुः प्रबलश्चेत्तदा मूकान् अवचनात् मिन्मिनात् सानुनासिक
वचनान् गद्गदान् लुप्तपदव्यंजनाभिधायिनः करोतीत्यन्वयः एषां समानकारणत्वेपि दुष्टेरु १८०

बलहानिस्तथैव च शुक्रक्षयो रजोनाशो गर्भनाशः परिश्रमः एत एवाशीतिसंख्या रोगा योगेनत्र हि
तिः वातव्याधीति नामानो मुनिभिः परिकीर्तिताः एत एव शिरोग्रहादय एव योगेन वातेन चातो व्या
धिर्वातव्याधिरिति निरुक्तिः तदा वातज्वरादिष्वपि प्रसंगः स्यादत आह रूढितः प्रसिद्धितः शिरो
ग्रहादयोऽशीतिरेव वातव्याधिसंज्ञाप्रसिद्धा न तु वातज्वरादयः अथ वातव्याधीनां सामान्यचि
कित्सामाह मधुरलवणाम्लस्निग्धनस्योष्णान्नगुरुरविकरवस्तिस्वेदसंतर्पणानि दहनज
लदशोषाभ्यंगसंमर्दनानि भ्रप्रकुपितपवमानं शांतमेतानि कुर्युः अथ विशिष्टानां वातव्याधी(
नां लक्षणानि चिकित्सां चाह तत्रादौ शिरोग्रहस्य लक्षणमाह रक्तमाश्रित्य पवनः कुप्यन्मूर्द्ध
धराः शिराः रूक्षाः सवेदनाः कृष्णाः सोऽसाध्यः स्याच्छिरोग्रहः मूर्द्धधरा ग्रीवागताः स पवनः शि
रोग्रहः स्यादित्यन्वयः स चासाध्यः अथ तस्य चिकित्सा शिरोग्रहे तु कर्त्तव्या शिरागतमरुत्क्रि
यादशमूलीकषायेण मातुलुंगरसेन च शृतेन तैलेनाभ्यंगः शिरोवस्तिश्च युज्यते अथ अर्दितमाया

मा·प्र· सङ्गायन्नजानातिरसाज्ञानंतदुच्यते अथरसाज्ञानस्यचिकित्सा चूर्णैःशुंठिकाजंबोसिंधूत्थषणैः साम्लवेत
१८१ सैः अम्लवेतसकामाक्षेचुकंदातव्यमीरितं किराततिक्तकःकटुकीकुटजस्यफलंत्वचं ब्राह्मीफलंवचापाठा
शंगाजिकाकृष्णजीरकं पिप्पलीपिप्पलीमूलंचित्रंनागरमूषणं एषांकल्केर्मुखंघर्षेच्छुंठिकामार्द्रकजै
रसैः तेनसम्यग्विजानातिरसनासकलान्रसान् कल्कःकिराततिक्तादिर्जिह्वायाःशून्यतांहरेत्
बाधिर्यकर्णनादयोर्लक्षणंचिकित्साचकर्णरोगाधिकारेवक्ष्यामः त्वक्शून्यतायालक्षणमाह स्प
र्शमानात्वचायातुज्ञातोष्णंमृदुकर्कशंनजानातिवुधैस्त्वक्साशून्येतिपरिकीर्तिता अथतस्याचि
कित्सा मुखवातेत्वस्रस्तोक्षंकारयेद्रुशोनिषक् दिह्याच्चलवणागारधूमैस्तैलसमन्वितैः अथा
र्दितस्यसंप्राप्तिपूर्वकंलक्षणमाह उच्चैर्व्याहरतोत्यर्थंखादतःकठिनानिच हसतोजृंभतोभारात्विषमाच्छ
यनाशनात् शिरोनासौष्ठचिवुकललाटेक्षणसंधिगः अर्दयत्यनिलोवक्त्रमर्दितंजनयेततः वक्रीभ
वतिवक्त्रार्धंग्रीवाचाप्यपवर्तते शिरश्चलतिवाक्संगोनेत्रादीनांचवैकृतंग्रीवाचिवुकदंतानांतस्मि १८१

न्पार्श्वेचवेदनातमर्दितमितिप्राहुर्व्याधिंव्याधिविशारदाः व्याहरतःवदतःकठिनानिपूगफलादीनिविष
माच्छयनाशनात् ग्रीवादिवैपरीत्येनशयनादशनाच्चार्दयतिपीडयतिततः तदनंतरंअर्दितंजनये
त् अर्दितेजातेकिंस्यात्तदाह वक्रीभवतीत्यादिअपवर्तते वक्रीभवतिचलतिकंपतेवाक्संगः वा
ग्निरोधःनेत्रादीनामित्यादिशब्देनभ्रूगंडनासिकादीनांग्रहणंवैकृतं वेदनास्फुरणवक्रत्वादिग्रीवेत्या
दी यस्मिन्पार्श्वेर्दितंतस्मिन्पार्श्वेग्रीवादीनांवेदना वातात्पित्तात्कफाच्चस्यात्त्रिविधंतत्समासतः ला(
लास्रवोव्यथाकंपःस्फुरणंहनुवाक्ग्रहःवोष्ठयोःश्वयथुःशूलंस्यादितिवातजेभवेत् पीतमास्यंज्वरः
तृष्णापित्तजेमोहधूपने गंडेशिरसिमन्यायांशोथस्तंभः कफात्मके तस्यासाध्यस्यलक्षणमाहक्षी
णस्यानिमिषाक्षस्यप्रसक्ताव्यक्तभाषिणः नसिध्यत्यर्दितंगाढंत्रिवर्षंवेपनस्यच अनिमिषाक्ष
स्यानिमेषासमर्थचक्षुषःप्रसक्तंप्रकर्षेणलग्नं अव्यक्तंचभाषितुंशीलंयस्यतस्यअर्दितंनसिध्यति
त्रिवर्षंत्रीतवर्षत्रयं अथवात्रयाणांचतुर्णासामुखानांवर्षः स्रावोयत्रतत् वेपनस्य कंपनशी

लस्यच गाढमतिशयेननसिध्यतीत्यन्वयः अथतस्यचिकित्सा स्नेहपानानिनस्यंचभोज्यान्यनिलहंति
च उपनाहश्चससस्नेहंस्वेदनंवस्तयोऽर्दितं वस्तिस्त्रिशिरोवस्तिरेव दशमूलीकषायेणमातुलुंगरसेनवा
बलापंचमूल्यावाक्षीरंवातात्मकेहितं पिष्टंमाषस्कृतंजग्ध्वानवनीतेनसोऽर्दिती क्षीरमांसरसैर्भुक्त्वा
दशमूलीरसंपिबेत् अर्दितेपित्तजेशीतान्स्नेहांश्चैवविनिर्दिशेत् घृतवीस्विप्रसेकंचक्षीरसेकंतथै
वच शिलीभूतानतोमूकोदाहवान्योऽर्दितोभवेत् कुर्य्यात्प्रतिक्रियांतस्यवातपित्तविनाशिनीम्
श्लेष्मभागोत्थयंनीतेवंहणैःसमुपाचरेत् अर्दितेसोथसंयुक्तेवमनंचप्रशस्यते रसोनकल्कंतिल
तैलमिश्रंखादेन्नरोऽयोऽर्दितरोगयुक्तः तस्यार्दितंनाशमुपैतिशीघ्रंवृंदंधनानामिववायुवेगात् अथम
न्यास्तंभस्यनिदानपूर्वकंलक्षणमाह दिवास्वप्नासनस्थानविकृतोपनिरीक्षणैः मन्यास्तंभंप्रकुरु
तेसएवश्लेष्मणावृतः आसनस्थानविकृतोपनिरीक्षणैः आसनेनस्थानेनवातिशयितेनविकृतंयी
वादिविकृतंयथास्यादेवं उपसमीपस्यपयत्निरीक्षणंतेन सएवकुपितोवातःश्लेष्मणावृतः मन्या १८२

त्कर्षादिना अदृष्टवशाद्भेदोवोक्तव्यः अथतेषांचिकित्सा प्रस्थंघृतस्यपलिकैःशिग्रुवचालवण
धातकीलोध्रैः आजेपयसिसपाद्वैःसिद्धंसारस्वतंनाम्नाविधिवत्प्रयुज्यमानंजडगद्गदमूकतांक्षणाजि
त्वा स्मृतिमतिमेधाःप्रतिभाःकुर्य्यात्स्पष्टवाग्भवतिसारस्वतंघृतं सहरिद्रावचाकुष्ठंपिप्पलीवि
श्वभेषजं अजाजीवाजमोदाचयष्टीमधुकसैंधवं एतानिसमभागानिसूक्ष्मचूर्णानिकारयेत्
तच्चूर्णंसर्पिषालीढंप्रत्यहंभक्षयेन्नरः एकविंशतिरात्रेणभवेच्छ्रुतिधरोनरः मेघदुंदुभिनिर्घोषोम
त्तकोकिलनिस्वनः जडगद्गदमूकत्वंलेहःकल्याणकोजयेत् कल्याणकावलेहः अथप्रलाप
स्यलक्षणमाह सहेतुकुपिताद्वातादसंबद्धं निरर्थकंवचनंयन्नरोब्रूतेसप्रलापःप्रकीर्तितः अथ
तस्यचिकित्सा सतगरवरतिक्तारेवताम्भोदतिक्तानलदतुरगगंधाभारतीहारहूरा मलयजदश
मूलीशंखपुष्पःसुपक्वःप्रलपनमपहन्युःपानतोनातिदूरात् वरतिक्तोत्रपर्पटः नलदंउशीरं भा
रतीब्राह्मीहारहूराद्राक्षा अथरसायनस्यलक्षणमाह भुंजानस्यनरस्यान्नंमधुरमप्यतीवसान्द्र

गोकंटकंटुकाजटाकपिकच्छुतोयैः कार्याशका स्थिशाणवीजकुलत्थकोलक्काथेनवस्तपिशितस्य
रसेनचापिसुस्नासमागधिकयाशतपुष्पयाचसैरंडमूलकपुनर्नवयाशरणपाराम्नाबलामृतलताक
टुकैर्विपक्कमाषारव्यमेतदपबाहुकहरंहितैलं माषतैलं अथविश्वाचीलक्षणमाह तलंप्रत्यंगुली
नांयाकंडराबाहुपृष्ठतः बाह्वोःकर्मक्षयकरीविश्वाचीचेहसोच्यते कंडरामहास्नायुः तलंह(
स्तस्यउपरिभागंतलशब्देनोपरिवचनः यथान्नतमितितेनायमर्थः बाह्वोःपृष्ठंबाहुपृष्ठतः
बाहुपृष्ठंतदारभ्यतलंप्रति हस्ततलंयावत् अंगुलीनांयाकंडराबाह्वोःप्रसारणाकुंचनादि
कर्मक्षयकरीभवति साइहवातव्याधिषुविश्वाचीत्युच्यते बाह्वोरितिद्वित्वंसंभवपरं एक
स्मिन्नपिबाहौविश्वाचीभवति अथतस्यचिकित्सा दशमूलीबलामाषक्काथंतैलाज्यमि(
श्रितं सायंभुक्त्वापिबेन्नस्यंविश्वाच्यामपबाहुके माषसिंधुबलारास्नादशमूलकहिंगुभिः
वचाशतजटाख्याभिःसिद्धंतैलंसनागरं ऊर्ध्वभक्ताशना दत्याद्बाहुशोषापबाहुकौ विश्वा १८३

चीमुक्तांवापिपक्वाधातंतथार्दितं माषादितैलं अथोर्ध्ववातस्यलक्षणमाह अधःप्रतिहतोवायुश्ले
ष्मणामारुतेनच करोत्युद्गारबाहुल्यमूर्ध्ववातःसउच्यते वायुःसमानवायुःमारुतेन अपानवा
युनास्वहेतुदुष्टेनअधःप्रतिहतः अधोनिरुद्धः तस्यचिकित्सा भागाद्दशविश्वायास्तत्तुल्योद(
वदारुकस्यापि पथ्यात्रयंपंचभागाश्चतुरंशंहिंगुसंभृष्टं एकःसैंधवभागस्तत्तुल्यंचित्रकंचात्र
संस्कृष्टमूर्ध्ववातंहंतेतच्चूर्णितंभुक्तं अथदेवदारुकालानेत्रिरन्मूलंग्राह्यं अथाध्मानस्यल(
क्षणमाह साटोपमत्युग्ररुजमाध्मातमुदरंभृशं आध्मानमितितंजानीयात्घोरंवातनिरोधजं (
अटोपोगुडगुडाशब्दः भृशमाध्मातंवातपूर्णमस्त्रावत्वातनिरोधजं अधोवातनिरोधजातं अ
थतस्यचिकित्सा आध्मानेलंघनेपूर्वंदीपनंपाचनंततः फलवर्तिक्रियांकुर्याद्वस्तिकर्मविशो
धनं कर्षमात्रान्भवेत्कृष्णात्रिवृतास्यात्पलोन्मिता खंडादपिपलंग्राह्यंचूर्णमेकत्रकारयेत् म
धुनाक्षमितंलिह्याच्चूर्णमाध्माननाशनं नारायणंचूर्णं दारुहैमवतीकुष्ठशताह्वाहिंगुसैंधवैः

लिंपेत्कोष्णैरम्लपिष्टैः शूलाध्मानयुतोदरं हैमवतीवचा दारुषड्कलेपः अभयारग्वधोधात्रीदंती
तिक्तास्नुहीत्रिवृत् मुस्ताप्रत्येकमेतानिग्राह्यानिपलमात्रया तानिसंक्षुद्यसर्वाणिजलाढकयुगे
पचेत् तत्रतोयेष्टमंभागंकषायमवशेषयेत् निस्तुषैर्नेपालवीजानिनवानिपलमात्रया तानुव
स्त्रधृतान्येवतस्मिन्क्वाथेशनैः पचेत् ज्वालयेदनलंमंदंयावत्क्वाथोघनोभवेत् ततः खल्वेक्षि
पेद्भागान्दशजेपालवीजतः भागांस्त्रीन्नागराद्वौचमरिचाद्वौचपारदात् गंधकाद्वौचतानीहया
वधाम्लविमर्द्दयेत् रसोनाराचनामायंभक्षितोरक्तिकामितः जलेनशीतलेनैवरोगानेतान्विनाश
येत् आध्मानंशूलमानाहंप्रत्याध्मानंतथैवच उदावर्त्तंतथागुल्मंउदराणिहरत्यसौ वेगेशांते
चभुंजीतसर्करासहितंदधि ततस्तक्रसैंधवेनापिततोदध्योदनंमनाक् महानाराचोरसः अथप्र
त्याध्मानस्यलक्षणमाह विमुक्तपार्श्वहृदयंतदेवामाशयोत्थितं प्रत्यध्मानंविजानीयात्कफ
व्याकुलतानिलं विमुक्तपार्श्वहृदयंपार्श्वहृदयंविहायजातं तदेवाध्मानंकफव्याकुलतानिलंक

स्तंभंग्रीवायाः पश्चाद्भागेचतुर्दशशिरामन्यासंज्ञाः तथाचामरसिंहः पश्चाद्ग्रीवाशिरामन्याःवासांस्तंभंक
रोति अथतस्यचिकित्सा दशमूलीकृतंक्वाथंपंचमूल्यापिकल्पितं रूक्षंस्वेदंतथानस्यंमन्यास्तंभे
प्रयोजयेत् तैलेनाज्येनवाग्रीवामभ्यज्यार्कदलैरथ एरंडपत्रैर्वाछाद्यस्वेदयेद्दकृशोभिषक् अथवा
वाहुशोषस्यलक्षणमाह अंसदेशस्थितोवायुःशोषयेदंसबंधनं अंसबंधनशोषात्स्याद्वाहुशोषः
सवेदनः अथतस्यचिकित्सा वाहुसोषेपिवेद्भुक्त्वासर्पिःकल्याणकंमहत् वलामूलस्यतंतोयं(
सैंधवेनसमन्वितं वाहुशोषकरैर्वातैर्मन्यास्तंभेचशस्यते अथापवाहुकस्यलक्षणमाह शिराःसं
कोच्यवाहुस्थःसकुर्य्यादपवाहुकं सवायुःशिराःवाहुशिरः तस्यचिकित्सा परमौषधमपवाहुक
मन्यास्तंभोर्ध्वजत्रुगतरोगे शीतजलेननस्यंतदुपसमेजिंगिनीत्वपुरः मूलंवलायास्त्वथपारिभद्रस्तथा
त्मगुप्तास्वरसंपिवेद्वा भुंजीतशोमाषरसेननस्यंभवेद्दसोवज्रसमानवाहुः वलायामूलकंकल्की
कृतंपिवेत्तथापारिभद्र मूलंचपारिभद्रोत्रस्फरहदवातहरत्वात् माषात्शीयवकुरंटककंटकारी

नीलक्षणमाह अधोयावेदनायाति वर्चोमूत्राशयोत्थिता भिंदंतीवगुदोपस्थंसातूनीनामतोमता
उपस्थंशिश्नंभगंच अथप्रतितूनीलक्षणमाह गुदोपस्थोत्थितासैवप्रतिलोमंविधाविता वेगैः
पक्वाशयंयातिप्रतितूनीतिसोच्यते अधस्तात्स्थितोर्ध्वगामिनीवेदनावेगैर्मुहुर्मुहुः स्वभावो(
पसामल्लहितैःपापनेनभिंदंतीत्यतिदिश्यतेसानामतः प्रतितूनीसैववेदना तयोश्चिकित्सा
तूर्न्यांचप्रतितूर्न्यांचप्रसस्ताःस्नेहवस्तयः पिबेद्वास्नेहलवणंपिप्पल्यादिमयांबुना उष्णेनवा
क्षारंप्रगाढमथवाघृतं अथत्रिकशूलस्यलक्षणमाह स्फिगस्थ्नोःपृष्ठवंशास्थ्नोर्यःसंधिस्त
त्रिकंस्मृतं तत्रवातेनयापीडात्रिकशूलंतदुच्यते अथतस्यचिकित्सा कारयेद्वालुकास्वेदंत्रि
कशूलीप्रपन्नतः पादाधस्तात्करीषाग्निंधारयेत्सततंनरः आभास्वगंधाहबुषागुडूचीशतावा(
री गोक्षुरकश्चरास्ना शूपामाशताह्वाचसयवानीसनागरश्चेतिसमंविचूर्ण्य सर्वैःसमंगुगु
लमत्रदद्यात्स्तियेदिहाज्यंचतदर्धभागं तन्नक्षयेदर्धपिचुप्रमाणंप्रभातकालेसुरयाथयूषैः मद्ये

नवाकोष्णजलेनवाथक्षीरेणवामांसरसेनचापि त्रिकग्रहेजानुग्रहेचवातेभुनस्थेचरणास्थि
केच संधिस्थितेचास्थिगतेचतस्मिन्मज्जास्थितेस्नायुगते वकोष्टे रोगान्हरेद्वातकफानुविद्धानवा
तेरितान्हृदयग्रहयोनिदोषान् भग्नास्थिविद्धेषुचपंगुतायांसगृध्रकेसीखलुपक्षघाते महौषधंगु
गुलमेनमाहुस्त्रयोदशांगंभिषजःपुराणाः आभावचूर्णंतथाच आभावधूलपर्यायःकथितः
कोविदैरिहेति त्रयोदशांगोगुग्गुलः अथवातबस्तिवातस्यलक्षणमाह मारुतेविगुणेवस्तौमूत्रं
सम्यक्प्रवर्तते विकाराविविधाश्चापितस्मिन्कुच्छ्रेणवंतिहि अविगुणे अनुलोमेविकाराविं
विधाः मुहुर्मूत्रमूत्राग्रहादयः अथतस्यचिकित्सा बलामूलत्वचश्चूर्णंससितंकर्षसंमितं
पिबेत्कुडवदुग्धेनमुहुर्मूत्रस्यशांतये पथ्याविभीतधात्रीणांचूर्णंचूर्णंमृतायसः मधुनासह
संलीढंमूहुर्मूत्रनाशंतिकृत यवक्षारस्यचूर्णंतुसंयोज्यंसितयासह भक्षयेन्नियतंतस्यप्र
शाम्येन्मूत्रनिग्रहः कूष्मांडस्यतु बीजानिपीडानित्रपुसस्यच वस्तौसंधारयेतेनप्रशाम्येन्मू

भा॰प्र॰
१९६

त्रनिग्रहः आमलक्याश्च कल्केन वस्तिभागं प्रलेपयेत् तेन प्रशाम्यति क्षिप्रं निपमान्मूत्रनिग्रहः
मेहनस्याथयोनेर्वा मुखस्याभ्यंतरे शनैः धनसारयुतां वर्तिं धारयेन्मूत्रनिग्रहे अथ गृध्रसीलक्षण
माह स्फिक्पूर्वाकटिपृष्ठोरुजानुजंघापदं क्रमात् गृध्रसीस्तंभरुक्तोदैर्गृह्णातिस्पंदते मुहुः वा
ताद्वातकफाभ्यां सा विज्ञेया द्विविधा पुनः वातजायां भवेत्तोदो देहस्यातीव वक्रता जानुजंघोरुसंधी
नां स्फुरणं स्तंभता भृशं वातश्लेष्मोद्भवायां तु गौरवं वह्निमार्दवं तंद्रामुखप्रसेकश्च भक्तद्वेषस्तथै
व च गृध्रसी वातात् केवलात् स्फिगादि पदपर्यंतं स्तंभरुक्तोदैर्गृह्णातिक्रमात् व्यक्तिक्रमात् ते
न यथा यथा वर्द्धते तथा स्फिगादीन्याक्रमति नात्र ग्रहणे निर्देशात् क्रमनियमः तथा मुहुः स्पंदते
स्फिगादिषु शिराकंपं करोतीत्यर्थः अथ तस्य चिकित्सा गृध्रस्यातुरं नरं सम्युक्रेकेन वमनेन
वा ज्ञात्वा निरामं दीप्ताग्निं वस्तिभिः समुपाचरेत् नादौ वस्तिविधिं कुर्यात् यावदूर्ध्वं न शुध्यति स्ने
हो निरर्थकः सस्यात् भस्मन्येव हुतो यथा तैलमेरंडजं प्रातर्गोमूत्रेण पिबेन्नरः मासमेकं प्रयोगोयं १९६

फेनाववद्धवातं अथ तस्य चिकित्सा प्रत्याध्मानं समुत्पन्ने कुर्याद्वमनलंघने दीपनादीनि युंजीत पू
र्ववद्वस्तिकर्म च अथ वाताष्ठीलालक्षणमाह नाभेरधस्तात्संजातः संचारी यदि वाचलः अष्ठीलाव
द्घनो ग्रंथिरूर्द्ध्वमायत उन्नतः वाताष्ठीलां विजानीयाद्बहिर्मार्गनिरोधिनीं अष्ठिलो वर्तुलः पाषा
णखंडः आयतः तदीर्घः वातादष्ठीला वाताष्ठीलेति स्वरूपपरं न तु विशेषपरं व्यावर्त्तकाभावात् बा
हिर्मार्गनिरोधिनीं विण्मूत्रगुदनिरोधिनीं तेन मूत्रमलावरोधः सूचितः अथ प्रत्यष्ठीलालक्षण
माह एतामेव रुजायुक्तां वातविण्मूत्ररोधिनीं प्रत्यष्ठीलामिति वदेज्जठरे तिर्यगुत्थितां एतामेव अ
ष्ठीलामेव जठरे तिर्यगुत्थितां इति भेदः अथ तयोश्चिकित्सा अष्ठीलयोः क्रिया कार्या गुल्मस्यांतर
विद्रधेः चूर्णं हिंग्वादिकं चात्र पिबेदुष्णेन वारिणा हिंग्वादिचूर्णं यथा हिंगुग्रंथिकधान्यजीर
कवचाचव्याग्निपाठाशटीवृक्षाम्ललवणत्रयं त्रिकटुकक्षारद्वयं दाडिमं पथ्या पौष्करवेतसा
म्लहवुषाजमोदस्तदेभिः कृतं चूर्णं भावितमेतदार्द्रकरसैः स्याद्बीजपूरकरवैः हिंग्वादिचूर्णं अथत

भा॰प्र॰ लुः रास्नामृतारग्वधदेवदारुत्रिकंटकैरंडपुनर्नवानां क्वाथपिबेन्नागरचूर्णमिश्रंजंघोरुपृष्ठत्रि
१८७ कपार्श्वशूली रास्नासप्तकः क्वाथः पथ्याविभीतामलकीफलानां त्र्यंशंक्रमेण द्विगुणंनिवृद्धं प्र
स्थेनयुक्तंचपलंकषायाः द्रोणेजलेसंस्थितमेकरात्रं अर्द्धविशेषंक्वथितंकषायंभांडेपचेत्तत्पुन
रेवलोहे अमृतनिवक्रेखतार्यदद्यात्प्रयाणिसंचूर्ण्यपलार्द्धकानि विडंगदंतीत्रिफलागुडू
चीकुल्यत्रिवृन्नागरकोषणानि यथेष्टचेष्टस्यनरस्यशीघ्रंहिमांबुया[illegible]कानि निषे
व्यमानोविनिहंतिरोगान्स्वगध्रसीनूतनखंजतांच प्लीहानमुग्रंजठराणिगुल्मंपांडुत्वकंडूवमिवा
तरक्तं पथ्यादिकोगुग्गुलुरेषनाम्नाख्यातः क्षितावप्रमितप्रभावः बलेननागेसमंमनुष्यंपवे
नकुर्यात्तुरगेनतुल्यं आयुःप्रकर्षंविदधातिचक्षुर्वलंतथायुष्टिकरोविषघ्नः ततस्यसंधान
करोविशेषात्रोगेषुशस्तःसकलेषुतज्ज्ञैः पथ्यादिगुग्गुलुः अथखंजस्यपंगोश्चलक्षणमाह
वायुःकट्याश्रितःसक्थ्नःकंडरामाक्षिपेद्यदा खंजस्तदाभवेज्जंतुःपंगुःसक्थ्नोर्द्वयोर्वधात् स १८७

क्थ्नःकट्यादिगुल्फांतस्यकंडरांमहास्नायुं आक्षिपेत् गमनादौकंपयेतवधात् गमनादिक्रियाघाता
त् अथतयोश्चिकित्सा उपाचरेदभिनवंखंजंपंगुमथापिवा विरेकास्थापनस्वेदगुग्गुलुस्नेहवस्तिभिः
अथकलायखंजस्यलक्षणमाह कंपतेगमनारंभेखंजन्निवचलक्ष्यते कलायखंजंतंविद्यान्मुक्त
संधिप्रवंधनं गमनारंभेकंपतेएतस्यखंजाद्यमेवभेदःकलायखंजइतिशास्त्रेरूढसंज्ञानतुयो
गिको अथतस्यचिकित्सा क्रमःकलायखंजस्यखंजपंग्वोरिवस्मृतः विशेषात्स्नेहनंकर्मकार्य
मत्रविचक्षणैः अथक्रोष्टुशीर्षस्यलक्षणमाह वातशोणितजःशोथोजानुमध्येमहारुजः ज्ञेयःक्रो
ष्टुकशीर्षस्तुस्थूलःक्रोष्टुकशीर्षवत् क्रोष्टुःशृगालः अथतस्यचिकित्सा गुग्गुलुंक्रोष्टुशीर्षेतु
गुडूचीत्रिफलांभसाक्षीरेणैरंडतैलंवापिबेद्वावृद्धदारकंगुग्गुलुंशुद्धंकर्षमितंगुडूचीत्रिफलांभ
गुडूचीपथ्याविभीतामलकैःसमुदितैःअष्टुःकर्षमितैःपक्वेनक्वाथेनोष्णेनपलद्वयमितेनपि
बेत् एरंडतैलंकर्षमितंक्षीरेणगव्येनपलपरिमितेनपिबेत् वृद्धदारकचूर्णंचदुग्धेनगव्येनप

भा·प्र·
१८८ त्वचतुष्टयेनपिबेत् रसैस्तित्तिरमांसस्यपत्रैर्गुग्गुलुसंयुतैः वातरक्तक्रियामिश्रंजयेज्जम्बुकमस्त
कं अथखल्लीलक्षणमाह खल्लीतुपादजंघोरुकामूलावमोटिनी अवमोटिनीपरिवर्तनशीला
अथतस्यचिकित्सा कुष्ठसैंधवयोःकल्कश्चुक्रतैलसमन्वितः सुखोष्णोमर्दनेयोज्यः खल्लीशू
लनिवारणः अथवातकंटकस्यलक्षणमाह रुक्पादेविषमेन्यस्तेश्रमाद्वाजायतेयदा वाते
नगुल्फमाश्रित्यतमाहुर्वातकंटकं अथतस्यचिकित्सा रक्तावसेचनंकुर्यादभीक्ष्णंवातकं
टके पिबेदेरंडतैलंवादहेत्सूचीभिरेवच अभीक्ष्णंपुनःपुनः अथपाददाहस्यलक्षणमाह
पादयोःकुरुतेदाहंपित्तासृक्सहितोनिलः विशेषतश्चंक्रमणात्पाददाहंतमादिशेत विशेषत(
श्चंक्रमतश्चलनेनस्थितस्यमंदोदाहइति अथतस्यचिकित्सा वातरक्तक्रमंकुर्यात्पाददाहो
पशांतये मसूरविदलैःपिष्टैःघृतश्रीतेनवारिणा चरणौलेपयेत्सम्यक्पाददाहप्रशांतये न(
वनीतेनसंलिप्तौवह्निनापरितापितौ मुच्यतेचरणौक्षिप्रंपरितापात्सुदारुणात् अथपादहर्षस्य(१८८

गृध्रस्यातुरहापहः पलमात्रश्चित्रकबीजचूर्णंवस्त्रेणशोधितम् तुल्येनकटुतैलेनयद्दत्वाविमर्द(
येत् दिनत्रयप्रयोगेणगृध्रसीनाशयेद्ध्रुवम् तैलंघृतंसार्द्रकमातुलुंगरसंसचुक्रंसगुडंपिबेद्वा क
ट्यूरुपृष्ठत्रिकशूलगुल्मगृध्रस्युदावर्तहरःप्रयोगः निःकुलस्यैरंडबीजानिपिष्ट्वाक्षीरेणपाचयेत्
तत्पायसंकटीशूलेगृध्रस्यांपरमौषधम् एरंडमूलंबिल्वंचबृहतीकंटकारिका कषायोरुच(
कोपेतःपीतोवंक्षणवस्तिजं गृध्रसीजंहरेच्छूलंचिरकालानुबंधिच रुचकंसोवर्चलंगोमूत्रैरं
डतैलाभ्यांकृत्वाचूर्णंपिबेन्नरः दीर्घकालोत्थितांहंतिगृध्रसींकफवातजां सिंहास्यदंतीकृत(
मालकानांपिबेत्कषायंरुबुतैलमिश्रं योगृध्रसीनष्टगतिःप्रसुप्तस्तश्चाग्रगःस्यादिहकिमत्रचित्रं
बृहन्निंबतरोस्सारोवारिणा परिपेषितः सपीतोनाशयेत्क्षिप्रमसाध्यामपिगृध्रसीं शेफालिका
दलैःक्वाथोमृद्वग्निपरिपाचितः दुर्वारंगृध्रसीरोगंपीतमात्रःप्रणाशयेत् शेफालिकानिर्गुंडी
रास्नापाः सुपलचैकंपंचकर्षाणिगुग्गुलोः सर्पिषावटिकांकृत्वानश्येदृध्रसीहरी रास्नागुग्गु

भा·प्र· दंडकाख्यः सोनुपक्रमः स्वस्वभावाद्देवासाध्यः अत्रच मुकुर्मुकुराक्षेपणं वोधव्यं श्लेष्मान्वितस्य लक्षणमा
१८७ ह कफान्वितोपध्ववायुर्धमनीष्वेव तिष्ठति सदंडवत्स्तंभयति कृच्छ्रो दंडायतानकः सत्राक्षेपको दंडापा(
तानकाख्यः सकृच्छ्रः कष्टसाध्यः अत्रच मुकुर्मुरक्षेपणं वोधव्यम् आगंतुजाक्षेपस्य लक्षणं सामान्य
मेववोधव्यं अथ तस्य चिकित्सा वलामूलकषायस्य दशमूलीशृतस्य च पंचकोलकुलत्थानां का(
थस्य पयसस्तथा अष्टावष्टोस्मता भागाः तैलादेकस्तदेकतः पचेदावाप्य मधुरं गणं सैंधवसंयुतं
तथागुरुं सर्जरसं सुरलं देवदारुच मंजिष्ठां पद्मकं कुष्ठमेलां कालांचसारिवां मांसीं शैलेयकं पत्रं
तगरं सारिवां वचां शतावरीमश्वगंधां शतपुष्पां पुनर्नवां तत्साधु सिद्धं सौवर्णे राजते मृन्मयेपि वा
प्रक्षिप्य कलशे सम्यक् स्वानुगुप्तं निधापयेत् एतन्महावलातैलं प्रयुक्तमविलंवितं सर्वानाक्षेप(
कादींस्तु वातव्याधीव्यपोहति हिक्काश्वासमधीमंथं गुल्मं कासं सुदुस्तरं षण्मासादुपयुक्तं तदंत्रवृद्धिं
चनाशयेत् यथावलमतंमात्रां सूतिकायै प्रदापयेत् याचगर्भार्थिनीनारी क्षीणशुक्रश्च यः पु(१८७

मान् क्षीणवाते मर्महते मथिते भिन्नहते तथा । भग्नेश्रमातिपन्ने च सर्वथैते तथा युज्यते एतद्धिराज्ञाक
र्तव्यं कर्त्तव्यं राजपूजितैः सुखिभिः सुकुमारैश्च धनिभिर्मानवैः सदा एकत्र आवाप्य प्रक्षिप्य इति महा
वलातैलं अथांतरायामस्य लक्षणमाह अंगुली गुल्फ जठर हृद्वक्षोगलसंस्थितः स्नायुप्रतान
मनिलस्तदाक्षिपति वेगवान् विष्टब्धाक्षस्तब्धहनुर्भग्नपार्श्वः कफं वमन् अभ्यंतरेधनुषवत्तदा
नमति मानवः यदासोभ्यंतरायामं कुरुते मारुतो वली यदास वलीमारुतोभ्यंतरायामं कुरुते
तदांगुल्यादिसंश्रितोनिलः स्नायुस्त्वेपलक्षणम् शिराकंडरयोरपिग्रहणं आक्षिपति कंपय(
ति तदासमानवः विष्टब्धाक्षः स्तब्धनेत्रः भग्नपार्श्वः भग्नेश्च पार्श्वेयस्यसः अथवाह्यायामस्य(
लक्षणमाह महाहृदुर्वली वायुः शिराः सस्नायुकंडराः मन्याएवाश्रितावाह्याः संसोष्यानामये
द्वहिः यत्र तं वहिरायामं प्रवदंति भिषक्वराः तमसाध्यं वुधाः प्राहुर्वक्षः कट्यूरुभंजनं वक्षःकट्यू
रुभंजनं तत्रापि योवक्षः कट्यूरुभंजनक्षिनमपतितमसाध्यमाहुः अथ तयोश्चिकित्सा वाह्याया

मा·प्र· भ्यंतरायामेवविधेयार्दितवत्क्रिया अथधनुस्तंभस्यलक्षणमाह धनुस्तुल्योनमेद्यस्तुसधनुस्तंभसंज्ञितः
१७० विवर्णःस्वन्नवदनःस्रस्तांगोनष्टचेतनः प्रस्विन्नश्चधनुस्तंभीदशरात्रंनजीवति अंतरायामेतुल्यादि
घ्रास्तेयःस्तब्धाक्षत्वादिकंचभवति धनुस्तंभेतुधनुर्वन्नमतीत्युभयोर्भेदः विवर्णोबद्धवदनः वंधो
त्रचिवुकस्यज्ञेयः अथकुब्जकस्यलक्षणमाह हृदयंयदिवापृष्ठमुन्नतंक्रमतःसरुक्‌क्रुद्धोवा
युर्यदाकुर्यान्नदातंकुब्जमादिशेत् यदिवेत्युक्त्यायदिवेतिविकल्पार्थस्तेनपुनरुक्तिदोषः नन्वं
तरायामःक्रोडनतोभवति वहिरायामःपृष्ठतोभवति ताभ्यामस्यकोभेदः उच्यते अंतरायाम
वहिरायामयोः प्रकृतस्यैवांतःशरीरस्यवहिःशरीरस्यचनमनंभवत्रतुहृदयंपृष्ठंवाशरीराद्वहिर्न
वतीतिभेदः अथतस्यचिकित्सा वाह्यायामेंतरायामेधनुस्तंभेचकुब्जके योज्यंप्रसारिणीतैलंतै
नतेषांशमोभवेत् वातव्याधिषुसमान्याःयाःक्रियाःकथिताःक्रमात् कर्तव्याएवतास्सर्वास्तिल
मेतच्छिरोधरः अथापतंत्रकस्यलक्षणमाह क्रुद्धःस्वैःकोपनैर्वायुःस्थानादूर्ध्वंप्रपद्यते पीडय १७०

लक्षणमाह हृष्येतेचरणौयस्यभवतश्चप्रसुप्तकौ पादहर्षःसविज्ञेयःकफवातप्रकोपतःहृष्ये
तेरोमांचितौभवतःप्रसुप्तकौकिमिकिमिनीतियुक्तौ अथतस्यचिकित्सा पादहर्षेतुकर्तव्यःकफ
वातहरोविधिः अथाक्षेपकस्यसामान्यंलक्षणमाह यदातुधमनीःसर्वाःकुपितोभ्येतिमारुतः
तदाक्षिपत्याशुमुहुर्मुहुर्देहंमुहुश्चरः मुहुराक्षेपणाद्वायुराक्षेपकइतिस्मृतः मुहुर्मुहुर्देहमाक्षे
पति गजारूढस्येवपुरुषस्यगात्रंदोलयति किंविशिष्टोमारुतःमुहुश्चरःवारंवारंसंचरणशीलः
अयंवायुराक्षेपकइतिस्मृतः देहस्यमुहुराक्षेपणंचालनंततः आक्षेपकस्यचतुरोभेदानाह
पित्तश्लेष्मान्वितोवायुर्वायुरेवचकेवलः कुर्यादाक्षेपकंचान्यःचतुर्थमभिघातजः पित्तान्वितःश्ले
ष्मान्वितश्चवायुःकेवलश्चाक्षेपकत्रितयंकुर्यात अन्यश्चतुर्थमभिघातजः अन्योदंडाद्यभिघा
तजोवायुश्चतुर्थमाक्षेपकंकुर्यादित्यर्थः तत्रकेवलवातजस्याक्षेपस्यलक्षणमाह पाणिपादशि
रःपृष्ठश्रोणीःस्तभ्नातिमारुतः दंडवत्स्तब्धगात्रस्यदंडकःसोनुपक्रमः अयंवातताक्षेपको।

मा॰नि॰ मित्तश्चनसिध्यत्यपतानकः इ रिदसमग्रहणशक्तिं संस्तम्भनाशयित्वा अथतस्यचिकित्सा अथाप
१८१ तानकेनार्तमस्रुताक्षमवेपनं अखट्वापातिनंचैवत्वरयासमुपाचरेत् अपतानकिनेशस्तंदशम्
लीशृतंजलं पिप्पलीचूर्णसंयुक्तंजीर्णेमांसरसोदनं तैलेनमर्दनंस्वेदस्तथातीक्ष्णंचनावनम्
स्रोतोविशोधनंपथ्यात्सर्पिःपानंहितंस्मृतं हत्पगुल्कवतापीतमम्लंदध्यपतानकंमरीचेन
समायुक्तंस्नेहवस्तिरथापिच पक्षाघातस्यलक्षणमाह गृहीत्वार्धंतनोर्वायुः सिराःस्नायूर्विशोष्य
च पक्षमन्यतमंहंतिसंधिबंधान्विमोक्षयन् कृत्स्नोर्धकायस्तस्यस्यादकर्मण्योविचेतनः एकांग
वातंतंकेचिदन्येपक्षविधंविदुः अर्धअर्धनाडीस्वरवत् पक्षंवाऊपार्श्वोरुजंघादिभागं अन्यतमं
वामंदक्षिणंवा विमोक्षयन्शिथिलीकुर्वन् अकर्मण्यः कर्मसमर्थः विचेतनः ईषत्स्पर्शज्ञा
नयुक्तः अस्यसाध्यासाध्यज्ञानार्थमाहदाहसंतापमूर्छास्युर्वायौपित्तसमन्विते शैत्यशोफगुरु
त्वानितस्मिन्नेवकफावृते दाहोबाह्यस्यसंतापःआभ्यंतरः एतच्चलक्षणमन्यत्रापिवातव्याधौ १८१

बोधव्यं सामान्यतोवायाविति निर्दिष्टत्वात् पक्षाघातस्यसाध्यत्वादिकमाह शुद्धवातहतंपक्षंक
ष्टसाध्यतमंविदुः साध्यमन्यैर्नसंयुक्तमसाध्यंक्षयहेतुकं शुद्धः केवलः अन्येनपित्तेनकफेनवा
क्षयहेतुकंक्षयोधातुक्षयस्तत्कुपितवातनिमित्तकं अपरमसाध्यलक्षणमाह गर्भिणीसूतिकाबा
लवृद्धक्षीणेष्वसृक्क्षये पक्षाघातंपरिहरेद्वेदनारहितोयदि वेदनारहितोयदीतिभिन्नमसा
ध्यलक्षणं अथतस्यचिकित्सा माषात्मगुप्तावातारिवाट्यालकज्यशृतं हिंगुसैंधवसंयुक्तं
पक्षाघातंविनाशयेत् माषिकेहिंगुसिंधूत्थेजीरण्याद्यास्तुशाणिकाः माषादिक्वाथः ग्रंथिका
ग्निकणाशुंठीरास्नासैंधवकल्कितं माषक्वाथशृतंतैलंपक्षाघातंअपोहति ग्रंथिकादितैलं
माषात्मगुप्तातिविषारुवूकरास्नाशताह्वालवणैः सुपिष्टैः चतुर्गुणेमाषबलाकषायेतैलंशृ
तंहंतिहिपक्षघातं माषादितैलं अथसर्वांगवातस्यलक्षणमाह सर्वांगपवनेकुद्धेगात्रस्फु
रणभंजनैः वेदनाभिःपरीताश्चस्फुटंतीवास्यसंधयः भंजनंभंगवत्पीडासंधयोवेदनाभिः

भा॰प्र॰ ःपरीतायुतास्फुरंतीव अथतस्यचिकित्सा सर्वांगगतमेकांगगतंचापिसमीरणं तैलावगाहनं
१९२ हंतितोयवेगमिवाचलः अथस्थाननामलक्षणेनवातव्याधीनाह स्थाननामानुरूपैश्चलिंगैः
शेषानविनिर्दिशेत सर्वेष्वेतेषुसंसर्गपित्तादेरुपलक्षयेत् प्रथमंकुक्षेशूलंततोवाचालता
पिच आटोपःपार्श्वशूलंचपुरीषस्यातिगाढता तथामलाप्रवृत्तिश्चकंपस्तंभश्चरूक्षता का
र्श्यकार्ष्ण्यंचशैत्यंचलोमहर्षोप्ययातथा तोदोभेदःशिरास्फूर्तिरंगमर्दोगशुष्कता शंकोच
श्चांगविभ्रंशोहर्षश्चवलचिन्नता निद्रानाशःस्वेदनाशोबलहानिश्चनीरुताश्रुकक्षयोरजोना
शोगर्भनाशः परिश्रमः आटोपोगुडगुडाशब्दः तोदःसूचीव्यथतेनेवपीडाभेदोविदारणमे
व व्यथाश्चांगविभ्रंशः अंगस्यस्थानत्यागोनरवलनंनिद्रानाशोनिद्राल्पत्वमपिगर्भनाशः आ
मगर्भपातः गर्भशय्यायांवाताधिष्टानात्अर्भग्रहणमितिजितुटः परिश्रमःआयासंविनाश्र
मः अथतेषांचिकित्सा सामान्यवातरोगाणांयाचिकित्साप्रवक्ष्यते एषांसैवविधातव्यात्र १९२

न्हृदयंगत्वाशिरःसंखोचपीडयन् धनुर्वन्नमयेन्मात्राण्याक्षिपेन्मोहयेत्तथा सकृच्छ्रादुच्छ्रसित्युच्चैःस्त
ब्धाक्षोथनिमीलकः कपोतइवकूजेच्चनिःसंज्ञारसोपतंत्रकः स्थानात पक्वाशयात ऊर्ध्वशिरख
दिरूपआक्षिपेत् चालयेत् अथनिमीलकः अथवानिमीलताक्षःपतेत्तानिमर्वंतिसोपतंत्रकः
अथतस्यचिकित्सा अथापतंत्रकेमार्तमातुरंनापतर्पयेत् निरूह्वस्तिवमनंसेवयेन्नकदाच
नश्वसनाःकफवाताभ्यांरुद्धास्तस्यविमोक्षयेत् तीक्ष्णैःप्रधमनैःसंज्ञांतासुमुत्कासुविंदति स्व
सनाःप्रस्वासोच्छ्वासावेहाधमनीः मरीचसिगुवीजानिविडंगंचफाणिजकं एतानिसूक्ष्मचूर्णानि
दद्याच्छीर्षविरेचनं फाणिज्जकोमरुवकः मरिच्यादिनस्यं हरीतकीवचाएलासैंधवंसाम्लवेतसं
घृतमार्द्रकसंयुक्तमपतंत्रकनाशनं अम्लवेतसकाभावेचुक्रं दातव्यमीरितं अथापतानक
स्यलक्षणमाह दृष्टिंसंस्तभ्यसंज्ञांचहत्वाकंठेनकूजति हृदिमुक्तेनरःस्वास्थ्यंयातिमोहंवृतेपुनः
वायुनादारुणंप्राहुरेकेतमपतानकं गर्भपातनिमित्तश्चशोणितातिश्रवाच्चयः अभिघातनि

मा·प्र·
१९३
रीक्रियां सकफे तत्र कुर्वीत वा च वातश्लेष्महरीक्रियां अथ रसादिधातुगतानां लक्षणमाह त्वग्रूक्षा
स्फुटिता सुप्ता कृशा कृष्णा तुद्यते आतन्यते सरागा च सर्वरुक् त्वग्गते निले सर्वरुक् सर्वत्वग्व्यथा
त्वग्गतेव कश्चिद् नात्र रसशब्दः पठ्यते त्वगाधार्यत्वात् तेन रसगत इत्यर्थः रुजस्तीव्राः ससंतापाः वैवर्ण्यं कृ
शताऽरुचिः गात्रे चारूंषि भुक्तस्य स्तंभश्चासृग्गते निलेर्ष्वं संतर्पणेन रक्तदुष्टेः गुर्वंगं तुद्यतेऽत्य
र्थं दंडमुष्टिहतं यथा सरुक् श्रमितमत्यर्थं वाते मांससमाश्रिते तथा मेदःश्रितः कुर्याद्ग्रंथीन्मं
दरुजोऽव्रणान् दंडमुष्टिताडितमिव तुद्यते स्तिमितं निश्चलमित्यर्थः मांसमेदसोर्गतिचात्र तयोरेका।
लिंगत्वमहस्रांतरेण प्रत्यासत्तेराश्रयाभावात् तथा मेदःश्रितो मांसगतवत् अंतरेण प्रत्यासत्तेर
स्थिगत्याश्रयात्मेदस्य कुर्याद्ग्रंथीतित्यादिविशेषः भेदोऽस्थिपर्वणां संधिशूलं मांसबलक्षयः अस्व
प्नसंततारुक् च वाते दुष्टेऽस्थिसंस्थिते वाते मज्जगते पीडा न कदाचित्प्रशाम्यति मज्जगतोऽस्थिगतवत्
यथा मेदोगतो मांसगतवत्पीडा स्याद्वयं विशेषः क्षिप्रं मुंचति बध्नाति शुक्रं गर्भमथापि वा विकृतिं। १९३

जनयेद्वापि शुक्रस्थः कुपितोऽनिलः शुक्रं बध्नाति स्खलयत्येव न गर्भं क्षिप्रं मुंचति आममेव पातयति
बध्नाति मूढं करोति वातदुष्टशुक्रारब्धत्वात् विकृतिं शुक्रस्य वर्णांतरत्वादिस्वरूपं गर्भस्य विकृतांगत्वा
दिरूपं जनयति अथ तेषां चिकित्सा वायौ त्वगाश्रिते स्नेहाभ्यंगस्वेदं च कारयेत् रक्तस्थे शीतलान्
लेपान्विरेकं रक्तमोक्षणं मांसमेदोगते वाते सविरेकं निरूहणं अस्थिमज्जगते स्नेहं बहिरंतश्च यो
जयेत् केतकनख्यावल्लातिबलानां यष्टकुलेन रसेन विपक्कं तैलमनल्पतुषोदकसिद्धं मारुतम
स्थिगतविनिर्हंति इति केतकादितैलं हर्षान्नपानं शुक्रस्थे बलशुक्रकरं हितं अथ स्थानवि
शेषेण वातव्याधिविशेषो यथा तत्र कोष्ठगतस्य वातस्य लक्षणमाह वाते कोष्ठाश्रिते दुष्टे निग्र
हो मूत्रवर्चसोः ब्रध्नहृद्रोगगुल्मार्शः पार्श्वशूलं च जायते कोष्ठलक्षणमाह स्थानान्यामाग्निपक्वा
नां मूत्रस्य रुधिरस्य च हृद् उंडुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते उंडुकः पोट इति लोके एतेन।
कोष्ठशब्देन सर्व एवाशयाः कथ्यंते तथापि विशेषार्थमामाशयादिस्थवातलक्षणान्यपि ए

थक्क्वस्यंते अथतस्यचिकित्सा यावनीयरसैर्युक्तैरन्यैश्चपाचयेन्मलान् विशेषतः पिबेत्क्षीरंनरः
कोष्ठगतेनिले अथामाशयगतस्यलक्षणमाह हृत्पार्श्वोदरनाभीरुक्तृट्तोद्गारविसूचिकाःकासः
कंठास्यशोषश्वासाश्चामाशयस्थिते आमाशयस्यलक्षणमाह चरकः नाभिस्तनांतरंजंतोरा
हुरामाशयंबुधाइति अथतस्यचिकित्सा आमाशयस्थेनिलेप्रशस्तंप्राग्लंघनंदीपनपा
चनंच प्रच्छर्दनंतीक्ष्णाविरेचनंचमुस्तायवाःशालिसुताःपुराणाःभूतीकपथ्याशटीपुष्कराणि
विल्वामृतादारुकनागराणि उग्राविषामागधिकाविडानिक्ताथास्त्र्यंशसामसमीरणघ्नाः भूती
कः रोहिषसुगंधस्तृणविशेषस्तदलाभेग्राह्यमुशीरं पुष्करंपुष्करमूलं दारुकंदेवदारुउग्रा
वचा विषाअतिविषा चित्रकेंद्रयवोपाठाकटुकानिविषाभया आमाशयेप्यवातघ्नंचूर्णं पे
यंसुखांबुना योगेस्मिन्निष्कआद्याःप्रत्येकंषट्धरणाःपृथक्कृदिनेषुषट्सुदातव्यातेनषट्धर
णस्मृताः अत्रप्रत्येकंसमुदितानांषट्धरणमितानांचूर्णीकृतानामेकस्मिन्नहन्येकटंकोदेयः १७४

येतेषांनिसंशयं एवंविधानिरूपाणिकरोतिकुपितोनिलः हेतुस्थानविशेषेणभवेद्रोगविशेष
कृत् एवंविधान्निरूपाणिशिरोग्रहादीन्यशीतिहेत्वित्यादिहेतुविशेषः पित्तश्लेष्माद्यावृतत्वादि
यथाश्लेष्मावृतोवायुर्मन्यास्तंभकारीतिस्थानविशेषः कोष्ठादिर्यथा तत्रकोष्ठाश्रितेदुष्टेनिग्र
होमूत्रवर्चसोरित्यादि तत्रहेतुविशेषणवातव्याधिविशेषोयथा उदानेपित्तसंयुक्तेदाहोमूर्छा
भ्रमक्लमः अस्वेदहर्षौमंदाग्निःशीतताचकफावृते प्राणेपित्तावृतेछर्दिर्दाहश्चैवोपजायते दौ
र्बल्यंसदनंतंद्रावैरस्यंचकफावृते प्राणोहृदयाश्रितोवायुः स्वेदोदाहस्तृष्णामूर्छासमानेपित्तसं
युते कफेनसक्तेविण्मूत्रेगात्रहर्षश्चजायते कफेनसंयुतेसमानेविण्मूत्रेसक्तेअवरुद्धेभ
वतः गात्रविहर्षोरोमांचः अपानेपित्तसंयुक्तेदाहोष्ण्येरक्तमूत्रता अधःकायेगुरुत्वंचशीत
तांचकफावृते गुदाश्रयोपानः व्यानेपित्तावृतेदाहोगात्रविक्षेपणंश्रमः स्तंभोथदंडकश्चापि शू
लशोथौकफावृते दंडकः आक्षेपकभेदः अथतेषांचिकित्सा वातेसपित्तेकुर्वीतवातपित्तह

क्षीरसाधितं साल्वणंधविनीतकं गुडयुक्तं प्रयत्नेन हृदयानिलनाशनं देवदारुसमायुक्तं नागरं प्
रिपेषितं हृत्पाठवेदनायुक्तः पीत्वा सुखमवाप्नुयात् अथश्रोत्रादिगतस्य वातस्य लक्षणमाह श्रोत्रा
दिष्विंद्रियवधं कुर्यात्क्रुद्धः समीरणः अथ तस्य चिकित्सा श्रोत्रादिष्वनिले क्रुद्धे कार्यो वातहरः क्र
मः स्नेहाभ्यंगोपनाहश्च मर्दनालेपनानि च वाते शिरागते कुर्यात्तथा चासृग्विमोक्षणम् अथ स्ना
युगतस्य वातस्य लक्षणमाह शूलमाक्षेपकः कंपः स्तंभः स्नाय्वनिलाद्भवेत् अथ तस्य चिकित्सा
स्वेदोपनाहाग्निकर्मबंधनोन्मर्दनानि च कुर्यात्स्नायुगते वाते कोरये कुशलो भिषक् अथ संधिग
तस्य वातस्य लक्षणमाह हंति संधिगतः संधीन्शूलशोथौ करोति च हंति विश्लेषयति अथ तस्य
चिकित्सा कुर्यात्संधिगते वाते दाहस्नेहोपनाहनं इंद्रवारुणिकामूलं मागधं गुडसंयुतं भक्ष
येत्कर्षमात्रं तत्संधिवातं व्यपोहति अथ वातव्याधीनां सामान्यानि भेषजानि माषस्यार्धाढकं
देयं तुलार्धं दशमूलतः पलानि छागमांसस्य त्रिंशद्द्रोणेंभसा पचेत् चतुर्भागावशेषं तं कषायम १९५

वतारयेत् प्रस्थे द्वे तिलतैलस्य पयो दद्याच्चतुर्गुणं जीवनीयानि मंजिष्ठा व्याघ्री चित्रक कट्फलं चव्यो
षं पिप्पलीमूलं रास्नामलकगोक्षुरं आत्मगुप्ताथ एरंडः शताह्वा कालवणत्रयं देवदार्वमृताकुष्ठमश्व
गंधा वचा शटी एतैरक्षमितैः कल्कैः पाचयेन्मृदुनाग्निना पक्वा वातार्दितैर्युसिद्धस्तेन नेत्रपाद्दिति
कर्णशूले शिरःशूले तिमिरे त्रिदोषजे पाणिपादशिरोग्रीवा श्रवणे मंदगे च व कलायखंजे पंगौ च कुब्जत्वा
मपवाहुके पाने वस्तौ तथाभ्यंगे नस्ये कर्णादिपूरणे तैलमेतत्प्रशंसंति सर्ववातविकारनुत् महामा
षादिनामेदं भाषितं मुनिभिः पुरा महामाषादितैलं इति माषयवातसीक्षुद्रामर्कटीच
कुरंटकैः गोकंटः टुंटुकश्चैषां प्रत्येकं पलसप्तकं चतुर्गुणांबुना पक्त्वा पादशेषं शृतं नये
त् कार्पासकास्थि बदरं सणबीजं कुलत्थकं एषां च चतुर्दशपलं चतुर्गुणजले पचेत् कषायं त्वपरं ही
याच्चतुर्थांशशेषितं प्रस्थं च छागमांसस्य चतुःषष्टिपले जले प्रक्षिप्य पाचयेद्धीमान्पादशेषं रसं
नयेत् तैलप्रस्थे ततः क्वाथान्सर्वान्क्षिप्त्वा क्रमतः पचेत् कल्कद्रव्यैः पचेद्भिरमृताकुष्ठसैंधवैः रा

भा·प्र· स्नायुनर्त्तवैरंडैः पिप्पल्याशतपुष्पया बलाप्रसारिणीभ्यांच मांस्याकटुकयातथा पृथक्कर्षमि
१९६ तैरेतैः साधयेन्मृदुनाग्निना हन्यात्तैलमिदंशीघ्रंवातव्याधीनशेषतः आक्षेपकंपक्षघातमूरुस्तं
भापबाहुकौ गृध्रसीकर्णशिरःकंपंविश्वाचीमर्दितंतथा माषादितैलंशार्ङ्गधरात् अश्वगंधाब
लाबिल्वंपाटलांबृहतीद्वयं श्वदंष्ट्रातिबलानिंबानस्योनाकंचपुनर्नवां प्रसारिणीमग्निमंथं।
कुर्याद्दशपलंपृथक् चतुर्द्रोणेजलेपक्त्वापादशेषंशृतंनयेत् तैलाढकेनसंयोज्यंशतावर्या
रसाढकं प्रक्षिपेत्तत्रगोक्षीरंततस्तैलाच्चतुर्गुणं पृथक्पलमितैःकल्कद्रव्यैरेभिःपचेद्भिषक्
क्वाथंचंदनकुष्ठैलामांसीशैलेयसैंधवैः अश्वगंधाबलारास्नाशतपुष्पेंद्रदारुभिः पर्णीचतुष्
येनैवतगरेणप्रसाधयेत् तत्तैलंनावनेभ्यंगेपानेबस्तौचयोजयेत् पक्षाघातंहनुस्तंभंम
न्यास्तंभंगलग्रहं कुब्जत्वंबधिरत्वंचगतिभंगंकटिग्रहं गात्रशोषेन्द्रियध्वंसशुक्रनाशज्वरक्ष
यान् अंत्रवृद्धिंकुरंडंचदंतरोगंशिरोग्रहं पार्श्वशूलंचपंगुत्वंबुद्धिहानिंचगृध्रसीं अन्यांश्चवि। १९६

तद्यथा आमाशयगतेवातेछर्दितायथाक्रमं देयःषड्धरणोयोगःसप्तरात्रंसुखांबुना अयम
र्थः प्रथमदिवसेवमनंकारयितव्यंततोद्वितीयदिनमारभ्यषट्दिनपर्यंतंपाठक्रमेणैकैकस्य
चूर्णंटंकमितंदेयमित्यर्थः षड्धरणोयोगः अथपक्वाशयगतस्यवातस्यलक्षणमाह पक्वा
शयस्थोनकूजंशूलंनाटोपौकरोतिच कृच्छ्रमूत्रपुरीषत्वंआनाहंत्रिकवेदनां आटोपोवा
तस्यक्षुब्धत्वं मधुगुडगुडाशब्दस्तस्यांत्रकूजेनोक्तत्वात् अथतस्यचिकित्सा वह्निसंवर्धनं।
कार्यंकर्मोदावर्त्तकंतथा देयःस्नेहविरेकश्चपक्वाशयगतेनिले वातेजठरगेदद्यात्क्षारंचू
र्णादिदीपनं शुंठीकुटजबीजाग्निचूर्णंकोष्णांबुकांजिकैः अथगुदगतस्यवातस्यलक्षणमाह ग्रहो
विण्मूत्रवातानांशूलाध्मानाश्मशर्कराः जंघोरुत्रिकपार्श्वांसपृष्ठरोगोगुदेनिले रोगोत्ररु
जापीडेतियावत् अथतस्यचिकित्सा वातेगुदगतेकुर्यात्कर्मोदावर्त्तकंहितं अथहृदयवातस्यचि
कित्सा हृदयानिलमाशाम्यगुडूचीमरिचान्विता पिबेत्प्रातःप्रयत्नेनसुखंवंतथामांसरसासह पिबेत्

ना॰प्र॰ त पादशेषं परिस्राव्य तत्र तैलं पुनः पचेत् छागो मेषश्च हरिणस्तथैव कुरंगकः शशः शल्यः शिवा
१८७ गोधा सिंहो व्याघ्रश्च भल्लुकः वन्यो वराहः षड्गी च महिषो घोटकस्तथा कपिर्वनविडालश्च मूषकश्चोरु
दर्दुरः वर्तिकस्तित्तिरिर्लावः खंजरीटश्चकोरकः उलूको नीलकंठश्च वनकुक्कुट एव च गृध्रश्च गरुडो
हंसश्चक्रकारंडवोपि च कपोतः सारसः क्रौंचो वन्यः पारावतस्तथा रोहितो मद्गुरश्चापि शिलीध्रः शृं
गकस्तथा इल्लिसो गर्गरीचर्मी कुथिका कर्विकापि च महामत्स्यः कच्छपश्च शिसमारश्च सांकुचिः
मकरो घंटिकाकारः तदलाभे तु गोधिका यथालाभममीषां च क्वाथं तैलसमं पचेत् रास्नाश्व
गंधामिशिदारुकुष्ठपर्णीचतुष्कागुरुकेशराणि सिंधूत्थमांशीरजनीद्वयं च शैलेयकं चन्दनपु
ष्करं च एलासपत्रीतगरा च पत्रं भृंगोष्टवर्गस्तु वचापलाशी स्थौणेयपद्मश्च विकंचोरकाख्यं मू
र्वात्वचं कटुफलपद्मकं च मृणालजातीफलकेतकाख्यं सनागपुष्पं श्यामलं मुरा च जीवंतिकोशी
रवरास्तथैव दुरालभावानरिका नखश्च केवर्त्तमुस्तार्जुनतिक्तकं च वाताम्रजरकचतुराश्च सधातकी १८७
ख

ग्रंथिकपर्पटाश्च पयोलहेमाह्वजयंतिकाश्च त्रायंतिकालंबुषश्रंकवीजं रसांजनाभाक्षिवृत्तास्तगा
ण्णेण पुनर्नवाश्च कौंतिकि मिञ्जोहयमारकश्च नीलोत्पलं पद्मकं कारवीभ्यां रंभानलो गोक्षुरकः
क्षुरश्च कंकोलकालीयकुसुंभपुष्पतुरुष्ककाश्मीरकशिस्यकं च लवंगकर्पूररसपालकोंडकर
स्तूरिकावालकमंबरं च दारुदेवदारु पर्णीचतुष्कं शालिपर्णी पृश्निपर्णी मुद्गपर्णी माषपर्णी
केशरः पुन्नागस्तस्य पुष्पं ग्राह्यं तदलाभे नागकेशरं ग्राह्यं शैलेयकं छरीला चंदनमत्र श्वेतं ग्रा
ह्यं पुष्करं मूलं तगरस्याप्यलाभे तु कुष्ठं दद्यात् भिषग्वरः भृंगस्त्वक अष्टवर्गालाभे शतावरी अ
श्वगंधवाराही विदारी द्विगुणं दद्यात् वाराही गेडी इति लोके पालाशी कर्चूरभेदः गंधपलाशी
तिकाश्मीरे प्रसिद्धस्तदलाभे कर्चूर एव देयः स्थौनेयुः गठिवन मेखई पत्थु गंधि युनेर इति लोके
वश्चापि श्वेतमूला पुनर्नवा चोरकः ग्रंथिपर्णस्यैव भेदः भटीउराइ इति नेपालदेशे प्रसिद्धः के
तकस्य मूलं पुष्पं च दद्यात् केवर्त्तमुस्ता केवटीमोथा गुडतजी इति च नाम तिक्तकः किरातति

शुक्लानिहिमन्यतेतु अत्रापिश्लेष्मणोदृष्टेःप्रथमद्वितीयपटलगतस्येतल्लिंगंबोध्यं सएव
श्लेष्मादृष्टेःपटलंतृतीयंगतोनक्तांध्यंकरोतीत्याह त्रिषुस्थितोयःपटलेषुदोषोनक्तांध्यमाप
दयतिप्रसह्य दिवाससूर्यानुगृहीतदृष्टिः पश्येत्तुरूपाणिकफाल्पभावात् दोषोऽत्रक
फस्तस्योपक्रांतत्वात् नक्तांध्यश्लेष्मविदग्धदृष्टावंतर्भूतत्वात् नपृथग्गणना भूमदर्शिन

माह शोकज्वरायासशिरोऽभितापैरभ्याहतायस्यनरस्यदृष्टिः धूम्रांस्तथापश्यतिसर्वभावा
न्सधूमदर्शीतिनरःप्रदिष्टः शिरोऽभितापः शिरसिधर्मादिनासंतापः एतस्यपित्तदोषोबोध्यः
ह्रस्वजाड्यमाह योवासरेपश्यतिकृच्छ्रतोयद्रूपंमहच्चापिनिरीक्षितेऽल्पं रात्रौपुनर्यःप्रकृतानि
पश्येत्सह्रस्वजाड्योमुनिभिःप्रदिष्टः नकुलांध्यमाह विद्योततेयस्यनरस्यदृष्टिर्दोषाभिपन्ना
नकुलस्ययद्वत् चित्राणिरूपाणिदिवासपश्येत्सवैविकारोनकुलांध्यसंज्ञः दृष्टिर्विरू
पाश्वसनोपसृष्टा संकुच्यतेऽभ्यंतरतस्तुयातिरुजावगाढाचतमक्षिरोगंगंभीरकेतिप्रवदंति
तज्ज्ञाः वातोपद्रुतारुजावगाढागंभीरवेदनान्विता एवंदृष्टिगताद्वादशरोगकथिताः बाह्योपुनर्द्वावि
हसंप्रदिष्टौनिमित्ततश्चाप्यनिमित्ततश्च निमित्ततस्तत्रशिरोऽभितापाज्ज्ञेयस्त्वभिष्यंदनिदर्शनैःसः
बाह्योसुश्रुतोक्तद्वादशसंख्येभ्योऽधिकौ तत्रनिमित्तमाह शिरोऽभितापात् शिरोऽभितप्यते
येनविषकुसुमगंधवह्न्यादितस्माच्छिरोऽभितापस्तस्मात् अभिष्यंदनिदर्शनैः रक्ताभिष्यंद

ल्लिंग इति गयदासः सन्निपाताभिष्यंदलिंग इति कार्त्तिकः अनिमित्तमाह सुरर्षिगंधर्वमहोर
गाणां संदर्शनेनापि च भास्करस्य हन्येत दृष्टिर्मनुजस्य यस्य सल्लिंगनाशस्त्वनिमित्तसंज्ञः अ
नुपलभ्यमानानां सुरादीनां दर्शनं निमित्तमप्यनिमित्तं मन्यते अनिमित्ततो लिंगनाशस्य लक्षण
माह तत्राक्षि विस्पष्टमिव प्रभाति वैडूर्यवर्णा विमला च दृष्टिः विस्पष्टं ज्योतियुक्तं वैडूर्यव
र्णा नृपमाविभासा निर्मला एवं चतुर्दश दृष्टिरोगाः तेयथा वातिकः पैत्तिकः श्लैष्मिकः रक्त
जः सान्निपातिकः विम्लायि एवं षट् लिंगनाशाः दिवांधः रात्र्यंधः धूमदर्शी ह्रस्वजात्यः नकुलांधः
गंभीरिकाः एवं षट् अपरे रोगाः एवं द्वादश बाह्या चापरौ द्वौ सनिमित्तानिमित्तजौ एवं चतुर्द
शदृष्टिरोगाः इति दृष्टिरोगाः अथ दृष्टिमण्डलप्रत्यासन्नतया कृष्णगतविकाराभिधानं अथ
कृष्णमण्डलजान् रोगाः तेषां नामान्यभिसंख्यां चाह यत्सव्रणं शुक्रमथाव्रणं च पाकात्ययश्चा
प्यजकास्तथैव चत्वार एते नयनामयास्तु कृष्णप्रदेशे नियता भवंति तत्र सव्रणशुक्रलिंगमाह

भा०प्र०
३२१

निमग्नरूपं तु भवेद्धि क्रक्षेत्र सैव विरूपं प्रविभाति यस्य हे आवंश्च वेद्यं न मतावचापि तत्स्वरूपेणानू
क्रमुदाहरंति निमग्नरूपमित्यात्मक विशेषणं सैव विरूपमिति नुक्तस्य वर्त्तनत्वे यथा वत्वं
च बोधयति स्व वेद्यत्वेनैव भावे बोधिते भाव पदं निरंतरभाव बोधनार्थं आसमस्ताधारा घृणतक्र
णमाह दृष्टेः समीपेन भवेत्तु यत्न नचावगाढं न च संभवेद्यत् आवेदनं यन्न च युग्मनुक्तं तत्सिद्धि
साया ति कदाचिदेव नचावगाढं एकत्वागतिनचसम्भवेत् भत्यर्थमित्यर्थः आवेदनं ईषद्वेद
नं न च युग्मनुक्तं युग्मं = अनुक्तमित्यिक्त तन्नुक्तं एवमित्यर्थः एवंविधं संवेदणं कदाचित् सिध्यंति
एतद्धि परात्तं न सिध्यति अथवणनुक्तमाह स्पंदात्मकं लक्षणतं तु अनुक्तं शंखं डुकं दपुतिमा
व भासं वेद्यायसा भ्रप्रततु प्रकानूमथार्थरूपंएणं सा ध्यतमेवदंति स्पंदात्मकं आ भिष्पंदहेतुकं स
वेषाम क्षिरोगणाम निष्पंदहेतुकत्वेपि नियमबोधनार्थं स्पंदात्मकमिति शंखं डुकुं दस्म द्वा
भव भासत्वे एतेनक्तुक त्वं बोधितं वेद्यपसा भ्रप्रततुप्रकनं आकानं आकाशस्यमेववक्त

सुयथास्यादेवंप्रकाशयत् शुक्लं चंद्रार्केन्दुकुंदप्रतिमावभासत्वेनैव लक्ष्यं वेदितायसाध्ययदृहणे से
जत्वाभाव्यवच्छेदनार्थं साध्यतमस्याप्यसाध्यस्य भेदेन कष्टसाध्यतामाह गंभीरजातं बहलं च
शुक्रं चिरोत्थितं चापि वदंति कृच्छ्रं गंभीरजातं छित्त्वक्गतं बहलं पुष्टं असाध्यतां चाह
विच्छिन्नमध्यं पिशितावृतं च चलं शिरासक्तमदृष्टिकृच्च छित्त्वग्गतं लोहितमंतलश्च चिरोत्थि
तं चापि विवर्जनीयं विच्छिन्नमध्यं पिशितवर्णमांसत्वान्निम्नमध्यं सिरासक्तं शिरायां जातं अदृष्टि
कृतदर्शनाभावकृत् छित्त्वग्गतं पटलद्वयगतं एतद्विच्छिन्नमध्यत्वादिलिंगसहितं असाध्यं न तु
केवलं गंभीरजातस्य कष्टसाध्यत्वाभिधानात् एवं चिरोत्थितमपि अपरमप्यसाध्यलक्षणमा
ह उष्णाश्रुपातः पिडका च नेत्रे यस्मिन्भवेन्मुद्गनिभं च शुक्रं तदप्यसाध्यं प्रवदंति केचिदन्ये तु वा
तित्तिरपक्षतुल्यं मुद्गनिभं च शुक्रं आकारेणेति तत्र नेत्रं ततः तित्तिरपक्षतुल्यं तित्तिरपक्षवद्बलक्षि
पाकात्ययमाह श्वेतः समाक्रामति सर्वतो हि दोषेण यस्यासितमंडलं तु तमक्षिपाकात्ययमा/क्षि॰

भा० प्र०
३३२

कार्यं सर्वात्मकं जानीयात् पित्तव्यमाकुः यः श्वेतदोषेण कृतः तमक्लिकोपं अक्लिपाकात्ययमाह अत्र
पाकोपिस्मात् अतस्तुश्रुतः शोफाश्रुपाकात्रियुतिचनेत्र इति अजकातमाह अजापुरीषप्रतिमो
रुजावानसलोहितोलोहितपिच्छिलाश्रु विगृह्य कृष्णं प्रचयोभ्युपैति तं चाजकाजातमितिव्यवस्ये
तू यस्य प्रचयस्तत्र प्राय: स च मंदसो बोधव्यो यत एतान्यपात्यतिविविधेहेन तृतीयपटले कपितात्कलोहि
तः विगृह्य कृष्णं अभ्युपैति महत्त्वेन समस्तं कृष्णभागं प्रसित्वा आयाति व्यवस्येत् जानीयात् इ
ति कृष्णमंडलजा रोगा अथ शुक्लभागजा रोगास्तेषां नामानि संख्यां चाह प्रस्तारिशुक्लक्षतजाधि
मांसस्नायुर्मसंज्ञा: खलु पंचरोगा: स्याच्छुक्तिका सार्जुनपिष्टकाख्या जालं सिराणां पिडकाश्चता
सां रोगावज्रासमपस्थितेन सार्द्धमेकादशोक्ता: खलु शुक्लभागे तेषु प्रस्तारिर्मणो लक्षणमाह प्रस्ता
रितनुविस्तीर्णं त्रणवं रक्तनिभं सितं नमुपत्तलं विस्तीर्णं प्रस्तारिप्रसमुक्तमित्यर्थः श्यावरक्तानि
मित्यत्र विकल्पो बोधव्य: शुक्लमाह सश्वेतं मृदु शुक्लार्म शुक्ले तदृद्धैते चिरात् क्षतजमाह पद्मा

ं मृदु रक्तार्म्म यन्मांसं चीयते तत्सि पद्माभं वर्णेन रक्तमित्यर्थः चीयते उपचीयते अधिमांसार्म्मा
ह पृथु मृद्वधिमांसार्म्म बहलं च यकृत्सन्निभं पृथु विस्तीर्णं बहलं पुष्टं यकृत्सन्निभं ईषत्कृष्णं लोहि
तं स्नाय्वर्म्माह स्थिरं प्रस्तारि मांसाढ्यं शुष्कं स्नाय्वर्म्म पंचमं स्थिरं कठिनं शुष्कं श्यावरहितं शुक्ति
कामाह श्यावाः स्युः पिशितनिभाश्च बिंदवो ये शुक्त्याभा सितनिभाः स शुक्तिसंज्ञः श्यावाः पांडुश्या
माः पिशितनिभाः पिशितस्येव निभा दीप्तिर्येषां ते तथा शुक्त्याभाः जलशुक्तिनिभाः तस्मादन्याद
शितशिताः अशिताः शिताश्च अशितशिताः इत्यादि वर्णत्रयेपि विकल्पो बोध्यः अर्जुनमाह एको
यः शशरुधिरप्रभस्तु बिंदुः शुक्लस्य भवति तमर्जुनं वदंति पिष्टकमाह श्लेष्ममारुतकोपेन
शुक्ले मांसमुन्नतं पिष्टवत्पिष्टकं विद्धि मलाक्तादर्शसन्निभं पिष्टवत् श्वेतं मलाक्तादर्शसलि
नमिति धूल्यादिप्रक्षिप्तदर्पणतुल्यं शिराजालमाह जालाभः कठिनशिरो रक्तः शिराणां संता
नो भवति शिरादिजालसंज्ञः कठिनशिरः कठिनाः शिराः यस्य स तथोक्तः शिरादिजालसंज्ञः शि

रापूर्वको जालसंज्ञः शिरादिजालसंज्ञः शिराजालसंज्ञः शिरापिडकामाह शुक्लकस्थाः सितपि
डका शिराभृतायाः तां विद्याद्सितसमीपजां शिराजाः बलासग्रथितमाह कांस्याभो मृदुरथ
वारिबिंदुकल्पो विज्ञेयो नयनसिते बलाससंज्ञः बलासग्रंथिसंज्ञः क्वचिदेकदेशेनापि समुद
यावगमात् यथा भीमो भीमसेन इत्यादि अत एव सुश्रुतो नामसंग्रहे बलासग्रथितपदं निर्दिष्टवा
न् इति शुक्लभागजा रोगाः तत्र वर्त्मनिर्दिष्टं पतत्याह वर्त्मनानयनच्छदावित्ति त वर्त्मानां रोगाणां
नामाभिसंख्यां चाह उत्संगिन्यथ कुंभीकासंयोप्यको वर्त्मशर्करा तथार्शोवर्त्मशुष्कार्शस्तथै
वांजननामिका बहुलं वर्त्म यच्चापि प्रोक्तो वर्त्मबंधकः क्लिष्टवर्त्म तथा वर्त्मकर्दमः श्याववर्त्म
च प्रक्लिन्नवर्त्म वातहतं च तत् वर्त्मार्बुदं निमेषश्च शोणितार्शस्तथैव च लगणो बिसवर्त्माऽपि कुंचनं
नाम तत्परं एकविंशतिरित्येके विकारा वर्त्मसंश्रयाः तेषूत्संगपिडकामाह अभ्यंतरमुखी ताम्रा बा
ह्यतो वर्त्मनश्च या सोत्संगोत्संगपिडका रक्तजा स्थूलकंडुरा अभ्यंतरमुखी वर्त्मनोऽभ्यंतरमुखं य

म०प्र०
३३४

हृष्टत्वर्त्मेतत् वर्त्मबंधकमाह कंडूरेणाल्पतोदेन वर्त्मशोफेन मानवः असमंछादयेदक्षि यत्रासौ वर्त्म
बंधकः क्लिष्टवर्त्माह मृद्वल्पवेदनं ताम्रं यद्वर्त्म सममेव च अकस्माच्च भवेद्रक्तं क्लिष्टवर्त्मेति तद्विदुः
सममेककालं रक्तं लोहितं भवति एतत्कफयुक्ष्टरक्तजं वर्त्मकर्दममाह क्लिष्टं पुनः पित्तयुतं शोणि
तं विदहेद्यदा तदा क्लिन्नत्वमापन्नमुच्यते वर्त्मकर्दमः क्लिष्टमिति पायुक्तलक्षणमेव वर्त्मपित्तमि
श्रितं शोणितं कर्तृभूतं यदा विदहेत्तदा पित्तदापितमधिकं तरूक्तं क्लिन्नत्वमायन्नमिति आर्द्रतां गतं
वर्त्मकर्दमनुच्यते श्यावंवर्त्माह यद्वर्त्म बाह्यतोंऽतश्च श्यावं शूनं सवेदनं सकंडूकं परिक्लेदि श्या
ववर्त्मेति तन्मतं अत्र श्यावत्वेन वाताधिक्यं बोधयमु प्रक्लिन्नवर्त्माह अरुजं बाह्यतः शूनं वर्त्म य
स्य नरस्य हि प्रक्लिन्नवर्त्म तद्विद्यात् क्लिन्नमत्यर्थमंततः अरुजं ईषच्छूणा अक्लिन्नवर्त्माह यस्य धो
ताम्यधौतानि संवध्यंते पुनः पुनः वर्त्मान्यपरिपक्वानि विद्यादक्लिन्नवर्त्मतत् वातहतवर्त्माह विमुक्तसं
धि निश्चेष्टं वर्त्म यस्य निमील्यते एतद्वातहतं विद्यात्सरुजं यदि वारुजं विमुक्तसंधि स्वस्थान च्युतसंधि

१२

नि तत्र त्वयोरोगयोर्नामत्र्याह पक्ष्मकोपः पक्ष्मशातो रोगौ द्वौ पक्ष्मसंश्रयौ तत्र पक्ष्मकोपमाह प्रचालिता
नि वातेन पक्ष्माण्यक्षि विशंति हि असितेसित भागे च मूलकोशात्पातंत्यपि धृष्यत्यक्षि मुहुस्तानि संरंभं
जनयंति च पक्ष्मकोपः स विज्ञेयो व्याधिः परमदारुणः संरंभं शोथं तंत्रांतरोक्तं पक्ष्मकोपमाह यत्य
क्ष्म देहत्वं मुक्त्वा वर्त्मनोंऽतः प्रजायते दूषयत्यक्षि सितेत्रैवेते पक्ष्मकोपः ऽसतत्च्यते पक्ष्मशातमाह व
र्त्मपक्ष्माशयगतं पित्तं रोमाणि शातयेत् कंडूं दाहं च कुरुते पक्ष्मशातं तदादिशेत् शातयेत् इति पक्ष्म
रोगौ अथ संधिजा रोगाः तत्र संधयः षट् तानाह पक्ष्मवर्त्मगतः संधिर्वर्त्मशुक्लगतोऽपरः शुक्लकृष्णगत
स्त्वन्यः कृष्णदृष्टिगतोऽपि च ततः कनीनकगतः षष्ठश्चापांगसंश्रितः तत्र संधयः नवरोगाणां नामानि संख्यां चा
ह पूयालसः सोपनाहः स्रावाश्चत्वार एव च पर्वणी कालजो जंतुः ग्रंथिः संधौ नवामयाः तेषु पूयालस
माह पक्वः शोथः संधिजः संस्रवेद्यः सांद्रं पूयं पूतिपूयालसः सः संधिजः कनीनकसंधिजो वोच्यः पूया
लसं तु तं विद्यात्संधौ कानीनके व्रणमिति वचनात् कनीनसंधिश्च नासा मनु नेत्रांतः उपनाहमाह ग्रंथि

मा०पृ०
२३५

निचेष्टनिमेषोन्मेषा इति हितं ज्ञातएव निमील्यते संकुच्यते वर्त्मार्दमाह वर्त्मांतरस्थं विषमं यत्तेपि भूतमेवे
दनं आचक्षीतार्बुदमिति सरक्तमविलंबितं विषमं अवर्तुलं ग्रंथिभूतं कठिनं अवेदनं ईषद्वेदनं सर
क्तं ईषद्रक्तो हितं आविलं विलंबमानं निमेषमाह निमेषणीः शिरा वायुः प्रविष्टो वर्त्मसंश्रयः स चालयति व
र्त्मानि निमेषः स न सिध्यति निमेषणीः निमेषकारिकाः शिराः प्रविष्टो यानो वायुर्वर्त्मानि चालयति शोणि
तार्शोलक्षणमाह वर्त्मस्थो यो विवर्द्धते रक्तो हितो मृदुरंकुरः तद्रक्तजं शोणितार्शः छिन्नं चापि प्रवर्द्धते एतद
क्तजमस्याध्यंलगणमाह अपाकी कठिनः स्थूलो ग्रंथिवर्त्मभवोऽरुजाः स कारादः पिच्छिलः कोलप्रमाणो
लगणः स्मृतः श्लेष्मजनितः अरुजः पीडारहितः बिसवर्त्माह त्रयो दोषाः बहिः शोफं कुर्युः छिद्राणि
वर्त्मनोः प्रस्रवंत्यंतरुदकं बिसवद्बिसवर्त्म तत् छिद्राणि अंतश्छिद्राणि कुर्युः इत्यन्वयः बिसावहि
ति बिसं मृणालं यथा तच्छिद्रं अभ्यंतरे स्थितो बहुछिद्रत्वात् कुंचनमाह वाताद्या वर्त्मसंकोचनं ज
नयंति मलायदा तदाद्रष्टुं न शक्नोति कुंचनं नाम तद्विदुः इति वर्त्मरोगाः अथ पक्ष्मरोगौ तत्र पक्ष्मणः रोमा

१२

स्याः सा वर्त्मनो बाह्यतस्ताम्रा स्रोतसंगा अंतः पूया उत्संगा पिडका उत्संगे क्रोडे बाह्यपिडका यस्याः सा स्थू
लकंडुरा स्थूला कंडुरा वेति कर्मधारयः एषा धरवर्त्मांतरजा बोध्या वर्त्मोत्संगे धरे जंतो रितिविदेहव
चनात् कुंभिकामाह वर्त्मांतः पिडकाध्माता विद्यंते च स्रवंति च कुंभीकबीजसदृशाः कुंभीकासन्नि
पातजाः कुंभिका कच्छदेशोद्भवरिमाकारफलावत्तातदीजतुल्याः पोथकीमाह स्राविण्यः कंडुरा गु
र्व्यो रक्तसर्षपसन्निभाः रुजावंत्यश्च पिडकाः पोथका इति कीर्त्तिताः वर्त्मशर्करामाह पिडका भृशं
ला सूक्ष्माभिर्यन्ना भिरभिसंवृता पिडकाया खराः स्थूला वर्त्मस्था वर्त्मशर्करा अर्शोवर्त्माह एर्वारु
बीजप्रतिमाः पिडका मंदवेदनाः श्लक्ष्णाः खराश्च वर्त्मस्थास्तदर्शोवर्त्म कीर्त्यते एर्वारुः कर्कटी रक्त
नीक्ष्णाग्राः शुष्कार्शमाह दीर्घांकुरः खरस्तब्धो दारुणो अंतरोद्भवः व्याधिरेषोऽप्यभिस्यातः शुष्कार्श
नामनामतः अंजननामिकामाह दाहतोदवती ताम्रा पिडका वर्त्मसंभवा मृद्वी मंदरुजा सूक्ष्मा ज्ञेया
सांजननामिका बहुलवर्त्माह वर्त्मोपचीयते यस्य पिडकाभिः समंततः सवर्णाभिः स्थिराभिः श्लक्ष्णाभि

नोत्थो दृष्टिसंधावपाकी कंडुप्रायो नीरुजश्चोपनाहः नात्यर्थमहान् आपाकि दूषित्याक्ष नीरुजः ईषद्दे
देतः अरुणं कठिनं ग्रंथिजनपत्यल्पवेदनामिति विदेहवचनात् स्रावाणां संप्राप्तिमाह गत्वासं
धीनश्रुमार्गेण दोषाः कुर्युः स्रावान् स्वरूपैस्तैरुपेतान् तं हि स्रावं नेत्रनाडीमित्येके तस्या लिंगं कीर्त्यपि
प्पे चतुर्धा अश्रुमार्गेणेति अश्रुवाहिन्यो धमन्या वश्रुमार्गः संधीनिति कनीनसंधीन् कनीनसंधिग्र
नासामनुनेत्रांता संधीनिति वक्रवचनेन सर्व एव संधयो गृह्यंते एके वदंतीति त्रोषः वातिकः स्रावो न भ
वति केवलेन वातेन तदसंभवात् वातिकं स्रावमाह हरिद्राभं पीतमुष्णं जलं वा पित्तस्रावः संस्रवे
त्संधिमध्यात् हरिद्राभं पीतरक्तं परतः पीतशब्दप्रयोगात् जलं वेति वात्र द्वौ हरिद्राभं पीतं वेत्यत्र स
वध्यते पित्तस्रावात् पित्तस्रावः एवं श्लेष्मस्रावादयः श्लेष्मस्रावमाह श्वेतं सांद्रं पिच्छिलं यः स्रवेत्तु
श्लेष्मस्रावेऽसौ विकारः प्रदिष्टः सन्निपातस्रावमाह त्रोषः संधौ संस्रवेद्यस्तु पक्वं पूयं स्रावः सर्वजः
सः समंतात् रक्तस्रावमाह रक्तस्रावः शोणितात्स्यो विकारो गच्छेदुष्णं तत्र रक्तं प्रभूतं पर्वणीका

भा०प्र०
३३६

माह तास्मात्तन्वाद्दाहपाको पपन्ना रक्तोज्ञेया पर्वणी ह तत्त्रोफा जातासंधौ कृष्णशुक्लेऽलजी स्यात्तस्मि
न्नेवं माह तां पूर्वलिंगैः अलजीमाह अलजी स्यादित्यादि तस्मिन्नेव कृष्णशुक्लयोरेव संधौ भेदा
र्थमाह पूर्वलिंगैः प्रमेहाधिकारलिखितैः रक्ताऽसिता स्फोटप्रचिता दारुणाऽत्वलजी भवेदिति वचनैः
आहता कथिता जंतुग्रंथिमाह जंतुग्रंथिर्वर्त्मनः पक्ष्मणश्च कंडूं कुर्युः जंतवः संधिजाताः नानारू
पा वर्त्मशुक्ला तत्संधौ गच्छंतस्तं तर्न्नै वचनैः हृषयंतः वर्त्मणः पक्ष्मणश्च संधिजाता इत्यन्वयः इति संधि
जा रोगाः अथ सर्वजा रोगाः तेषां नामानि संख्यां चाह संदाश्चतुष्का इह संप्रदिष्टाश्चत्वार एव हत
याधिमंथाः पाकस्सशोथः सचशोथ एव हा मेहताधिमंथो निर्येपर्ययश्च शुष्काक्षिपाकस्त्विह कीर्तितश्च
तथान्यतो वातवरतश्च दृष्टिस्तथाम्लाध्युषिता शिराणां मुत्पात तद्धर्षो च समस्तनेत्रे एवं समस्तनेत्रेषु
रामयाः दशास्सम्यच एषामिह प्रथकु वक्ष्येयथावल्लक्षणमपि तेषां अभिष्यंदाश्चत्वार इत्याह वातात्पि
त्तात्कफाद्रक्ताद अभिष्यंदश्चतुर्विधः प्रायेण जायते घोरः सर्वनेत्रामयाकरः घोर इति दुःसह वेदना

सर्वनेत्रामयाकर इति सर्वेषामेवनेत्ररोगाणामभिष्यंदानां माकरस्थानं उत्पत्तिकारकत्वादतए
वाहन्नुश्रुत: प्रायेणसर्वेनयनामयास्तेभवंत्यभिष्यंदनिमित्तमूला: इतितेषुवातिकमभिष्यंदमाह
निस्तोदनंस्तंभनरोमहर्षसंघर्षपारुष्यशिरोभितापा: विशुष्कभावा: शिशिराश्रुता चवाताभि
पन्नेनयनेभवंतिसंघर्षोकर्करिकावालुकाभि: पूरितइव शिरोभितापः शिरोभिमथा विशुष्कभा
वा: दूषिकाराहित्यं वाताभिपन्नेवातेनोपद्रुते पैत्तिकमभिष्यंदमाह दाहप्रपाकौशिशिराभिनंदा
धूमायनंबाष्पसमुद्भवश्च उष्णाश्रुतापीतकनेत्रताचपित्ताभिपन्नेनयनेभवंति शिशिराभिनंदा शी
तेनेच्छा धूमायनं नेत्राद्धूमोद्गमइव बाष्पसमुद्भव: उष्णस्राव: श्लैष्मिकमभिष्यंदमाह उष्णाभिनंदा
गुरुताक्षिशोथ: कंडूपदेहावतिशीतताच स्रावोमुहु: पिच्छिल एवचापि कफाभिपन्नेनयनेभ
वंति उपदेह: दूषीकयालिप्तता रक्तजमभिष्यंदमाह ताम्राश्रुतालोहितनेत्रता चाराज्य: समंता
दतिलोहिताश्च पित्तस्यलिंगानिचयानितानिरक्ताभिपन्नेनयनेभवंति अनुक्तसंग्रहार्थमाह

मा०प्र०
३३७

पित्तस्य लिंगानि चोपेतिकाभिष्यंदलिंगानि अधिमंथानामभिष्यंदजन्यत्वमाह वृद्धैरेतैरभिष्यंदैर्न
राणामक्रियावतां तावंतस्त्वधिमंथाः स्युर्नयनेतीव्रवेदनाः अधिमंथानां सामान्यलक्षणमाह उत्पाट्य
तइवात्यर्थं तथा निर्मथ्यते पि वा शिरसोऽर्द्धं तु तं विद्यादधिमंथं स्वलक्षणैः यथोक्तवातलक्षणाभि
ष्यंदलक्षणैः अधिमंथं विद्यात् अभिष्यंदेभ्योऽधिमंथानां भेदार्थमाह शिरसोऽर्द्धमुत्पाट्यत इवात
था निर्मथ्यतेऽपि चेति चतुर्ष्वप्यधिमंथेषु बोद्धव्यं शिरसोऽर्द्धवेदनान्याधिष्वभावात् सर्वाधिमंथोप
द्रात्मकोऽपावतां कालेन मिथ्याचाराद्दृष्टिं हंति तावत्तमाह हन्याद्दृष्टिं श्लैष्मिकः सप्तरात्राद्योऽधीमंथो
रक्तजः पंचरात्रात् षड्रात्राद्वावातिको वै विहन्यान्मिथ्याचारात्पैत्तिकः सद्य एव अत्र सद्यः त्र्यहेन
त्रिरात्रमप्युच्यते तंत्रांतरे त्रिरात्रवचनात् सशोथपाकमाह कंडूपदेहाश्रुयुतः पक्वोदुंबरसंनिभः सं
रंभी पच्यते यस्तु नेत्रपाके त्वशोथके शोथहीनानि लिंगानि नेत्रपाके त्वशोथजे लिंगानि कंड्वादीनि लो
हित्यंतानि हताधिमंथमाह उपेक्षणादक्षि यदाधिमंथो वाताधिकः शोषमतिप्रसह्य रुजाभि

क्ष्मपाली रसाध्यएषहस्ताधिमंथः खलुनामरोगः शोषयतिशोषयित्वानाशयति अतएववि
देहः तत्पश्चमिवसंशुष्काक्षिपाकोपहतंपक्ष्माक्षिकूटंभ्रुवमाश्रितस्तुयदानिलःसंचरतिप्रदु
ष्टः पर्य्यायशश्चापिरुजांकरोति तंवातपर्य्यायमुदाहरंतिवारंवपर्य्येतिभ्रुवौनेत्रेचमारुतः रुजा
श्चविविधास्ताव्रुः सतेनेयोवातपर्य्ययः यत्कूणितंदारुणरूक्षवर्त्मसंदृश्यतेचाविलदर्शनंच सुदा
रुणंयत्प्रतिबोधनेचशुष्काक्षिपाकोपहतंतदक्षितदक्षि कूणितेसंकोचितंमुद्रितमितियावत्
दारुणरूक्षवर्त्म दारुणंविकृतरूक्षेचवर्त्मयस्यतत् इदमक्ष्णोविशेषणं संदृश्यतेसदाहंभव
ति आविलदर्शनं आविलेनअनच्छस्यदर्शनंयेनतत् यत्प्रतिबोधनेउद्घाटनेसुदारुणंअतिशा
येनविकृतं अन्यतोवातमाह १७ यस्यावटूकर्णशिरोहनुस्थोमन्यागतोवाप्यनिलोऽन्यतोवा कु
र्य्याद्रुजंवैभ्रुविलोचनेचतमन्यतोवातमुदाहरंतिविदेहेनाप्युक्तंमन्याद्यामांतरेवापुरःस्थितः पृष्ठतो
पिवाकरोतिभेदंनिस्तोदंशंखेचाक्ष्णोर्भ्रुवोस्तथा तमाहुरन्यतोवातंरोगंदृष्टिविदोजनाः इति
ज

भा०प्र०
३३८

अम्लाध्युषितमाह १५ कृष्णं वा लोहितपर्यंतं सर्वमक्षि प्रपच्यते सदाहं शोफं ससास्रावमम्लाध्युषितम
म्लतः अम्लतः अम्लभोजनात् तथा च सुश्रुतः अम्लेन भुक्तेनेत्यादि शिरोत्पातमाह १६ अवे
दना वापि सवेदना वा यस्याक्षिराज्यो हि भवंति ताम्राः मुहुः विरज्यंति च ताः समंतात् इति शिरोत्पा
त इति प्रदिष्टः अक्षिराज्यः अक्षि शिराः विरज्यंति विकृतवर्णा भवंति शिराहर्षमाह १७ मोहा
च्छिरोत्पात उपेक्षितस्तु जायते रोगः स शिराप्रहर्षः ताम्राक्षि वा स्रस्रवति प्रगाढं तथा न शक्नोत्य
भिवीक्षितेच नेत्रस्य सामान्यलक्षणमाह उदीर्णवेदनं नेत्रं रागशोफसमन्वितं घर्षनिस्तोदशू
लाश्रुयुक्तमामान्वितं विदुः उदीर्णवेदनं उत्कटवेदनं घर्षः करकरिका एतल्लंघनादिविधा
नार्थमंजनादि निमेषधार्यं चोक्तं तथा च तंत्रांतरे सेकोद्वानानि चत्वारि लंघनं भोजनेरसः स्वादु
स्तिक्तश्च लेपाश्च वाष्पस्वेदनमेव च एतानि नेत्ररोगाणां समानां पावनानि हि अंजनं सर्पिषा पानं क
षायगुरुभोजनं नेत्ररोगेषु सामेषु स्नानं च परिवर्ज्जयेत् नेत्रस्य निरामतालक्षणमाह मंदवेदनता

कंडुसंरंभाश्रुपक्ष्मांतता प्रसन्नवर्णयोश्चाक्ष्णोर्निरामस्य च लक्षणं संरंभ नेत्रोष्म इति इति नेत्रजा रोगाः

अथ नेत्ररोगाणां चिकित्सा हेपाद मध्ये द्वे श्रुसत्निवेत्र त्रिशिरे गते ते बहुधा हि नेत्रे ताः प्रोक्षणे ॥

स्नादनलेपनाद्रीन्पाद प्रयुक्तानयनेनयंति प्रापयंति प्रोक्षणं अभ्यंग सेचनं उत्सादनं उद्वर्त्तनं म

लोष्मसंयुक्तमपीडनाद्येस्ता दूषयंते नयनानि दुष्टाः मजेन्म हा दृष्टिहितानि तस्मादुपानदभ्यंजन

धावनानि मलधूल्यादि मलादिभिः दुष्टाः ताश्शिराः नयनानि दूषयंत इत्यन्वयः चक्षुष्याः गोल

योगुरूपवामां सत्तु जांगलं पक्षिमांसं विशेषेण वास्तूकं तंडुलीयकं पटोलकर्कोटककारवे

ल्लफलानि सर्पिः परिपाचितानि तथैव वार्त्ताकुफलं नवीनं कनो हितं स्वादुरथापि तिक्तः क

टुम्लगुरुता द्राक्षा माष निष्पाव मेथुनं मद्य वह्नूर पिण्याक मत्स्य शाकं विरूढजं विदाह्यन्न

पानानि न हितान्यक्षिरोगिणे सेकश्चाश्च्योतनं पिंडी विडालस्तर्पणं तथा पुटपाकोंजनं चैभिः

कल्पैर्नेत्रमु[illegible]पाचरेत् कल्पाविधिः तत्र सेकविधिः सेकस्तु सूक्ष्मधाराभिः सर्वस्मिन्नपक्वे हितः मात्रि

भा० प्र०
३३८

तात्तस्य मर्त्यस्य प्रदेयस्तु रंगुलः सचापि स्नेहनो वाते पित्ते रक्ते च रोपणः लेखनस्तु कफे कार्य्यो
स्समात्रा निधीयते षड्भिर्वाचश्शतैः स्नेहे चतुर्भिस्से तु रोपणे तैस्त्रिभिर्लेखने कार्य्यः सेको नेत्रप्रसा
दने निमेषोन्मेषणं पुंसामंगुल्या छोटिकाथवा गुर्वक्षरोच्चारणं वा वाङ्मात्रेयं स्मृता बुधैः छोटिकावे
ष्टको इति लोके सेकस्तु दिवसे कार्य्यो रात्रौ चात्यंतिके गदे सपथ्या एरंडदलमूलत्वक्षु तमाजंप
योहितं सुखोष्णं नेत्रयोः सिक्तं वाताभिष्यंदनाशनं पथ्याद्यामलधायसफलवल्कलकल्केन सूक्ष्म
वस्त्रेण कृत्वा पोटलिकां तामहिफेनोत्थद्रवेण क्वांनिद्धीत लोचनेस्मात्सर्वाभिष्यंदसंक्षयः नृणांधूपो
गोपमृषिभिरुक्तोपड्पकाराय कारूणिकैः मुक्तापाणितलं धृष्ट्वा चक्षुषोयद्विलायते अचिरे
णैव तद्धारि तिमिराणि व्यपोहति स्नानं कृत्वा तिलैश्चापि चक्षुश्श्रमनिल्लापहं श्रामलैः सततस्नानं प
रं दृष्टिप्रसादनं त्रिफलायाः कषायस्तु धावनान्नेत्ररोगजित् कवलान्मुखरोगघ्नः पानतः कामलापहः
अपामार्गोत्तनविधिः ध्रापक्षीरद्रवस्नेह विन्दुनां पततुपातनं द्व्यंगुलोन्मीलिते नेत्रे प्रोक्तमाश्च्योतनं

हितत् विन्दवोष्टौ लेखने षड्रोपणे दश विंदवः स्नेहने द्वादश प्रोक्तास्ते त्रा तेकोष्णरूपिणः कवोष्णेतु
त्रीरुरूपाः स्युः व सर्वत्रैवैष निश्चयः वाते तिक्तं तथा स्निग्धं पित्ते मधुरशीतलं कफे तिक्तोष्णरूक्षं स्या
ह्मादाश्च्योतनं हितं आश्च्योतनानां सर्वेषां मात्रा स्याद्वचछतोन्मिता ततः परं लोचनाभ्यां भेत जाप
नयोमताः आश्च्योतनं न कर्तव्यं निशायां केनचित् क्वचित् तद्यथा विल्वादिपंचमूलेन वृहत्येरंड
शिग्रुभिः क्वाथ आश्च्योतने कोष्णो वाताभिष्यंदनाशनः त्रिफलाश्च्योतनं नेत्रे सर्वाभिष्यंदनाशनं
अथ पिण्डी विधिः युक्तभेषजकल्कस्य पिण्डो कवलमात्रया वस्त्रखण्डेन संवद्धोऽभिष्यंदद्व
एनाशिनी स्निग्धोष्णा पिंडिका वाते पित्ते स्याच्छीतला मता रूक्षोष्णा श्लेष्मणि प्रोक्ता विधिरुक्तो वुधै
रथम् सपथा एरण्डपत्रमूलत्वङ्निर्मिता वातनाशिनी धात्री विरचिता पित्ते शिग्रुपत्रकृता कफे
निंवपत्रकृता पिण्डी पित्तश्लेष्महरा भवेत् शुंठीनिंवदलैः पिण्डः सुखोष्णः स्वल्पसैंधवा धार्या नेत्रे
क्लिन्ने श्लेष्मशोथकण्डूव्यथाहरा त्रिफलापिण्डिका नेत्रे वातपित्तकफापहा पथ्याक्षामलकखारखस्व

भा०प्र०
३४०

ल्कले ऽहिफेनजलयुक्ता तेनरविचिता पिण्डीनाशयति सकलानभिष्यंदान् अथ विडालकविधिः
विडालको बहिर्लेपो नेत्रे पक्ष्मविवर्जिते तस्य मात्रा परिज्ञेया मुखलेपविधानवत् मुखलेपं य
था अंगुलस्य चतुर्थांशो मुखलेपः कनिष्ठकः मध्यमस्तु त्रिभागः स्यादुत्तमो र्द्धांगुलो भवेत् स्थिति
कालोपि तस्योक्तो यावल्कल्को न शुष्यति ते मापि गुणहीनं स्यात्तथा दूषयति त्वचं सयथा पथ्यागैरि
कसिंधूत्थदार्वीतार्क्ष्यैः समांशकैः जलपिष्टैर्बहिर्लेपः सर्वनेत्रामयापहः तार्क्ष्यं रसांजनं रसांज
नेन वा लेपः पथ्याबिल्वदलैरपि वचाहरिद्राविश्वैर्वा तथा नागरगैरिकैः अथ तर्प्पणविधिः वा
तातपरजोहीने वेश्मन्युत्तानशायिनः आधारौ माषचूर्णेन क्लिन्नेन परिमण्डलौ समौ दृढावसं
बाधौ कर्त्तव्यौ नेत्रकोशयोः पूरयेद्घृतमण्डेन विलीनेन सुखोदके सर्पिषा त्राक्त धौतेन क्षीरजेन श
तेन वा निमग्नान्यक्षिपक्ष्माणि यावत्स्युस्तावदेव हि पूरयेन्मीलिते नेत्रे ततउन्मीलयेच्छनैः निषष्नि
रेषः कथितः पुराणैस्तर्प्पणो विधिः पश्चात्कं परिशुष्कं च नेत्रे कुटिलमाविलं त्रणपक्ष्मत्रारोत्यातङ्क

च्छ्रोन्मीलनसंयुतं तिमिरार्ज्जुनशुक्राद्यैरभिष्यन्दाधिमन्थकैः शुष्काक्षिपाकशोथाभ्यामायुतं पवनप
र्य्ययैः तत्रस्थं तर्प्पयेत्सम्यक् नेत्ररोगविशारदः तर्प्पणं धारयेद्वर्त्मरोगे वाचां शतं बुधः स्वस्थे कफेसं
धिरोगे वाचां पंचशतानि च षट्शतानि कफे कृष्णरोगे सप्तशतानि हि दृष्टिरोगे शतान्यष्टौ वाधिमं
न्थेसहस्रकं सहस्रं वातरोगेषु धार्य्यमेवं हि तर्प्पणं तर्प्पणोपांगतः स्नेहस्रावयित्वाक्षिशोधयेत्
स्विन्नेन यवपिष्टेन स्नेहश्चर्य्येरितं ततः यथास्वधूमपानेन कफमस्य विरेचयेत् एकाहं वा त्र्यहं वापि
पंचाहं तर्प्पणं चरेत् तर्प्पणेत्तल्लिंगानि नेत्रस्यैतानि लक्षयेत् सुखस्वप्नावबोधत्वं वैशद्यं दृष्टिपा
टवं निवृत्तिर्व्याधिशान्तिश्च क्रियालाघवमेव च क्रियालाघवं नेत्रस्य क्रियायां निमेषोन्मेषादौ ल
घुता गुर्व्वाविलमतिस्निग्धमश्रुकण्डूपदेहवत् वर्षते दयुतं नेत्रमतितर्प्पितमादिशेत् अस्राव
शोफरागाद्युपदेहसमाकुलं रूक्षमस्राविलं रुग्णं नेत्रं स्याद्धीनतर्प्पितं अनयोर्दोषवाहुल्यात्युप
तेतश्चिकित्सितः रूक्षस्निग्धोपचाराभ्यामेतयोः स्यात्प्रतिक्रिया अनयोः अतितर्प्पितहीनतर्प्पितयोः

भा॰प्र॰ दुर्दिनात्युष्णशीतेषु चिंतायासभ्रमेषु च अशांतोपद्रवे चाक्ष्णि तर्प्पणं न प्रशस्यते सेन्नमोऽत्र मयं अ
३४९ थ पुटपाकविधिः द्वे बिल्वे स्निग्धमांसस्य परं द्रव्यपलं मतं द्रवस्य कुडवो मानं सर्वमेकत्र पेषयेत् त
देकत्र समालोड्य पत्रैः सुपरिवेष्टितं पुटपाकविधानेन ततस्स्वेदात्तद्रसं बुधः तर्प्पणोक्तेन विधिना य
थापि द्विनियोजयेत् दृष्टिमध्ये निषेक्तव्यो नित्यमुत्तानशायिना तेजास्यनिलमाकाशमादर्शं भास्वरा
णि च नेक्षेत तर्प्पिते नेत्रे यश्च वा पुटपाकवान् अथांजनविधिः अथ संपक्वदोषस्य प्राप्तमंजनमाच
रेत् अंजने क्रियते येन तद्द्रव्यं चांजनं मतं तद्यथा वटिकारसचूर्णानि त्रिविधान्यंजनानि हि कुर्या
ल्लेखनाक्षयोस्तुल्यहीनानि सुर्यथोत्तरं स्नेहनं रोपनं चापि लेखनं तत्त्रिधा पृथक् मधुरं स्नेहसंपन्नमंजनं
स्नेहनं मतं त्रिधा दृष्टमिति तत् वटिकारसचूर्णरूपं पृथक् प्रत्येकं त्रिधा स्नेहनं रोपणं लेखनं चेति
कषायतिक्तरसयुक् सस्नेहं रोपणं स्मृतं अंजने क्षारतिक्ताम्लरसैर्लेखनमुच्यते हरेणुमात्रां
कुर्वीत वर्तीर्लेखनांजने भिषक् प्रमाणं मध्यमे सार्द्धं द्विगुणं तु मृदौ भवेत् रसक्रियातु त्तमा स्यात् त्रि

विध्यंगमिता हिता मध्यमा द्विविडंगा साही नात्वेक विडंगिका शलाका: स्नेहने चूर्णे चतस्र: प्राक्
रंजने रोपणे तास्तु तिस्र: सुस्नेव भेलेषने स्मृते मुखयो: कुंचिताश्च द्वणा शलाका ऽष्टांगुलोन्मि
ता अश्मजा धातुजा वास्यात्कलायपरिमण्डला अपेकलाय वहस्तुला सुवर्णरजताद्भूता श
लाका स्नेहने स्मृता ताम्रलोहाश्मसंजाता शलाका स्नेहने स्मृता अंगुल्या तु मृदुत्वेन रोपणे रूषि
ता बुधै: अंजने केवलमपि शलाका विशेषमाह त्रिफला भृंगशुराठानां रसैस्तद्वत्सर्प्पिषा गोमू
त्रमधुजाज्यै: सिक्तो नाग: प्रतापित: तच्छलाका हरत्येव नेत्रा कलान्त्यपनामयान् दृष्टिप्रसादनी श
लाका कृष्णभागादध: कुर्य्यादपांगाद्वदंजनं हेमन्ते शिशिरे वापि मध्याह्नेंजनमिष्यते पूर्वाह्ने वा
पराह्ने वा ग्रीष्मे शरदि चेष्यते वर्षास्वनभ्रेनात्युष्णे वसन्ते तु सदैव हि प्रात:सायं च तत्कुर्य्यान्न चक्र
र्य्यास्तं दैव हि श्रान्ते प्रह्लादिते भीते पीतमद्ये नवज्वरे अजीर्णे वेगधाते च नांजनं संप्रशस्यते तत्र व
टासास्नेहनायथा धान्यकृष्णा वा जानि एक द्वित्रिगुणानि च पिष्टांवुना वर्तीं कुर्य्यादंजने हि हरे

भा० प्र०
३४२

णुकं नेत्रस्रावं हरत्याशु वातरक्तरुजं तथा अथ रोपणी रसांजनं हरिद्रे द्वे मालती निंबपल्लवाः गोश
कृद्रससंयुक्ता वटी नक्तांध्यनाशिनी एतस्याश्चांजने मात्रा प्रोक्ता सार्द्धहरेणुका अथ लेखना गुं
खना निर्विभीतस्य मज्जा पथ्या मनःशिला पिप्पली मरिचं कुष्ठं वचा चेति समांशकं छागक्षीरेण
संपिष्य वटीं कुर्याद्यवोन्मिता हरेणुमात्रं संघृष्य जनमाचरेत् तिमिरं मांसवृद्धिं च काचं पटलम
र्बुदं रात्र्यंध्यं वार्षिकं पुष्पं वटी चंद्रोदया हरेत् चंद्रोदया वटी पलाशपुष्पस्वरसेबहुभिः परिभा
विते करंजबीजं तद्वर्त्तिर्दृष्टेः पुष्पं विनाशयेत् पुष्पहरा वर्त्तिः अथ रसक्रिया स्नेहनाय यथा कत
कस्य फलं घृष्ट्वा मधुना नेत्रमंजयेत् ईषत्कर्पूरसहितं तत्स्यान्नेत्रप्रसादनं अथ रोपणे रसांजनं स्त्री
क्षीरं सोजातिपुष्पं मनःशिला समुद्रफेनं लवणं गैरिकं मरिचं तथा एतत्समांशं मधुना पिष्टं प्रक्लिन्नव
र्त्मनि अंजनं क्लेदकंडूघ्नं पक्ष्मणं च प्ररोहणं दुग्धेन कंडूं क्षौद्रेण नेत्रस्रावं च सर्पिषा पुष्पं तैले
न तिमिरं कांजिकेन निशांधतां पुनर्नवा हरत्याशु भास्करस्तिमिरं यथा वब्बूलदलनिःक्वाथो लेहो ३४२

१८

भूतस्तदंजनात् नेत्रस्रावोद्भवे छोषं मधुयुक्तान्न संशयः अथ लेखनी वटकी रेणसंयुक्तो मुष्ककर्पू
रजोरजः क्षिप्रमंजनतो हन्ति कुसुमं तु क्षिमा सिक्तं कौशसुलालासं धृष्टैर्मरिचैर्नेत्रमंजयेत् अतिनि
द्राममंयाति मनेः सूर्योदयादिव अथ चूर्णस्वेदनं यथा अग्नितप्तं हि सौवीरं निषिंचेत्त्रिफलारसैः
सप्तवेलं तथा स्तन्यैः स्नाणं सिक्तं विचूर्णितं अंजयेन्नेत्रनयने प्रत्यहं चक्षुषोरपि सर्वानक्षिविका
रास्तु हन्यादेतन्न संशयः अथ रोपणं त्रिफलामारसकं पिष्ट्वा समभागाह्यम्बवारिणि गृह्णीयात्तज्ज
लं सर्वं सिज्जेच्चूर्णमधो गतं शुष्कं च तज्जलं पर्पटी संनिभं भवेत् विचूर्ण्य भावयेत्सम्यक् त्रिवेलं
फलारसैः कर्पूररसरजस्तत्र दत्वा मांसेन निःक्षिपेत् अंजयेन्नयने तेन नेत्रारिवल्लणदच्छिदं अ
थ लेखनं दत्वा त्वक्क्षिलाक्षा चर्म्मरवचंदनं सैंधवैः चूर्णितेव च नं प्रोक्तं पुष्पामादि निकृन्तनं
अथ सामान्यांजनानि मुक्ताकर्पूरकाचागुरुमरिचकणासैंधवंस्रोतोंजनवालुतुरागीकंको
लंकोत्पत्रपुरजनिस्त्रिफलानूरवनाम्यामतुत्थं दक्षुंऽत्वक्क्षसाऽकुंकुमजपुत्तत्रिवाक्षातकंराज

स

वर्त्तज्जातीपुष्पंतुल्यस्याः कुसुममस्तिनवंबीजमस्यास्तस्यैव पूतीकनिंबांजनमजमुस्तंसतास्रसा
रंरंगनेयुक्तं प्रत्येकमेषांरवलुमाषकैकंपलेनपिष्यन्मधुनातिसूक्ष्मं नवंतिरोगानयनाश्रिता
पेनितांतमात्रोपचिताश्चतेषां विधीयतेत्रांतिरवम्पमेवमुक्ताद्विनानेनमहांजनेन एलवालुए
लवालुकनामाप्रसिद्धं कंकोलंसुगंधद्रव्यंतदलाभेजातीपुष्पंग्राह्यं तस्याप्यलाभेलवंगंग्रा
ह्यं कांतंपतद्भस्मरितंग्राह्यं नपुंरंगंतद्भस्मारितंग्राह्यं शिलानामनःशिला अ अं अ अंकं तद्भस्मारि
तं दक्षं त्वक् दक्षः कुक्कुटस्तस्यांडस्यत्वक् अक्षं विभीतकफलं तत्सहितंकृतंतद्बकुंकु
मं शिवाहरीतकी क्षौतकं यष्टीमधुराजवर्त्तरैवटा इतिलोके पूतिकः धोडावरंजः अंजनंसुर
मा इतिलोके नजमुस्तंनागरमुस्ततास्रसारंचमारितंग्राह्यं रसगंधस्यांजनं मुक्तादिमहांजनं
कणसलवणोषणासदरसांजनासांजनासरित्यतिकफः सितासितपुनर्नवासंनवारजन्य
रुणचंदनंमधुचतुल्यपथ्याशिला अरिष्टदलनुणावरस्फुटिकत्रांपनानोदंवः इमानितुविचूर्ण

यन्निविडवाससात्रोधयेत्ततोघस्विविमर्द्दयेत् समधुताम्रखंडेनतत् स्थंस्तुनिनिरीडितेन
यनन्त्राणनामांजनंकरोतितिमिरक्षयंपटलनघुष्टुननाचतत् लवणंसैंधवं अंजनंसुरमाद
तिलोके सरित्सतिकर्कः समुद्रफेन शिलामनः शिलानागवरः लोध्रः स्फुटिकापिस्टक
री ईंदुः कर्पूरः नयनन्त्राणंतिमिरे नूतनकुसुमेनूतनपटलेचा दरीतकीचचाक्षुष्टंपि
प्पलीमरिचानिच विभीतकस्थमज्जाचनूमवना निर्मनः शिला सर्वमेतत्समंकृत्वागव्यक्षी
रेणपेषयेत् नाशयेतिमिरंकराडूपटलान्यर्बुदानिच अपित्रिवार्षिकंशुक्रंमासेनैकेननना
शयेत् अधिकानिचमांसानिराशावंधत्वमेवच चन्द्रोदयावटी प्रथेतिमिरे रजनीनिंव
पत्राणिपिप्पलीमरिचानिच विडंगनडमुस्तंचसमभात्वनयास्मृता अजामूत्रेणसंपिष्य
छायायांशोषयेद्वटी वारिणातिमिरंहंतिगोमूत्रेणतुपिश्चकं मधुनापटलंहंतिनारीक्षी
रेणपुष्पकं एषाचंद्रप्रभावर्त्तिः स्वयंरुद्रेणनिर्मिता चंद्रप्रभावर्त्तिः कणाछागयक्ष्ठ

ना०प्र०
२४४

मध्येपत्वातद्सर्पिषिता अचिराद्धंतिनक्तांध्यंतत्स्मृतेऽस्तूषणं त्रिफलायाःरसप्रस्थंभृंग
राजरसस्यच वृषस्यचरसप्रस्थंशतावर्याश्चतत्समं गुडूच्याश्चामलक्याश्चरसंछागीपयस्तथा
प्रस्थंप्रस्थंसमाहृत्यसर्वैरेभिर्घृतंपचेत् कल्कःकणासिताद्राक्षात्रिफलानीलमुत्पलं मधुकं
क्षीरकाकोलीमधुपर्णीनिदिग्धिका तत्साधुसिद्धंविज्ञायशुभेभांडेनिधापयेत् ऊर्ध्वपानम
धःपानंमध्येपानंचशस्यते यावंतोनेत्रजारोगास्तान्सर्वानपकर्षति सरक्तेरक्तदुष्टेचरक्ते
चातिस्रुतेतथा नक्तांध्येतिमिरेकाचेनीलिकापटलार्बुदे अभिष्यंदेऽधिमंथेचपक्ष्मकोपे
सुदारुणे नेत्ररोगेषुसर्वेषुदोषत्रयकृतेष्वपि परंहितमिदंप्रोक्तंत्रिफलाद्यंमहाघृतं भृंग
रजःभृंगराजः भृंगरजोभृंगराजइतिनिघंटेः क्षीरकाकोल्यास्मलाभे अश्वगंधामूलंग्रा
ह्यं मधुपर्णी अत्रजलयष्टीमधुचक्षुष्यत्वात् तदलाभेसामान्ययष्टीमधुग्राह्यं तुल्यगुणत्वा
त् त्रिफलाद्यंघृतं ग्रामेकंहरीतक्याद्विगुणंचविभीतकं चतुर्गुणंत्वामलकंहृषंमार्कं

२४४
२२

वयोःसमं चतुर्गुणोदकं दत्वा शनैर्मृद्वग्निना पचेत् नागं चतुर्थसंरक्ष क्वाथं तमवतार
येत् शर्करामधुकं द्राक्षा मधुयष्टिनिशाग्धिका काकोली क्षीरकाकोली त्रिफला नागके
शरा पिप्पली चंदनं मुस्तं त्रायमाणा तयोः समं घृतप्रस्थं समं क्षीरं कल्केरेतैः शनैः शनैः पचेत्
हन्यात्सतिमिरं काचं नक्तांध्यं शुक्रमेव च तथास्रावं च कंडूं श्लेष्मपित्तं च रूक्षायतां कलुषत्वं
च नेत्रस्य विड्भ्रंशं पटलाश्रितं बहुनात्र किमुक्तेन सर्वान्नेत्रामयान्हरेत् यस्य चोपहता दृष्टिः
सूर्याग्नि न्याप्रपन्नपतः तस्मैतद्भेषजं प्रोक्तं मुनिभिः परमं हितं मार्ज्जितं दर्प्पणं च स्वयं निर्म
लतां व्रजेत् तद्वदेतेन पीतेन नेत्रं निर्मलतामियात् वारिशेणद्वयं चात्र दृष्टमार्कवयस्तुले
काकोलीयुगलालामेऽश्वगंधामूले हि द्विगुणेऽष्टाहं छित्वा यं त्रिफलाघृतं वासा विश्वामृतं दा
वेरु चंदनं चित्रकैः भूनिंबनिंबकटुकापटोलत्रिफलांबुदैः शिग्रुकलिंगाकुरजैः
क्वाथः सर्वाक्षिरोगहा वैश्वर्यं पानसंभास्तांभूतां नाशयति ध्रुवं वासकादिक्वाथः इति

भा०प्र०
३४५

नेत्ररोगाधिकारः अथकर्णरोगाधिकारः तत्रकर्णरोगाणांनामानिसंख्यांच कर्णशूलंप्रण
दश्चबाधिर्यंक्ष्वेडएवच कर्णस्रावंकर्णकण्डूकर्णगूथस्तथैवच प्रतिनाहोजंतुकर्णोविद्र
धिर्द्विविधस्तथा कर्णपाकःपूतिकर्णस्तथैवार्शश्चतुर्विधं तथार्बुदंसप्तविधंशोफश्चापिच
तुर्विधः एतेकर्णगतारोगाअष्टाविंशतिरीरिताः तेषुकर्णशूलस्यसंप्राप्तिपूर्वकंलक्षणमा
ह समीरणःश्रोत्रगतोन्यथाचरन्समंततःशूलमतीवकर्णयोः करोतिदोषैश्चयथास्वमाहृतः
सकर्णशूलःकथितोदुराचरः अन्यथाचरन्प्रतिलोमंचरन् दोषैःपित्तकफरक्तैः ररक्तस्या
पिरुजादिकर्तृत्वेनदोषसाम्याद्दोषत्वमत्रयथास्वं यथात्मीयनिदानकुपितैः अथवायथा
स्वमितिशूलविशेषणं दुराचरःदुरुपचरः मूर्छाद्युपद्रवसंसर्गात्कर्णशूलस्यासाध्यतांचाह
मूर्छामोहोज्वरःकासःक्लमोऽथवमथुस्तथा उपद्रवाःकर्णशूलेनवंस्पेतेमरिष्यतः कर्णना
दस्यलक्षणमाह कर्णश्रोत्रस्थिवातेनशृणोतिविविधान्स्वरान् भेरीमृदंगशंखानांकर्णना

३४५

23

दः स उच्यते नेष्यादिशृंगादीनामप्युपलक्षणं बाधिर्य्यमाह यदा शब्दवहं वायुः स्रोत्रमावृत्य ति
ष्ठति शुद्धः श्लेष्मान्वितो वापि बाधिर्य्यं तेन जायते असाध्यबाधिर्य्यमाह बाधिर्य्यं बालवृद्धोत्थं चि
रोत्थं च विवर्ज्जयेत् क्ष्वेडमाह ७ वायुः पित्तादिभिर्युक्तो वेणुघोषसमस्वनं करोति कर्णयोः क्ष्वे
डं कर्णक्ष्वेडः स उच्यते क्ष्वेडशब्दार्थमनक्ति वेणुघोषसमस्वनमिति यत उक्तं क्ष्वेडनं वे
णुघोषवदिति ननु कर्णनादकर्णक्ष्वेडयोः को भेद उच्यते कर्णनादः केवलेन वातेन जन्यते
तत्र नाना शब्दं शृणोति कर्णक्ष्वेडस्तु पित्तादियुक्तेन वातेन जन्यते तत्र नियमेन वेणुघोषमे
व शृणोतीति भेदः कर्णस्रावमाह ५ शिरोभिघातादथवा निमज्जतो जले प्रपाकादथवा
पि विद्रधेः स्रवेद्धि पूयं श्रवणोऽनिलार्दितः स कर्णसंस्राव इति प्रकीर्तितः पूयमित्युपल
क्षणं जलेरसं च स्रवेत् श्रवणशब्दः पुल्लिंगोऽप्यस्ति कर्णकण्डूमाह ६ मारुतः कफसंयु
क्तः कर्णे कण्डूं करोति हि कर्णगूथमाह ७ पित्तोष्मशोषितः श्लेष्मा जायते कर्णगूथकः स

मा॰ पृ॰
३४६

कर्णगूथो द्रवतां यदागतो विलापितो घ्राणमुखं प्रपद्यते तदा स कर्णप्रतिनाहसंज्ञितो भवेद्वि
कारः शिरसोर्द्धभेदकृत् अर्द्धावभेदकार्धशिरोरोगकृत् कृमिकर्णमाह ९ यदा तु मूर्छ्छ
त्यथवा तु जंतवः सृजंत्यपत्यान्यथवापि माक्षिकाः तदंजनत्वाछ्रवणो निरुच्यते भिषग्भिराद्यै
: कृमिकर्णकोगदः तदंजनत्वात् कृमिलक्षणत्वात् श्रवणः कृमिकर्णकोगदो निरुच्यते द्र
त्यन्वयः पतंगादिषु कर्णप्रविष्टेषु लक्षणमाह पतंगाः शतपद्यश्च कर्णस्रोतः प्रविश्य हि अ
रतिं व्याकुलत्वं च भृशं कुर्वंति वेदनां कर्णो निःस्तुद्यते तस्मात् वातफेरफरायते कीटे चरति रु
क्तौ स्पंदिते मंदवेदना निःस्पंदे निश्चले द्विविधं कर्णविद्रधिमाह क्षताभिघातप्रभवस्तु वि
द्रधिर्भवेत्तथा दोषकृतोपरः पुनः सरक्तपीतारुणमस्रमास्रवेत्प्रतोदधूमायनदाहचोषवान्
क्षतप्रभवो ऽभिघातप्रभवश्च तयोर्द्वयोरप्यागंतुजत्वादैक्यं कर्णपाकमाह १२ कर्णपाक
स्तु पित्तेन कोथविक्लेदकृद्भवेत् कोथः पूतिभावः विक्लेदः आर्द्रता पूतिकर्णमाह १३ क

३४६

२४

णे विद्रधिपाके नस्य कर्णे वारिपूरणात् पूयं स्रवति यः पूतिः संज्ञेयः पूतिकर्णकः कर्णस्रावो
क्लेदार्थमाह पूतीति नियमेन पूतिर्यथा स्यादेवं स्रवति कर्णगतानां रोगाणामर्बुदानामर्शसां लक्षण
माह कर्णरोगाणामर्बुदानामर्शसां जातानां यथोक्तलक्षणैः कर्णरोगाश्च चत्वारो वातपित्तकफर
क्तजाः एवमर्शोऽपि चतुर्विधं शेषाणां रोगाणामर्शसां चात्र संभवश्चा धरणया वात् अर्बुदं
सप्तविधं वातपित्तकफरक्तमांसमेदःशिराजं एते कर्णरोगाश्चाष्टविंशतिः सुश्रुतोक्ता उक्ता
ः इदानीं चरकोक्तं वरं कर्णरोगचतुष्टयं वातपित्तकफसन्निपातकृतमाह तत्र वातजमा
ह नादोऽतिरुक् कर्णतले तु शोषः स्रावस्तनुश्चाश्रवणं तु वातात् अतिरागेण नादो व्यथा च
तनुः अल्पः श्रवणं न्यूनश्रुतिः पित्तजमाह शोथः सरागो दरणं विदाहः सपूतिपीतश्रवणं च
पित्तात् कफजमाह वैश्रुत्यकण्डू स्थिरशोथशुक्लस्निग्धश्रुतिः स्वल्परुजः कफाच्च वैश्रु
त्यमन्यथाश्रवणं त्रिदोषजमाह सर्वाणि रूपाणि च सन्निपातात् स्रावश्च तत्राधिकदोषवर्णः

मा॰पु॰
३४७

आधिक्यदोषवर्णं इति सर्वदोषवर्णः कर्णपाल्याः कर्णवेधनत्वात् हि कारमप्येतेवाह तत्रसनि
द्दानं परिपोटकलक्षणमाह सौकुमार्याच्चिरोत्सृष्टे सहसैवातिवर्द्धिते कर्णे शोफो भवेत्पाल्यांसास्य
भवेत् श्यावो दाहपाकरुजान्वितः रक्तो वा रक्तपित्ताभ्यामुत्पात सरुजः परिपोटकः कृष्णारु
णनिभस्तब्धः सवातात्परिपोटकः गुर्वाभरणसंयोगात्ताडनाद्घर्षणादपि शोथः पाल्यौंदः स्मृतः ग
उन्मंथकमाह कर्णे बलाद्वर्द्धयतः पाल्यां वायुः प्रकुप्यति कफं संगृह्य कुरुते शोफं स्तब्धमवे
दनं उन्मंथकः सकण्डूको विकारः कफवातजः अवेदनं ईषद्वेदने दुःखवर्द्धनमाह संवर्द्ध
माने दुर्विद्धे कण्डूदाहरुजान्वितः शोथो भवति पाकश्च त्रिदोषो दुःखवर्द्धनः संवर्द्धमाने दुर्वि
द्धे कर्णे इति शेषः परिलेहिनमाह कफासृक्कृमयः क्रुद्धाः सर्षपा नातिसारिणः कुर्वन्ति पिडकाः पा
ल्यां कंडूदाहसमन्विताः कफासृक्कृमिसंभूतास्स विसर्पन्नितस्ततः लिह्यात्सशष्कुलीं पाली प
रिलेही च स स्मृतः सः पिडकात्मकः परिलेहीसंज्ञो व्याधिः लिह्यात् निर्मांसी कुर्यात् अथ कर्ण

३४७

रोगाणां चिकित्सा कर्णशूले कर्णनादे बाधिर्ये क्ष्वेड एव च चतुर्ष्वपि च रोगेषु सामान्यं भेषजं
स्मृतं शृंगवेरं च मधु च सैंधवं तैलमेव च कदुष्णं कर्णयोर्देयमेतत्स्याद्वेदनापहं लशुना
र्द्रकशिग्रूणां वारुण्या मूलकस्य च कदल्याः स्वरसः श्रेष्ठः कदुष्णः कर्णपूरणे वारुणि वरुण
सेहुंड वरुणाकौ अर्कांकुरानम्लपिष्टान्सतैलाल्लवणान्वितान् संनिदध्यात्स्नुहीकांडे को
ष्ठे मृत्स्नयावृते पुटपाकक्रमस्विन्नं पीडयेद्रसमागतं सुखोष्णं तद्रसं कर्णे प्रक्षिपेच्छू
लशांतये अर्कस्य परिणतमपीतमाज्येन लिप्तं शिखिनो प्रतप्तं आपीड्य तस्यांबु सुखोष्ण
मेव कर्णे निषिक्तं हरते च शूलं तीव्रशूलातुरे कर्णे सशब्दे क्लेदवाहिनि छागमूत्रं प्रश
स्तं कोष्णं सैंधवसंयुतं तैलं श्योनाकमूलेन मंदाग्नौ विधिना शृतं हरेदाशु त्रिदोषोत्थं क
र्णशूलं प्रपूरणात् हिंगुसैंधवशुंठीभिस्तैलं सर्षपसंभवं विपक्वं हरते तूर्णं कर्णशूलं प्रपू
रणात् कर्णशूले कर्णनादे बाधिर्ये क्ष्वेडकर्मणि पूरणं कटुतैलेन हितं वातघ्नमौषधं त्रि

खदिरक्षारजवाक्षारातर्कस्नुकेनसाधितंस्तैलं अपहरतिकर्णनादंवाधिर्य्यंचापिपूरणतः त्रिख
राश्वापामार्गः गवांमूत्रेणपिष्ट्वानिपिष्टुंतैलंविपाचयेत् सजलंचसदुग्धंचतद्वाधिर्य्यहरंप
रं क्षारसत्राजंग्राहो विल्वतैलंविडंगानि कर्णस्रावेपूतिकर्णेतथैवक्रमिकर्णके सामान्यंक
र्मकुर्वीतयोगान्वैत्रेषिकानपि स्वर्जिकाचूर्णसंयुक्तंवाजपूररसंक्षिपेत् कर्णस्रावरुजादा
हंतेननस्यस्ससंत्रायं आम्रजंबूप्रवालानिमधुकस्यवटस्यच एभिस्तुसाधितंतैलंपूतिकर्णग
दंहरेत् जातीपत्ररसैस्तैलंविपक्कंपूतिकर्णजित् धूमंरसांजनंनार्य्याः क्षीरेणक्षौद्रसंयुतंप्र
शस्तेचिरोत्थेतुतस्रावेपूतिकर्णिके कुष्टहिंगुवचादारुशताह्वाविश्वसैंधवैः पूतिकर्ण
पहंतैलंवस्तमूत्रेणसाधितं कुष्टादितैलम् शंबूकस्यतुमांसेनकटुतैलंविपाचयेत् तस्यपूरण
मात्रेणकर्णनाडीप्रशाम्यति चूर्णेनगंधकशिलारजनीभवेनसूक्ष्मत्राकेनकटुतैलमल्लाष्टकेन
धत्तूरपत्ररसतुल्यमिदंविपक्कंनाडीजयेच्चिरभवामपिकर्णजातां मुष्टिःपलं क्रमिकर्णविनाशा

यकृमिघ्नीं कारयेत्क्रियां वार्त्ताकुधूमश्च हितः सार्षपस्नेह एव च पूरणं हरितालेन गव्यमूत्र
युतेन च धूपने कर्णदौर्गंध्ये गुग्गुलुः श्रेष्ठ उच्यते चिकित्सा कर्णनाडीनां तथा कर्णार्शसाम
पि कर्णार्बुदानां कुर्वीत नाड्यर्शोर्बुदवद्भिषक् अथ कर्णपालीविकाराणां चिकित्सा पाली
संशोषणे कुर्य्याद्वातकर्णरुजः क्रियां स्वेदयेद्यत्नतस्तां च स्विन्नां संवर्द्धयेत्तिलैः शताव
रीवाजिगंधापयस्यैरंडबीजकैः तैलं विपक्वं सक्षीरं पालीनां संवर्धयेत्सुखं यपस्यात्रक्षीरका
कोली शतावरी तैलं जीवनीयस्य कल्केन तैलं दुग्धेन पाचयेत् चिकित्सेत्तेन तैलेन हत्वा
संपरिपोटकं शीतैर्लेपैर्जलौकाभिरुत्पातं समुपाचरेत् फलिनीसुरसामांसंचगोधाकंकव
सान्वितं तैलं विपक्वमभ्यंगादुन्मंथं नाशयेद्ध्रुवं दुःखवर्द्धनकं सिक्तां जंब्वाम्राश्वत्थपत्रजै
: क्वाथैस्तैलेन सुस्निग्धं तच्चूर्णैश्चावधूलयेत् वकुत्रागोमयैस्तप्तैः स्वेदितं परिलेहितं धनसा
रैः समालिंपेद्गजामूत्रेण कल्कितैः इति कर्णरोगाधिकारः अथ नासारोगाधिकारः तत्र ना

ना०प्र०

३४८

सारोगाणां नामानि संख्यां चाह आदौ च पीनसः प्रोक्तः पूतिनास्यस्ततः परं नासापाकोऽत्रशोणितः पू
यशोणितश्चैव च क्षवथुर्भ्रंशथुर्दीप्तिः प्रतीनाहः परिस्रवः नासाशोषः प्रतिश्यायाः पंच सप्तार्बु
दानि च चत्वार्यर्शांसि चत्वारः शोफाश्चत्वारि रक्तपित्तानि च रक्तपित्तानि नासायां चतुस्त्रिंशद् रुदा
स्मृताः तेषु पीनसस्य लक्षणमाह आनह्यते शुष्यति यस्य नासा प्रक्लेदमायाति च धूप्यते च न
वेत्ति यो गंधरसांश्च जंतुर्जुष्टं व्यवस्येत्तमपीनसेन आनह्यते श्वासनिरोधितकफेन आव
ध्यते आवरुध्यते इति यावत् प्रक्लेदं आर्द्रतां धूप्यते संताप्यते गंधरसान् गंधान् सुरभीन् असुर
भीन् सुगन्धवेत्ति नासायामानहत्वे तत्र हेतुः तथा रसान् मधुरादींश्च न वेत्ति नासारोगारंभक
दोषेण रसनाया अपि दुष्टेः व्यवस्येत् जानीयात् अपीनसः पीनसो द्वावपात्रिष्टेस्तः अवा
प्यारैरसेन ह्यदिष्टा दोषे तिस्रस्ते विकल्पेनाकारलोपात् अनुक्तसंग्रहार्थमाह तं चानिल
श्लेष्मभवं विकारं ब्रूयात् प्रतिश्यायसमानलिंगं ते विकारं पीनसं प्रतिश्यायसमानलिंगं वात

३४८

श्लेष्मिकप्रतिश्यायतुल्यलक्षणं पूतिनस्यमाह १ दोषैर्विदग्धैर्गलतालुमूलात्संदूषितो यस्य
समीरणस्तु निरेति पूतिर्मुखनासिकाभ्यां तं पूतिनस्यं प्रवदन्ति रोगं दोषैः पित्तकफरक्तैः अ
त्र रक्तस्यापि दोषत्वं दोषसाहचर्यात् विदग्धैर्दुष्टैः संदूषितः पूतिभावं नीतः पूतिनस्यं नासायां
भवो नस्यः वायुः पूतिर्नस्यो यत्र स पूतिनस्यः तं नासापाकमाह घ्राणाश्रितं पित्तमरूंषि कुर्याद्य
स्मिन्विकारे बलवांश्च पाकः तं नासिकापाकमिति व्यवस्येद्विक्लेदकोथावपि यत्र विक्ले
दः आर्द्रता कोथः पूतिभावः पूयरक्तमाह दोषैर्विदग्धैरथवापि जन्तोर्ललाटदेशेऽभिहतस्य तैस्तैः
नासास्रवेत्पूयमसृग्विमिश्रं तं पूयरक्तं प्रवदन्ति रोगं क्षवथुमाह घ्राणाश्रिते मर्मणि संप्रदुष्टे य
स्यानिलो नासिकया निरेति कफानुयातो बहुशोऽतिशब्दस्तं रोगमाहुः क्षवथुं गदज्ञाः घ्राणाश्रि
ते मर्मणि शृंगाटके दोषजक्षवथुमभिधायागन्तुजं क्षवथुमाह तीक्ष्णोपयोगादतिजिघ्रतो वा
भावान्कटूनर्कनिरीक्षणाद्वा सूत्रादिभिर्वा तरुणास्थिमर्मण्युद्घर्षितेऽन्यः क्षवथुर्निरेति तीक्ष्णो

पयोगात्स्वरात्तिकादिनकृणात् अर्कनिरीक्षणात् नेत्रकफविलयनात् तरुणास्थिनासावंशा
स्थिमर्मणि शृंगाटकेश्ठहेतैकत्वं अन्यः आगंतुजः नेत्रानाहमाह प्रत्रपते नासिकयातु यस्य
संगोविदग्धोलवणः कफस्तु प्राक्संचितोमूर्द्ध निपित्ततप्तंतं नासाशोषमुदाहरंति दीप्तमाह
घ्राणे भृशंदाहसमन्वितेतु विनिःसरेद्धूमइवेहवायुः नासाप्रदीप्तेव चयस्य जंतोर्व्याधिंतुतंदीप्त
मुदाहरंति प्रदीप्तेव प्रज्वलितेव प्रतीनाहमाह ८ उच्छ्वासमार्गंतु कफःसवातो रुंध्यात्प्रती
नाहमुदाहरेत्तं स्रावमाह घ्राणाद्घनःपीतसितस्तनुर्वा दोषःस्रवेत्स्रावमुदाहरेत्तं नासाशोष
माह १० घ्राणाश्रितेश्लेष्मणिमारुतेन पित्तेनगाढंपरिशोषितेच कृच्छ्राच्छ्वसत्यूर्ध्वमधश्चजंतुर्य
स्मिन्सनासापरिशोषउक्तः अथप्रतिश्यायमाह १५ तस्यनिदानंद्विविधं एकंसद्योजनकंतद
लवत्त्वेन चयं नापेक्षते यत्तउक्तं नकेवलंचयंप्राप्य दोषाःकुप्यंति देहिनां असदापिहि कुप्यंति
हेतुबाहुल्यतोरणाच्च हेतूनांबाहुल्येनत्वराकरणात् अपरंचयादिक्रमेणजनकं चयादि

क्रमेण यथा निदानात्संचयः संचयात्प्रकोपः प्रकोपात्प्रसरः प्रसरात्स्थानेसंश्रयः ततोभिव्यक्ति
: ततो भेद इति तत्र प्रतिश्यायस्य सद्यो जनकं निदानपूर्वकं संप्राप्तिमाह संधारणाजीर्णर
जोति भावक्रोधर्तुवैषम्यशिरोभितापैः संजागरतिस्वपनांबुशीतावश्यायकैर्मैथुनबाष्प
सेकैः संस्त्यानदोषे शिरसि प्रवृद्धो वायुः प्रतिश्यायमुदीरयेत्तु संधारणं मूत्रपुरीषधारणं
रजो धूलिः तच्च नासाप्रविष्टहेतुः ऋतुवैषम्यं ऋतुचर्या विपरीताचरणं शिरोभितापः
शिरसोभितापो येन धूमादिना सः अवश्यायस्तुषारः बाष्पसेको रोदनं संस्त्यानदोषे शि
रसि संहतकफे चयादिक्रमेणो जनकनिदानपूर्विकां संप्राप्तिमाह चयंगता मूर्ध्नि मारु
तादयः पृथक्समस्ताश्च तथैव शोणितं प्रकुप्यमाणा विविधैः प्रकोपणैस्ततः प्रतिश्यायक
रा नवंति हि पूर्वरूपमाह क्षवप्रवृत्तिः शिरसोभिपूर्णतास्तंभोङ्गमर्दः परिहृष्टरोमता
उपद्रवाश्चाप्यपरे पृथग्विधाः धूाणं धूमायनं तालुविदरं नृणां प्रतिश्यायपुरःसरा मताः शि

मा०प्र० रसो निपूर्णता शिरसो गौरवेण वमाम्मि उपद्रवाश्चाप्यपर इति उपद्रवास्तत्कालभाविनो रोगाः

३५१ अमरेष्टपञ्चविधाः घ्राणधूमायनतालुविदरणनासामुखस्रावादयो विदेहोक्ताः बाधकाः

वातिकस्य प्रतिश्यायस्य लक्षणमाह आनद्धा पिहिता नासा तनुस्रावप्रसेकिणी गलता

ल्वोष्ठशोषश्च निस्तोदः शंखयोस्तथा भवेत्स्वरोपघातश्च प्रतिश्याये निलात्मके आनद्धा

स्तब्धा अपिहिता नपिहिता अपिहिता अत एव तनुस्रावप्रसेकिनी पैत्तिकमाह उष्णः स

पीतकः स्रावो घ्राणात्स्रवति पैत्तिके कृशोऽतिपाण्डुः संतप्तो भवेत्तृष्णाग्निपीडितः नासया तु

सधूमाग्निं वमतीव स मानवः सपीतकः ईषत्पीतकः श्लैष्मिकमाह घ्राणात्कफकृते श्वेतः क

फः स्रावः प्रवर्तते शुक्लावभासः शूनाक्षो भवेद्गुरुशिरो नरः गलताल्वोष्ठशिरसां कण्डुभि

रतिपीडितः सान्निपातिकमाह भूत्वा भूत्वा प्रतिश्यायो योऽकस्मात्संनिवर्त्तते संपक्वो वाप्य

पक्वो वा स सर्वप्रभवः स्मृतः अत्र यद्यपि दोषत्रयलिंगानि नोक्तानि तथापि त्रिदोषजत्वा

३५१

२१

तु असाध्यमसाध्यः अत एवाह नृणां दुष्टः प्रतिश्यायः सर्वजश्च न सिध्यति दुष्टप्रतिश्याय
लिंगमाह प्रक्लिद्यति मुहुर्नासा पुनश्च परिशुष्यति पुनरानह्यते वापि पुनर्विव्रियते तथा
निश्वासो वापि दुर्गन्धो नरो गन्धान्न वेत्ति च एवं दुष्टं प्रतिश्यायं जानीयात्कृच्छ्रसाधनं
आनह्यते विबद्धो भवति विव्रियते अविबद्धः स्यात् क्लेदशोषविबंधानेककालं न भ
वति किंतु पर्यायपर्यायदोषाधिकं भवति तदा तदा तद्दोषकृतः स सर्वोद्भवदुष्ट इति न
विरोधः कृच्छ्रसाधनं असाध्यं कष्टसाध्यं च रक्तजमाह रक्तजे तु प्रतिश्याये रक्तस्रावः
प्रवर्त्तते पित्तप्रतिश्यायकृतैर्लिंगैश्चापि समन्वितः ताम्राक्षश्च भवेज्जन्तुरुरोघातात्प्रपी
डितः दुर्गन्धोच्छ्वासवक्त्रश्च गन्धानपि न वेत्ति सः उरोघातप्रपीडितः उरोघातेनेव प्रपीडि
तः अप्रतीकारेण कालान्तरे सर्वएव प्रतिश्याया असाध्या भवंतीत्याह सर्वएव प्रतिश्या
या नरस्याप्रतिकारिणः दुष्टतां यान्ति कालेन तदासाध्या भवंति च प्रतिश्यायेषु कृमयोऽपि

मा०पु०
३५२

भवंतीत्याह मूर्छंतीति कृमयश्चात्र श्वेताः स्निग्धास्तथाणवः कृमितोयः शिरोरोगस्तुस्मंतेनात्र
लक्षणं अत्र एषुप्रतिश्यायेषु कफस्यप्राधान्यात्सर्वेषुप्रतिश्यायेषुकफजा एव कृमयो भवंतीति
श्वेता स्निग्धाश्चह्रस्वाप्रतिश्यायाः अपरानपि विकारान्कुर्वंतीत्याह बाधिर्यमांध्यमघ्र
त्वं घोरांश्चनयनामयान् शोथाग्निमांद्यकासादीन्वृद्धाः कुर्वंति पीनसाः घोरांश्चनयना नाम
यानिति वचनेप्यांध्यग्रहणं विशेषार्थं अघ्रत्वं नजिघ्रतीत्यघ्रः तस्य भावो घ्रत्वं तत्रपीनस
मारभ्यप्रतिश्यायपर्यंतं पंचदशरोगाः उक्ताः अपरान् चतुस्त्रिंशत्संख्यापूरणायाह अर्बुदं स
सधाशोथाः चत्वारोऽर्शश्चतुर्विधं चतुर्विधं रक्तपित्तमुक्तं घ्राणे पित्तं हि दुः अर्बुदानि सप्त
वातपित्तश्लेष्मसन्निपातरक्तमांसमेदोजानि शोथाश्चत्वारो वातपित्तश्लेष्मसंनिपातजाः
अर्शांसि चत्वारि वातपित्तश्लेष्मसन्निपातजानि रक्तपित्तानि चत्वारि वातपित्तश्लेष्मसन्नि
पातजानि एतानि यथोक्तलिंगानि घ्राणेपि भवंति चिकित्साभेदात्पीनसस्यामस्य लक्ष ३५२

३०

एणमाह शिरोगुरुत्वमरुचिर्नासास्रावस्तनुःस्वरः क्षामः ष्ठीवति चाभीक्ष्णमामपीनसलक्ष
णं नासास्रावः तनुस्वरः क्षामश्चस्यन्वयः पक्वस्यपीनसस्यलक्षणमाह आमलिंगान्वि
तः श्लेष्मा घनः खेषु निमज्जति स्वरवर्णविशुद्धिश्च पक्वपीनसलक्षणं आमलिंगान्वितः
श्लेष्मा आमलिंगैः शिरोगुरुत्वादिभिर्युक्तः पश्चात् घनः निविडः अथ च खेषु नासारं
ध्रेषु निमज्जति सक्तो भवति वर्णविशुद्धिः श्लेष्मणः पक्वत्वर्णता अथ नासारोगाणां चि
कित्सा सर्वेषु सर्वकालं पीनसरोगेषु जातमात्रेषु मरिचं गुडेन दध्ना भुंजीत नरः सुखं ल
भते कट्फलं पौष्करं शृंगी व्योषं यासश्च कारवी एषां चूर्णं कषायं वा दद्यादार्द्रकजैरसैः पी
नसे स्वरभेदे च तमके सहलीमके सन्निपाते कफे वाते कासे श्वासे च नाशयेत कलिंग
हिंगुमरिचलाक्षासुरसकट्फलैः कुष्ठोग्रशिग्रुजंतुघ्नैः अवपीडः प्रशस्यते पीनसादि
षु व्योषचित्रकतालीसतिंतिडीकाम्लवेतसं सचव्याजाजितुल्यांशमेलात्वक्पत्रपादि

ना.प्र.
३५३

कं व्योषादिकमिदं चूर्णं पुराणगुडमिश्रितं पीनसश्वासकासघ्नं रुचिस्वरकरं परं व्योषादि
वटी व्याघ्रीदंतीवचाशिग्रुसुरसाव्योषसिंधुजैः सिद्धतैलं नयेत् क्लिन्नं पूतिनासागदापहं
व्याघ्रीतैलं शिग्रुसिंही निकुंभानां बीजैः सव्योषसैंधवैः बिल्वपत्ररसैः सिद्धं तैलं नस्यात्पूति
नस्यनुत् निकुंभादंती इति नस्यनुत् नस्यात् शिग्रुतैलं घृतगुग्गुलमिश्रस्य सिक्थक
सप्रयत्नतः धूमः कफवपुरोगघ्नं तंसघ्नं च विनिर्दिशेत् शृंगी कुष्ठकणा बिल्वउत्पलाक
ल्ककषायवत् तैलं पक्वमपाजंवा नस्यात् कफवपुनाशनं नस्यं हितं निंबरसांजनाभ्यां दी
प्तेशिरः स्वेदनमभ्यंगमस्तु नस्ये कृते क्षीरजलावसेकानसंकुंति तिलुंजीत चमधुरूक्षैः ना
सास्रावे घ्राणयोश्चूर्णमुक्तं नावपीडं प्रयेयेऽवपीडाश्चपथ्या तीक्ष्णधूमान् देवदार्वाग्नि
काश्यामांसं वाजं पयमत्राद्दिनुंति इति नृपाये पुसर्वेषु गृहं वातविवर्जितं वस्त्रेण वारुणे
स्येन शिरसोवेष्टनं हितं विडंगसैंधवं हिंगुगुग्गुलुः समनःशिलः वचेत चूर्णमाघ्रातं प्रति

तृपायं विनाशयेत् घृततैलसमायुक्तं सक्तु धूमं पिबेन्नरः स धूमः स्यात्प्रतिश्यायकासे
हिक्काहरः परः प्रतिश्याये पिबेद्धूमं सर्वगंधसमायुतं वा तु पीतकचूर्णं वा घ्रेयं वा कृष्ण
जीरकं कृष्णजीरकमत्रमगरैरत्न पुटपक्वं जयापत्रं तैलसैंधवसंयुतं प्रतिश्यायेषु सर्वे
षु शंसितं परमौषधं जया विजया भंगेति यावत्त् पिप्पल्यः शिग्रुबीजानि विडंगं मरिचा
नि च अवपीडः प्रशस्तोयं प्रतिश्यायनिवारणे शिरसो भ्यंजनैः स्वेदैः नस्यैर्मृदो ष्ठ भो
जनैः वमनैर्घृतपानैश्च तान्यथास्वमुपाचरेत् क्रिमिघ्नाः ये कल्काः प्रोक्तास्तांश्च क्रिमिषु
योजयेत् नवनानि क्रिमिघ्नानि भेषजानि च बुद्धिमान् रक्तपित्तानि दोषांश्च तथार्शां
स्यर्बुदानि च नासिकायां स्युरेतेषां स्वं स्वं कुर्याच्चिकित्सितं गृहधूमकणादारुक्षार
नक्ताह्वसैंधवैः सिद्धं शिखरिबीजैश्च तैलं नासार्शसे हितं इति नासारोगाधिकारः अ
थ मुखरोगाधिकारः तत्र मुखस्य स्वरूपमाह ओष्ठौ च दंतमूलानि दंताः जिह्वा च ता

त्युक्ता गलोगत्वादिसकलेसर्वांगंमुखमुच्यते अथमुखरोगाणां संख्यामाह स्युरष्टावोष्ठ
योर्दंतमूले दशाषट्दंतयोः दंतेष्वष्टौ रसनायां पंच स्युर्नवतालुनि कंठेत्वष्टादशप्रोक्ता
स्त्रयः सर्वेषु च स्मृताः एवंमुखामयाः सर्वे सप्तषष्टिमता बुधैः मुखरोगाणां निदानमाह आ
नूपपिशितक्षीरदधिमाषादिसेवनात् मुखमध्येगदान्कुर्युः क्रुद्धादोषाः कफोत्तराः तत्रोष्ठरोगाः
तेषांनिदानपूर्विकांसंख्यामाह पृथग्दोषैः समस्तैश्च रक्तजामांसजस्तथा मेदोजश्चाभिघा
तोत्थएवमष्टौष्ठजागदाः तत्रवातिकस्यलक्षणमाह कर्कशौपरुषौस्तब्धौकृष्णौतीव्ररुगं
न्वितौ दाल्येतेपरिपाट्येते ओष्ठौमारुतकोपतः परुषौरूक्षौ दाल्येतेविदार्येते परिपाट्यते
किंचिच्छिद्रीक्रियेत पैत्तिकमाह चीयेतेपिडकाभिस्तुसरुजाभिः समंततः सदा
हपाकपिडिकोपीताभासौ च पित्ततः सरुजाभिःपैत्तिकरुगन्विताभिः श्लैष्मिकमाह सव
र्णाभिस्तुचीयेतेपिडकाभिरवेदनैः कण्डूमन्तौ कफाद्दोष्ठौ पिच्छिलौ शीतलौ गुरू सन्निपाति

कमाह सकंडूकः शोसरक्तःपीतोसरुक्च्युतोतथैवच सन्निपातेनविज्ञेयावनेकपिडकान्वितो
रक्तजमाह खर्जूरफलवर्णोनिःपिडकाभिर्निपीडितो रक्तोपसृष्टोरुधिरंस्रवेत्तःशोणि
तप्रभो मांसजमाह मांसादेशोगुरुःस्थूलोमांसपिंडवदुद्गतो जंतवश्चात्रमूर्छंतिनरस्यो
भयतोमुखात् जंतवःक्रमयःमूर्छंतिवर्द्धंते मुखाद्भयतःसृक्कणाः मेदोजमाह स
र्पिर्मंडप्रतीकाशोमेदसाकंडूरोमृदुः स्वच्छस्फटिकसंकाशमास्रावंतोगुरुः अभि
घातजमाह क्षतजाभौवादीर्यंतेपाट्यंतेचाभिघाततः ग्रथितौचसमाख्यातावोष्ठौक
ण्डूसमन्वितौ मथितौमृदिताविव अतएवक्षतजौरुधिराभाविति संगतं अथोष्ठ
रोगाणांचिकित्सा गलदंतमूलदन्तानच्छदेषुरोगाःकफास्रभूयिष्ठाः तस्मादेतेषुसत
तुधिरंविस्रावयेत् दुष्टंचतुर्विधेनस्नेहेन मधूच्छिष्टयुतेनच वातजेसंजनंकुर्यान्ना
डीस्वेदंचबुद्धिमान् चतुर्विधेनस्नेहेनतैलघृतवसामज्जरूपेण वेधंनृणांवमनंवि

भा॰प्र॰ रेकं तिक्तस्य पाने रसभोजनं च शीताः प्रदेहाः परिषेचनं च पित्तोपसृष्टेष्वधरेषु कुर्यात् शि
३५५ रोविरेचनं धूमः स्वेदः कवल एव च हृते रक्ते प्रयोक्तव्याः ओष्ठकोपे कफात्मके मेदोजे स्वे
दिते भिन्ने शोधिते ज्वलनो हितः प्रियंगुत्रिफलालोध्रं सक्षौद्रं प्रतिसारणं प्रतिसारणस्य
विधिमाह दंतजिह्वामुखानां यच्चूर्णकल्कावलेहकैः शनैर्घर्षणमंगुल्या तदुक्तं प्रतिसा
रणं ओष्ठरोगे ब्रणो ये ये तु दृष्टदोषमुपाचरेत् तेषु ब्रणत्वं प्राप्तेषु ब्रणवत्समुपाचरेत् अथ
दंतवेष्टरोगाः तत्र दंतवेष्टरोगाणां नामानि संख्यां चाह शीतादो दंतगदितः पूर्वं दंतपुप्पु
टकस्ततः दंतवेष्टः सौषिरश्च महासौषिर एव च ततः परिदरः प्रोक्तस्ततः स्यादुपकुशः स्मृ
तः वैदर्भश्च ततः प्रोक्तः खल्लिवर्द्धन एव च अधिमांसकनामा च दंतनाड्यश्च पंच च
दंतविद्रधिरप्यत्र दंतवेष्टेऽष्टषोडश स्मृताः तत्र शीतादस्य लक्षणमाह शोणितं दंतवेष्टेभ्यो य
त्राकस्मात्प्रवर्त्तते दुर्गंधीनि सकृष्णानि प्रक्लेदीनि मृदूनि च दंतमांसानि शीर्यंते पचंति

३५५

३३

चपरस्परं शीतादो नाम स व्याधिः कफशोणितसंभवः यदन्तवेष्टेभ्यः दन्तवेष्टनमांसेभ्यः
अकस्मात् अभिघातं विना शीर्यन्ते पतन्ति पच्यन्ते च परस्परं पाकाख्येण मांसानि शो
